श्रीः

# रसदर्शनम्

(साहित्यशास्त्रीयप्रबन्धः)


लेखकः

आचार्यरमेशचन्द्रशुक्लः

साहित्याचार्यः, सांख्ययोगाचार्यः, एम०ए०, पीएच० डी०

श्रीमोतीनाथसंस्कृतमहाविद्यालये शास्त्रचूडामणिपण्डितः

रमेशनगरम्, नयी दिल्ली- ११००१५



Shri KESHABJI GOUDIYA MATH
Mathura (U.P.)



१९८३

प्रकाशिका

देववाणी-परिषद्, दिल्ली

६, वाणी-विहारः, नयी दिल्ली-११००५९

(भारतम्)

# रसदर्शनम्


लेखकः : आचार्य रमेशचन्द्रशुक्लः

प्रकाशिका : देववाणी-परिषद्, दिल्ली
६, वाणी-विहारः, नयी दिल्ली-११००५६

मुद्रकः : प्रवीण प्रिंटिंग सर्विस
३५, टी एक्सटैंशन, उत्तम नगर, नयी दिल्ली-११००५६

संस्करणम् : प्रथमम्, १९८३

मूल्यम् :



Shri KESHAVJI G... MATH
Mathura (U.P.)


# RASADARSANAM


Author : Shukla, Acharya Ramesh Chandra

Publisher : Devavani Parishad, Delhi
6, Vani Vihar, New Delhi-110059

Printer : Praveen Printing Service
35, T Ext. Uttam Nagar, New Delhi-110059

Edition : First, 1983

**Price** :

शिक्षा तथा संस्कृति मन्त्रालय, भारत सरकार द्वारा प्रदत्त आर्थिक सहायता से प्रकाशित ।

# प्रास्ताविकम्

**'देववाणी-परिषद्, दिल्ली'**-संस्थायाः सद्ग्रन्थप्रकाशनरूपमप्येकमुद्देश्यमस्ति। तदनुसारमद्यावधि परिषदा इमे संस्कृतभाषानिबद्धा ग्रन्थाः प्रकाशिताः- (१) **सुगमरामायणम्** (आचार्यश्रीरमेशचन्द्रशुक्लप्रणीतं महाकाव्यम्) (२) **श्रीकृष्णचरितम्** (आचार्यश्रीरमेशचन्द्रशुक्लप्रणीतं महाकाव्यम्) (३) **कर्णभूषणम्** (डा० सी० आर० स्वामिनाथ-कृतं नाटकशोकगीतिप्रबन्धात्मकं रचनात्रयम्) (४-६) **अर्वाचीनसंस्कृतमहाकाव्यविमर्शः** (डा० रमाकान्तशुक्लसम्पादितः खण्डत्रयात्मकः समीक्षाग्रन्थः) (७) **हरविजयस्य साहित्यिकमध्ययनम्** (डा० कृष्णकान्तशुक्ललिखितम्) (८) **श्रीमदप्पयदीक्षितचरितम्** (डा० हरिनारायणदीक्षितरचितं गद्यकाव्यम्) (९) **भाति मे भारतम्** (डा० रमाकान्त शुक्लप्रणीतं काव्यम्) (१०) **भारतस्वातन्त्र्यसङ्ग्रामेतिहासः** (डा० रमेशचन्द्रशुक्लकृतः) (११) **सदाशयसमुच्चयः** (श्री टी० वी० परमेश्वरअय्यरप्रणीतः) (१२) **आभाणकमञ्जरी** (श्री टी० वी० परमेश्वरअय्यरप्रणीता) (१३) **देववाणीदर्शनम्** (डा० रमेशचन्द्रशुक्लादिसम्पादितम्) (१४) **जय भारतभूमे !** (डा० रमाकान्तशुक्लप्रणीतं काव्यम्) (१५) **राधाकृष्णरसायनम्** (श्री ओट्टूरउण्णिनम्बूदिरीपादरचितं भक्तिकाव्यम्) (१६) **अभिनवहनुमन्नाटकम्** (आचार्यरमेशचन्द्रशुक्लप्रणीतं संस्कृतनाटकम्) (१७) **अर्वाचीनसंस्कृतसाहित्यपरिचयः (प्रथम खण्डः)** (डा० रमाकान्तशुक्लसम्पादितः), (१८) **पूर्णकुम्भः** (पण्डितविष्णुकान्तरचिता ललितनिबन्धसंग्रहः) (१९) **स्फूर्तिसप्तशती** (डा० शिवदत्तशर्मचतुर्वेद प्रणीता) (२०) **साहित्यकौतुकम्** (पं० टी० वी० परमेश्वर अय्यरप्रणीतं काव्यम्) (२१) **श्रीबदरीशसुप्रभातम्** (डा० सी० आर० स्वामिनाथन्) च। परिषदा हिन्द्यां रचिताः संस्कृतसाहित्यपरका इमे ग्रन्था अपि प्रकाशिताः :—(२२-२४) **'मेघदूत : एक विश्लेषण', 'रघुवंश : एक विश्लेषण', 'अभिज्ञानशाकुन्तल : एक विश्लेषण', 'कालिदास की कला और संस्कृति (भाग-२)'** (ले० डा० देवीदत्त शर्मा) तथाः (२५) **'साधारणीकरण और समानान्तर चिन्तन की पूर्वपीठिका'** (ले० डा० सुलेखचन्द्र शर्मा), (२६) **भट्टनायक और अभिनवगुप्त की साधारणीकरणविषयक अवधारणा** (डा० सुलेखचन्द्र शर्मा) (२७) **संस्कृत साहित्य में राष्ट्रियभावना** (प्रथम खण्ड) (डा० हरिनारायण दीक्षित)। एतेषु १, २, ९, १०, १४, २४ संख्यका ग्रन्था उत्तरप्रदेशसंस्कृताकादम्या पुरस्कृता अपि सन्ति।

इदानीञ्च परिषदियं स्वसंस्थापकाध्यक्षाणां, **'प्रबन्धरत्नाकर'**—'नाट्य-

संस्कृतिसुधा'—'गान्धिगौरव' 'लालबहादुरशास्त्रिचरित'—'भरतचरितामृत'—'विभावन'—'बंगलादेश' — 'गीतमहावीर'—'संस्कृतवैभव'—'संस्कृतप्रबन्धप्रभा', 'चारुचरितचर्चा' — सुगमरामायण'— 'श्रीकृष्णचरित'—'भारतस्वातन्त्र्यसङ्ग्रामेतिहास'—'अभिनवहनुमन्नाटक'—प्रभृतिग्रन्थप्रणेतॄणां, नैक ग्रन्थेषु लब्धपुरस्काराणां, एम०ए०-पीएच० डी०-साहियाचार्य-सांख्योगाचार्योपाधि विभूषितानाम्, आचार्यश्रीरमेशचन्द्रशुक्लमहाभागानां साहित्यशास्त्रीयं 'रसदर्शनम्' नाम प्रबन्धं प्रकाशयन्ती हर्षमनुविन्दति। आचार्यशुक्लैरेतस्य ग्रन्थस्य लेखनम् भारतशासनस्य शिक्षामन्त्रालय द्वारा प्रवर्तितायाः 'शास्त्रचूडामणिपण्डित' 'योजनायाः अन्तर्गतं नवदिल्लीस्थे श्रीमोतीनाथसंस्कृतमहा विद्यालये १९८२ तमेशवीयेऽब्दे कृतम्। अस्य प्रस्तुतिकाले एवास्य प्रकाशनार्थं शिक्षामन्त्रालयः प्रतिशतं षष्टिरूप्यकाणामनुदानराशिं प्रत्याश्रृणोत्। तदनुसारमस्य प्रकाशनं क्रियते।

'रसदर्शनं' हि भारतीयकाव्यशास्त्रस्य परमप्रसिद्धं रससिद्धान्तं सरलसरण्या अद्यतनीनानां पाठकानां पुरः प्रस्तौति। पूर्वप्रतिष्ठापितसिद्धान्तानां योजना अस्य ग्रन्थस्य वैशिष्ट्यं विद्यते। रसनिष्पत्ति, साधारणीकरणं रसस्वरूपं, रसभेदान् रसविरोधं, रसदोषान्, रससख्यां, रसास्वादप्रक्रियां रसस्य काव्यात्मत्वादिकं चावलम्ब्य काले-काले प्राच्यैः प्रतीच्यैश्चाचार्यैः तत्तद्ग्रन्थेषु यल्लिखितं तस्य संस्कृतभाषायां सारोऽत्र ग्रन्थे द्रष्टुं शक्यते। रससिद्धान्तमवलम्ब्य मराठी-हिन्द्यादिभाषास्वपि नैके ग्रन्थाः शोधप्रबन्धाश्च प्रकाशिताः सन्ति। तेषामप्यत्र यथावसरं सङ्केत आचार्यशुक्लैः कृतः। ग्रन्थस्य शैली नितरां सरला; भाषा सुकुमारमतीनामपि कृते बोधगम्या। 'चेत्' शब्दस्य वाक्यारम्भे 'वा' शब्दस्य च द्वयोः पदयोर्मध्ये प्रयोगः संस्कृतवाग्व्यवहारे हिन्दीपदप्रयोगस्य प्रभावोऽस्ति, काचिन्नूतनता वास्ति, उताहो परम्परानुसरणमस्तीत्यत्र भाषावैज्ञानिकाः रीतिशास्त्रिणो वैयाकरणाश्च प्रमाणम्। आचार्यशुक्लमहाभागानां लेखने एतादृशाः प्रयोगाः प्रायशो लभ्यन्ते। अस्तु।

पञ्चसप्ततिवर्षदेशीया आचार्यशुक्लमहाभागा एवमेव अतन्द्रिताः सन्तः शतायुष्यं यावत्सारस्वतसाधनायां रता भवेयुरिति परमेशः प्रार्थ्यते। परिषदेतेषामाभारमावहति यदेभिः स्वग्रन्थस्य प्रकाशनमतोऽनुमतम्। भारतशासनस्य शिक्षामन्त्रालयो ग्रन्थप्रकाशनायानुदानदानार्थं धन्यवादैः सभाज्यते। पाठकाः कुत्रचिज्जातानि मुद्रणस्खलितानि संशोधयितुं सादरं प्रार्थ्यन्ते।

विदुषां वशंवदः

४ जून १९८३ ई० — रमाकान्तशुक्लः

आचार्यरमेशचन्द्रशुक्लानां षट्सप्ततितमो जन्मदिवसः — महासचिवः

आर ६ वाणी-विहारः, नयी दिल्ली-११००५९ — देववाणी-परिषद्, दिल्ली

श्री :

# शब्दद्वयम्

शास्त्रे स्वाभिमते कृती विरचयेद् भूत्वा पदेऽवस्थितः
ग्रन्थं पृष्ठशताधिकं सुरगिरि श्रीशास्त्रचूडामणेः।
ज्ञात्वा भारतशासनस्य कृतिनामिच्छां हितस्थामिमां
प्राणैषीद् रसदर्शनं भृशमुदा शुक्लो रमेशाभिधः ॥१॥

प्राच्यानां विदुषां विभान्ति विविधा भव्या विचाराः प्रियाः
किञ्चाप्राच्यविपश्चितां नवनवा विद्योतते चिन्तना।
या या येऽप्यथ ये मनोज्ञमधुरास्तत्त्वार्थसक्ता रसे
सः सर्वोऽखिल एव मर्म्मपरकः सिद्धान्तनिष्ठो नवः ॥२॥

सम्यक् चारु विचिन्त्य रम्यविधिना संस्थापिताः सादरं
भेदः को विदितोऽस्तु येन रुचिरो यस्तत्र विभ्राजते।
निर्दिष्टानि मतानि चापि विदुषां साध्वत्र सप्रश्रयं
मूर्धन्योऽस्ति रसो गुणादिनिचये चाम्नातमेतत् पुनः ॥३॥

मन्यन्ते स्म रसं प्रकृष्टमधिकं तत्त्वाखिलेभ्यो बुधाः
कालादेव पुरातनात् सुविदितं सञ्जायते सर्वथा-
प्येतैर्ह्यादत एव भाति विशदं रम्यं प्रमाणं भृशं
वेत्त्वेतत् प्रतिभाभिपूजितजगत् सत्यं शिवं सुन्दरम् ॥४॥

साहाय्यं विदधाति मानवहिते श्रेयांसि सूतेऽनिशं
स्यात् येनैव च वर्त्मना समुदितं पुंसामिदं जीवितम्।
तस्मिन् साधु सदा प्रवर्तयति या विश्वोदयाकाङ्क्षिणी
भूयाद् भारतराष्ट्रवाग् विबुधगीः सात्मावबोधस्थिता ॥५॥

रमेशचन्द्र शुक्लः
ए-१/२०३, जनकपुरी
नयी दिल्ली-११००५८

दिनाङ्क : ४-६-१९८३

श्रीः

सेवायां

श्री डा० सी० आर० स्वामिनाथन्
(Dy. Educational Adviser,
Government of India,
Ministry of Educational and Culture,
Deptt. of Education,
New Delhi - 1 ) इत्येतदाख्यमहाभागानाम् ।

आदरणीयाः,

'शास्त्रचूडामणित्वेन कार्यं कुर्वाण आचार्यो यं विषयमध्यापयति तं विषयमधिकृत्य निबन्धं १५० पृष्ठात्मकं प्रस्तुवीत' इत्येषा F. 32-1/81-SKT-I इत्येतत्संख्यकेन २३-११-१९८१ दिनाङ्काङ्कितेन पत्रेण या सूचनाप्रदत्तासीत् तदनुसारेण आचार्यं रमेशचन्द्रशुक्ल इह शास्त्रचूडामणिपण्डितपदाधिष्ठितः सन् कार्यं विदधद् 'रसदर्शना'-ख्यं पञ्चाशदधिकशतपृष्ठात्मकमिमं निबन्धं न्यबध्नादिति प्रमाणीकरोति—

वेदानन्द झाः
न्यायव्याकरणवेदान्तादिशास्त्राचार्यः
प्रधानाचार्यः,
मोतीनाथसंस्कृतमहाविद्यालयः,
रमेशनगरम्, नई दिल्ली-१५

दिनांकः
३१-१२-१९८२

# अनुक्रमणिका


| विषयः | | पृष्ठाङ्कः |
|---|---|---|
| १. | रसस्तवः | १ |
| २. | रससम्प्रदायस्य पुरातनत्वम् | २ |
| ३. | काव्यकला | ५ |
| ४. | काव्यलक्षणानि | १२ |
| ५. | भट्टलोल्लटादीनां मतम् | १५ |
| ६. | फ्रायडप्रभृतिप्रतीच्यप्रध्यः | २० |
| ७. | रसो रूपकस्यानिवार्यधर्मः | २४ |
| ८. | वक्रोक्तेः काव्यस्य जीवितत्वम् | २६ |
| ९. | औचित्यस्य व्याख्या | २८ |
| १०. | रसस्य त्रिविधत्वम् | ३१ |
| ११. | रसस्य वैलक्षण्यम् | ३५ |
| १२. | भावः | ३९ |
| १२. | शृङ्गारादिरसस्वरूपम् | ३९ |
| १३. | साधारणीकरणम् | ४३ |
| १५. | करुणादिरसेषु प्रतीच्याः | ४५ |
| १६. | शृङ्गारो भोजश्च | ४६ |
| १७. | परस्परविरोधिरसाः | ५० |
| १८. | अद्भुतो रसः | ५४ |
| १९. | शान्तरसोपयोगिता | ५६ |
| २०. | भक्तिः | ६० |
| २१. | प्रेयः वात्सल्यम् | ६३ |
| २२. | भवभूतिः करुणश्च | ६६ |
| २३. | रसापकर्षो दोषः | ६८ |
| २४. | रसवदादिका | ७१ |
| २५. | ध्वनिः | ८२ |

२६. रसाभासादिका: ८५
२७. आक्षेपसमासोक्त्यादिविमर्श: ८६
२८. गुणा:, अलङ्काराश्च ९५
२९. रुद्रटस्य मान्यता ९८
३०. महिमभट्ट: १००
३१. रसास्वादप्रक्रिया १०३
३२. रसस्य वैशिष्ट्यम् १०५
३३. काव्यानन्दे क्रोचे ११०
३४. पश्चिमीयानां काव्यानन्दे मतम् ११०
३५. रसादे: स्वशब्दवाच्यता ११३
३६. काव्यस्यात्मा ११५
३७. रीतय: १२१
३८. आनन्दवर्धनो रीतिश्च १२४
३९. कुन्तकस्य वक्रोक्ति: १२७
४०. प्रतिभा १३५
४१. उद्भटस्य दृष्ट्याम् अलङ्कारस्य महत्त्वम् १३८
४२. रसे रुद्रट: १३८
४३. उपसंहृति: १३९

# समर्पणम्



पं० गुरुदेवशुक्लमहाभागाः

सम्यक् प्रीत्या रसो यो जगति मतिमतामर्चितोऽत्रादरेण
व्याख्यातः साधु तत्त्वोत्तममधुरतमो वाङ्मयाब्धिं विलोड्य ।
कृत्यां सोऽस्यां नितान्तं समुचितविधिना प्रस्फुरच्चारुकीर्ति-
स्वर्गीयाराध्यविद्वत्पितृकरशुभयोरर्प्यते ग्रन्थ एषः ॥

श्रीः

# रसदर्शनम्

यमानन्दं लब्धुं विमलमनसा योगिसुधिय-
स्तपोऽत्यन्तं तीव्रं हरिचरणयोर्भक्तिविपुलाम् ।
पवित्रां बिभ्राणाः सततमनुतिष्ठन्ति रहसि
श्रुतौ सः प्रीत्योक्तो रस इति कवीनां च कृतिषु ।।

विमर्शाय स्वान्तस्मृतशिवपदाम्भोजयुगलो
रसस्याभादिव्यास्पदशुभविशिष्टत्वनवता-
जुषः सौन्दर्याब्धेरतिशयमृदोस्तस्य शुचिता-
भृतः श्रेयोधाम्नो ह्यवहिततयास्म्युद्यत इह ।।

रसं विश्वाराध्यं सहृदयनृणां स्वान्तसुखदं
सुरम्यश्रीदीप्तं शरणमतिभव्यं श्रमहरम् ।
मलघ्नं यं क्षिप्रं परमविभमद्वैतममृतं
पुमान् पीत्वाऽभेदे वसति विमले नौमि तमहम् ।।

अहं कस्त्वं कोऽसाविति सकलभावोऽस्तमयते
स्फुरन्नेषः सद्यः किमपि वचनागोचरसुखम् ।
यदेवैकं दिव्यं ह्यनुभवति चित्ते स्मृतिपथात्
जगत् सर्वं भ्रष्टं भवति च तदा नौमि तदहम् ।।

अखिलमपि जगदिदं प्रमेयतागतं वर्तमानमतीतं भविष्यद् वा ब्रह्मैव, 'द्वे एव ब्रह्मणो रूपे मूर्तं चामूर्तञ्च'। तच्च ब्रह्म सत्, चित्, आनन्दमयञ्च। तद्विलक्षणरमणीयतामयं पदे पदे नवनवरहस्यरम्यं विश्वमेतच्चराचरात्मकं तस्य काव्यं यन्न क्षयं न च जीर्णत्वमुपैति ।

'यस्य देवस्य काव्यं न ममार न जीर्यति'।

तदेव रस्यते नेत्रादिभिः, अनुभूयते हृदयेन, चिन्त्यते चेतसा च। रसयिता रसिता च स्वयमेव जीवभूतः। सोऽयं रसो रस्यते हि साक्षात्कर्तृभिः।

'रसो वै सः'

**रसं लब्ध्वैवायमानन्दीभवतीति** छान्दोगाः। तस्यैव प्रतिकृतिः शब्द-ब्रह्मणो ग्रन्थकारेण पुरतो निधीयते, प्रस्तूयते, विधीयते च रसमयी। आनन्दो जीवस्य धर्मः। नायं रस आनन्दाद् व्यतिरिच्यते रस्यते आस्वाद्यते इति व्युत्पत्तेः। प्राणभृतां सकलोऽपि व्यापारो रसाभिलाषमूलः। न केवलं काव्य-कलापे, व्यवहारजगत्यपि च प्राणभृतां रसमुद्दिश्यैवाहारविहारादिप्रवृत्तिः। आनन्दमभिलक्ष्यैव विषयेष्वभिनिवेशः। एतस्मादेव हेतोः काव्यजनित आस्वादोऽपि रस एव। तस्य स्वरूपं हि न ब्रह्मणो रूपाद् भिन्नम्। उक्तञ्च आचार्यविश्वनाथेन स्वकीये साहित्यदर्पणे—

**सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः ।**
**वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः ॥**
**लोकोत्तरचमत्कारप्राणः कैश्चित्प्रमातृभिः ।**
**स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः ॥** (सा०द० ३/२)

भारतीये साहित्यशास्त्रे रससम्प्रदायोऽस्ति नितरां प्राचीन इति न तिरोहितं विपश्चिन्महाभागानाम्। को नाम आचार्यः सर्वतः प्राक् रसं निरूपयामास इत्यत्र सन्ति विदुषां विप्रतिपत्तयः। काव्यमीमांसाकारो राजशेखरो रससिद्धान्तस्य संस्थापकं नन्दिकेश्वरं, यस्य भरतादपि प्रत्नतरत्वं मतं, मन्यते। साहित्यशास्त्रेतिहासकाराः परं नन्दिकेश्वरकृतस्य ग्रन्थस्य कस्याप्यनुपलब्धत्वाद् भरतमेव रसस्याद्यमाचार्यमवगच्छन्ति।

'**कर्त्तव्याः काव्येषु रसा बुधैः**' इत्युक्त्वा आचार्यभरतेन यस्यां रचनायां रसः सैव काव्यमिति निगदितम्। अयं रसः क इत्यत्र तत्त्वविदो वदन्ति—'**चेतनाया विशिष्टा परिणतिर्हि रसः।**' न स रसोऽनुभूतेः पृथक् कर्तुं शक्यो रसास्वादनार्थं सौन्दर्यबोधस्यापरिहार्यत्वात्। नाटकादिदर्शनात् काव्यस्य चाध्ययनात् श्रवणाद् वा रस आविर्भवति। तदा तत्र सौन्दर्यं मानवः प्रेक्षते तस्य च स बोधं विदधाति तन्मानसे रसः सञ्चरितुमारभते। अस्यामनुभूत्यां समग्रो निधिरतीतानागतपरक आत्मानमभिव्याप्य समुपस्थितः सञ्जायते। सश्चेतनयाः सर्वथैवोन्मीलितया श्रिया सचेतस आत्मनोऽखण्डालोकेन दीप्यमानो भूत्वा प्रादुर्भवति। अध्येतॄणां नेदमविदितं यदस्मदीया ऋषयो मूलसौन्दर्य-चेतनामपूपुषन् अवीवृधंश्च भृशम्। सूक्तेषु स्थाने स्थाने कलाया वाचायाश्च स्वरूपं विशदतया विचारितमवाप्यते। तेन आर्षदृष्टिर्हि रसस्य सौन्दर्य्यस्य मर्म्मण्यात्मानं प्रावीविशदिति ज्ञातं भवति।

ऋषयो रसत्वेन परमेश्वरं व्यक्तीकृत्य स्पष्टतया रसस्यानन्तानन्दमयत्वं प्रत्यपीपदन्—

**"अग्ने यत्त शुक्रं यच्चन्द्रं यत्पूतं यच्च यज्ञियम् । तद्देवेभ्यो भरामसि ।"**

(यजुः, पू० अ० १२/१०४)

सौन्दर्यचेतनायाः कलात्मकताया आधार इव नृत्य-नाट्य-संगीत-चित्र-मूर्त्यादिकलाः सन्ति । भरतरचितं नाट्यशास्त्रमस्मिन् विषये कृत्स्नतया प्रकाशं क्षिपति । अत्र शास्त्रे रसमीमांसाया आध्यात्मिक्यः कलात्मिकाश्च विचारणाः मनोविज्ञानस्य महीं परिष्वजमानाः प्राप्यन्ते । ताभ्यो वयं विद्मो यत् सौन्दर्यतत्त्वस्य मानसिक्य आधारभूताः सन्ति मानवस्य अन्यासु परिस्थितिषु अनुभूयमानानन्दात् सर्वथैव व्यतिरिक्ताः । अस्ति तु परं द्वयोरपि स्रोतः एकमेव । तत्र कारणं वर्तते रसस्य शमस्वरूपत्वम् । रसो हि मूलतोऽस्ति शमः । अस्मादेव शमात् सर्वे रसा उद्भवन्ति विलीयन्ते च तत्रैव । आचार्यभरतस्य रससूत्रावगाहनात् तथ्यमिदं संलभ्यते । सर्वेषामपि रसानां शम एवान्ततोगत्वा परिणमनात् अध्यात्मवादिनो रसस्य परिग्रहणमात्मनश्चेतनाया वा स्वरूपत्वेन कुर्वते । अस्ति स आत्मन आनन्दमयं रूपम् । इदं हि स्वरूपं कलायाः सौन्दर्यमुन्मीलयति । व्यवहारा वासनाश्च चिदात्मन उपरि आवरणं प्रक्षिप्य तं परमार्थत आनन्दाच्च दूरे नयन्ति । अत एव चिदावरणच्छेदनमेव रसस्यास्ति सारः । अध्यात्मवादिनो वदन्ति—रसानुभूतेः सम्बन्ध आत्मना वा सहृदयरसचेतनया सार्धमस्ति । तदीया सा स्थिति र्निश्चप्रचतया वर्तते लौकिकी । व्यवहारस्य जीवनस्य वा वासनाश्चेतनां जडत्वाद्यावरणावृतां विधाय तदीयं विशुद्धमाध्यात्यिकं सुखं हरन्ति । रसास्वादनानेहसि व्यवहारापेक्षिणीभ्यः स्थितिभ्यो मुक्तो भूत्वा आत्मा निस्सीमतां याति । एतस्याः अनुभूतेः परमसुखं रसे सन्निविष्टं भवति । रसम्प्रति सत्यामप्येवंविधायामाध्यात्मिक्यां दृष्ट्यां, यदा कलादृष्ट्या तत्र विमृश्यते तदा रसस्य विशुद्धाध्यात्मिकानुभूतित्वं न सिद्ध्यति । तद्विषयिकानुभूतिर्न समाधिविषयकानुभूतिरिव भवति । रसे इन्द्रियाणि सौन्दर्यं साक्षात्काररीत्योपभुञ्जन्ति, प्राणाश्च तल्लीना भवन्तः प्लवन्ते मनोबुद्ध्यादिकानां च वृत्तयः कामपि प्रीतिं विन्दमाना विराजन्ते । परं वृत्तीनां निरोधान्न मनः समाधौ गतिमद्भवति, तस्य शून्यत्वात् । तत् सम्पूर्णवृत्तीनां लयात्मिकया गत्या सौन्दर्य्येऽवगाहते । वस्तुतस्तु अध्यात्मवादो न सौन्दर्यबोधं न च

तच्चेतनाया लक्षणानि व्याख्यातुं क्षमते। परं कलायामेष दोषो न दृश्यते। सा अलौकिकत्वं तु निदधाति परं नासाधारणत्वम्।

कला स्वकीयामभिव्यक्तिमभिलषते। सुखमन्यद् दुःख चान्यदित्येतत् तद्-दृष्ट्यां न पारमार्थिकम्। सा तु सुखदुःखादिकं सममेव पश्यति। न तत्र कोऽपि भेद इत्येषा तस्या मान्यता। तस्मात् कारणाद् बेडले महोदयः 'काव्यम् आत्मनः स्वच्छन्दाभिव्यक्ति'रित्येतत् काव्यस्य लक्षणं विदधाति। काव्यकला मानवजीवनादेव स्वाभिमतमुपादानमुपादत्ते। अतः सा मानवजीवनोन्मुख्यां प्रवृत्यामभिनिविशते। सैव काव्यकला मानवजीवनपथं पुनाति, सा जीवनमुत्थापयति, जीवनं सत्यं वरीतुं नुदति, तदर्थे मंगलविधायकं सन्देशं प्रयच्छति। काव्यकलाया महनीयायाः महत्तायाः प्रतिपादनस्यार्थोऽस्ति रसस्य निष्पादनम्, तदीयाया अनन्यगाया विशिष्टतायाः समुपस्थापनम्, तदीयस्य गरिम्णो महिम्नश्च प्रतिष्ठापनम्।

रसो निराकारः। काव्यं हि तस्यास्त्याकारः। कविरात्मानं प्रकटीकर्तुं काव्यं सृजति। सः काव्ये शब्दार्थौ सुधामयौ कृत्वावतारयति। कलाकलितौ भूत्वा शब्दार्थौ भव्यं सात्त्विकमजेयं बलमधिगम्य जगति घटिताः घटनाः विचित्रविचित्राः घटयितुं क्षमौ जायेते। कवेर्वाणीमाकर्ण्य वीराः समराजिरेऽसूनपि स्वान् सहर्षं जुह्वति, कृपणाः अपि धनवन्तस्तां निशम्य दीनदरिद्रान् रक्षितुं, राष्ट्रं विपत्सागरादुद्धर्तुं, शिक्षणालयभेषजालयानाथालयादिकं स्थापयितुं, धर्मञ्च पातुं लक्षशो लक्षशो रूप्यकाणि प्रदातुमुत्साहपूर्वकमुद्यताः सञ्जायन्ते। किं बहुना, जगति तास्ता अद्भुता हितावहाः घटना घटितुमारभन्ते यदा कविः स्वकीयां वाणीं प्रयोक्तुमवतरति —

वीरा भारतवर्षस्य सैनिकाः साहसप्रियाः।
अदम्योत्साहसम्पन्ना भुजोच्छिन्नमहारयः॥

हनूमद्रामदुर्गादिसुरसेवापरायणाः।
शिवाजीगुरुगोविन्दप्रतापादिकुलोद्भवाः॥

आकर्णयत वाक्यं मे भूत्वा सावहिता भृशम्।
स्वस्वरूपानुरूपं यद् द्रुतं तदनुतिष्ठत॥

दर्पिणां दर्पनाशाय मातृभूरक्षणाय च।
परिभवाय शत्रूणां यूयं धात्रा विनिर्मिताः॥

**भोः सैन्या भारतीयाः प्रतिदिशमसकौ युष्मदीया प्रवृत्तिः ।**
**यन्नैते खर्वगर्वा निजरिपुनिवहं जीवितं संत्यजन्ति ।।**

**तं भूमौ सन्निपात्य द्रुततरमखिलं शस्त्रमस्त्रादि हृत्वा ।**
**कीर्त्यां कैलाशमूर्त्यां जगदिदमखिलं किन्त्वमी श्वेतयन्ति ।।**

कवेर्वाणी रोद्धुमन्यायं जनेष्वप्रमेयं बलं सञ्चारयति । तद्वाणीप्रभावात् सर्वत्र करुणासरित् प्रवहन्ती दृष्टिपथमधिरोहति । यदा हि कवेर्वाणी शृंगारे-भिरुचिं परिपुष्णन्ती परिस्पन्दते तदा तां श्रुत्वा संयमिनापि कृतब्रह्मचर्याभि-मानानामपि चेतांसि विकृतानि भवन्ति । एतद्विधविचित्रसामर्थ्यशालिनीं कवेः कृतिं प्राप्य स्तुवन्तीत्थं सुधियः —

**'अपारे काव्यसंसारे कविरेव प्रजापतिः ।**
**यथास्मै रोचते विश्वं तथेदं परिवर्तते ।।**

काव्यकला कलानां सम्राज्ञी । सा चित्रसंगीतादिकाश्चतस्रोऽपि ललिताः कलाः अधरीकरोति । सा स्वेतरसकलकलानां शिरांसि नमयन्ती श्रेष्ठमुच्च-तमासनमध्यास्ते । सा यया समीचीनतया निखिलानपि लोकान्, सकलानपि कालान्, अविद्यमानानपि पदार्थानवतारयति, न तया सुषमया अन्याः कला-स्तच्चमत्कारमयं कार्यमहनीयं कर्तुं क्षमा भवन्ति । वेधसः सृष्ट्यां समग्राया-मपि यत् क्वापि न संलक्ष्यते तदपि काव्यकलेयमाविर्भावयति । या नवरसरु-चिरतात्र विद्योतते सा न सृष्ट्यां क्वापि दृश्यते । एतादृश्यनन्यलब्धा विशि-ष्टता तत्रावलोक्यैव काव्यप्रकाशकारो मम्मट आचार्य आचष्टे—

**'नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम् ।**
**नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति ।।'**

**'कला कलायाः कृते'** इत्येतद् ये वदन्ति तेषां कवीनां काव्यानि विविधा-लङ्कारशब्दार्थचमत्कारप्रसाधनैः प्रसाधितानि सुगुम्फितानि सुश्लिष्टानि च जायन्ते । तेषां भावात्मकं सौन्दर्य्यं तत्रत्याभ्यन्तरी शोभा वा बाह्यया विद्युत्तर-लया चारुतयाऽऽव्रियते ।

**'कला मानवजीवनोम्भनाय'** इत्येतद् येषां मन्तव्यं तेषां कवीनां काव्येषु न शब्दचित्रतायाः प्राधान्यं प्रेक्षितं भवति, न तानि काव्यानि अलंकार-शब्द-चमत्कारचारुताचञ्चच्छटाभिराक्रान्तानि भवन्ति । तानि काव्यानि तु विना शब्दाडम्बरमृजुतयैव परं मधुरतया मानव-समाजस्य पुरस्ताज्जीवनस्य स्वरूपं

प्रस्तुवन्ति। तानि मानवजीवनस्योद्देश्यं, जीवनोत्थानस्य चोपायान् हृदयरञ्जनकारिणा विधिनोपस्थाप्य लोकस्य हितं क्षिप्रमेव साधयितुं समर्थानि जायन्ते। जनवृन्दं सुखमाह्लादं च विन्दत् तेभ्यः स्वकल्याणं गृह्णाति। एतद्विधविशिष्टत्वात् काव्यस्य, तत्पुराणशास्त्रदर्शनादीन्यप्यतिशेते। पुराणानि दर्शनानि शास्त्राणि च तानि तानि यद् यद् वदन्ति तत्तदेव काव्यमपि गायति परं व्याहरणपद्धत्यां भेदो वर्तते। जनाः पुराणादिप्रकथनपद्धत्यां न तथा रज्यन्ति यथा ते काव्येऽनुरज्यन्तो रमन्ते। अतः काव्यात् स्वश्रेयःप्रेयःकारितत्वस्य ग्रहणार्थं सदैव समुदं तदुन्मुखास्ते सञ्जायन्ते। यत्र चेतो विनोदें रतिञ्चाश्नुते ततोऽनायासेनैव हितानां लाभो बोभवीति। पुराणादिगतसौन्दर्यं न हृदयमावर्जयितुं तान्युपादानानि निदधाति यानि काव्यम्। वस्तुतः काव्यगतं सौन्दर्यं पुराणादिगतसौन्दर्यान्महीयो गरीयो ज्यायश्च सामान्यस्यापि जनस्य हिताचरणं सम्पादयितुं किमप्यन्यदेव धीकौशलं, किमप्यन्यदेव वैदुष्यं किमप्यन्यदेव वाग्वैदग्ध्यमपेक्ष्यन्तेऽत एव कविकर्म पुराणादिपण्डितानां कर्मणोऽपि दार्शनिकानां च कर्मणोऽपि गहनतरं गम्भीरतरं कठिनतरं च भवति।

काव्यजनितं माधुर्यं निपीय यादृशमानन्दं रसिका विन्दन्ति, अनुभवन्ति च न तादृशमन्ये। सत्यस्य प्रकाशनं न कठिनं, न च परुषवचःप्रयोगोऽपि कठिनः, कठिनं त्वस्ति सत्यस्य सुन्दरतया मधुरतया विलक्षणतया च आविर्भावनम्। अत एव कविकर्म परमगहनम्। कवेः काव्यं सत्यं शिवं सुन्दरं च भवद् दृष्टं भवति, एतदेव वैशिष्ट्यं काव्यं वाङ्मये स्थानविशेषाधिष्ठितं विदधाति। काव्यं स्वाभिमतं प्रकाशयितुं नाभिधावृत्तिमवलम्बते, न च लक्षणां, न च मीमांसकप्रियां तात्पर्यामेव। तत्तु व्यञ्जनामाश्रयति। व्यञ्जनया काव्यं वस्तुतोऽनन्यलब्धां प्रकर्षश्रियमधियाति। तल्लोकोत्तरं तया सञ्जायते। काव्यस्य लोकोत्तरत्वादेव आचार्य आनन्दवर्धनस्तत्प्रशंसायामाह—

**प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।**
**यत् तत् प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु॥**

एतस्य हि रसस्य दर्शनं कारणकार्यसम्बन्धरूपाधारेण मीमांसामनेकधोपस्थापयत् प्राप्यते। इमं हि कारणकार्यसम्बन्धं विशदीकर्तुं सत्कार्यवादः परिगृह्यते। सत्कार्यवादः कार्यं सत् इति मन्यते। स इह ब्रूते कार्यं कारणे वसति, विशिष्टपरिस्थितिवशात् तस्य (कार्यस्य) आविर्भावो भवति। यथा परिस्थितिबन्धने निपत्य हैयङ्गवीनं दुग्धादुद्भवति, तथैव चेतनारूपकारणात्

रसचेतनारूपकार्यमुद्भवति परिस्थितिविशिष्टायां सत्याम्। चेतना-रस-चेतनयोर्मध्ये कोऽपि भेदो न। चेतनारूपकारणस्य सर्वाण्यपि लक्षणानि रसानुभूतिरूपकार्येऽपि व्याप्तानि सन्ति। अतश्चेतनारूपकारणं रसानुभूतिकार्यमुभयमपि यथार्थत एकमेव। तदेवं सत्कार्यवादेन रसः पूर्णतया मीमांसितो भवितुमर्हति। यथा दुग्धरूपकारणस्य दधिरूपकार्यपरिणामस्तथैव चेतनारूपकारणस्य रसचेतनारूपकार्यपरिणामो ज्ञेयः। सांख्यदर्शनदृष्ट्यैष विचारः समुपस्थापितः।

विवर्तवादो वेदान्तस्यास्ति। तत्कथनमिदम्—कारणकार्ययोर्मध्ये वस्तुतः एकत्वमेव। व्यवहारवशादिदं कारणम् इदं कार्यमिति प्रोच्यते। सुवर्णेन कटककुण्डलादिभूषणानि बहुविधानि निर्मितानि भवन्ति। परं तत्त्वदृष्ट्या कटककुण्डलादीनि भूषणानि न सुवर्णाद् भिन्नानि। सुवर्णमेव कटककुण्डलादिभूषणरूपं निदधत् समुपतिष्ठते। न सुवर्णात् परमन्यत् किमपि। सुवर्णमेव विभिन्नेषु रूपेषु वर्तते। अतः कारणकार्ययोः परिणामो न, अपि तु विवर्त एव। एवमेव चेतनारसचेतनयोर्मध्ये एकत्वमेव तथैव, यथा सुवर्णकटककुण्डलादिभूषणयोर्मध्ये एकत्वम्। यथा सुवर्णमेव कुण्डलादिविभिन्नरूपेषु वर्तते तथैव चेतनैव रसचेतनारूपे विद्यते। व्यवहारवशादेव चेतनेयं, रसचेतनेयम् इत्यादिकं कथ्यते। इत्थं विवर्तवादमाश्रित्य वेदान्तदर्शनविद उभयोरपि अभिन्नत्वं निरूपयन्ति।

रसास्वादनं नाम आत्मसौख्यानन्तसागरे सन्तरणम्, किं वा सङ्कीर्णोद्देश्यादुन्मुक्तं भूत्वा व्यक्तित्वं तद् आत्मनि नवोद्देश्यस्य प्रादुर्भूतत्वाददद्भुतस्यालोकस्याभायां निमज्जति। किं वा जीवनस्यासीमतायां निलीय तत्र नूतना शक्तिमयी स्फूर्तिः सञ्चरते। तदानीन्तनेऽनेहसि व्यवधानहेतोर्जीवने यो गतिरोधः स्फुटति, या च स्तब्धतोत्तिष्ठति तयोस्तिरोधानं सञ्जायते। मार्दवस्य माधुर्यस्य च तत्रावतारणा भवति। जीवने गत्याञ्च नवा एव श्रियः प्रवहमाना भवन्ति। सर्वा अपि मनोग्लानयः सर्वे चाधय उपरमन्ते। वस्तुतस्तदा आत्मा स्वकीये रूपे स्थितो भवितुं सदवसरमश्नुते। तस्यानन्दमयत्वात् तदा सः स्वकीयामानन्दमयतां प्रत्यक्षीकर्तुमीहते।

अस्मदीयायाः सत्ताया द्वे स्वरूपे मन्तव्ये। एकतरन्तु सहजम्, उपनिषदो यद् 'आत्मा' इति किं वा 'ब्रह्मतत्त्वम्' इति समुदमामनन्ति। मनोविज्ञानविदस्तदसीमचेतनत्वेन, बुद्धवादिनः 'शून्यत्वेन', वर्गसो 'जीवन-तरङ्गावलित्वेन', विलियम जेम्सो 'जीवन प्रवाहत्वेन' मन्यन्ते।

द्वितीयं हि रूपं व्यक्तित्वं ज्ञेयम् । तत्सहजात्मसत्ताया आकस्मिकं व्यावहारिकं सीमितं तत्वं वेद्यम् । तत्सहायतया अव्यक्ता आभ्यन्तरिकी सत्ता यथार्थतां स्पृशति । अव्यक्तं यदा व्यक्ततायां परिणमते तदा व्यवहारः संस्फुरति । रसे तु नैतद्विधतावलोक्यते । स तु सर्वाः अपि सीमाः, अतिक्रम्य विजृम्भते । भावोऽयं व्यक्तित्वस्य विलयनम् आत्मसत्तायाश्चोन्मेषो हि रसः ।

कमपि रागं श्रोतुमिन्द्रिय-मनोबुद्धि-चित्तभावनाहृभावादिरूपव्यक्तित्वस्यानेकभूमिषु याः क्रियाः जाग्रति ता जागृताः क्रियास्ताः प्रवृत्तौ विनिविष्टाश्चेष्टाः एव रसास्वादनभूताः सन्ति ।

रसास्वादनं प्रियमधुरानुभूतिः । कलाकारः स्वकौशलेन, सहृदयो रसप्रवणतया जीवनस्य दैनिकं सत्यं परिपालयन्, तदेवोपादानीकृत्य रसमास्वदते । योऽत्र रसः प्रतिपाद्यते तत्र बाह्याः संवेदनाः अपि मिलन्ति एकतः, एकतश्च तत्र जीवनस्य साधारणा जीविताश्चानुभवास्तत्र प्रविशन्ति, अतः सः सौन्दर्यमादातुं शक्नुते । नेदमत्र विस्मरणीयं यद् रसस्य न कश्चिदाध्यात्मिक आधार एव परं स तु व्यक्तित्वद्वारेण रूपरसगन्धस्पर्शगत्योजःस्वरूपसम्पद्भिरपि संसेव्यमानो जायते, विना तद्विधतां स रिक्त एव स्यात् ।

मानवो यथार्थतां विक्षिप्तायामवस्थायामेव हातुं प्रभवति, केषाञ्चन मतेन तु तत्रापि न । रसास्वादनदशा सा न भवति या यथार्थत्वविरहिता वर्तते । यथार्थता तु तत्र चर्वणाया विषयो भवति किञ्च सा रसमुद्दीपयितुं साधनत्वेन स्वीक्रियते । रसः स्वच्छन्दतया सञ्चरेत इत्येतन्निमित्तेन यथार्थतायाः कामपि अवधिं यावदुपेक्षणमपि कर्तुं शक्यते । यथार्थता तु सैवाभीष्टा भवति या रसानुभूत्या प्राणान्, शक्तिं वा गतिं सन्निवेशयेत् ।

समीचीनं विवेचनमस्मान् निश्चयमिमं नयति यत् सौन्दर्यं विषयगतं विषयिगतं च भवत् सदैव प्रवर्तते । सत्तादृष्ट्या सौन्दर्यस्याधिष्ठानं सुन्दरं वस्त्वेवास्ति, रसाधिष्ठानं रसिकचित्तमेव । परमनुभूतिप्रयोजनेन उभयमपि समानाधिकरणत्वेन अपेक्ष्यते । विषयविषयिणोः संहति हि रसं सृजति । परं नात्र संशयो यत् सौन्दर्यसत्ता विषयगतैव । यतोहि कलाकारो वस्तुन्येव सौन्दर्यमवतारयति न च रसे । रसिकस्तु स्वास्वादनक्रियाभिस्तद्रसे परिणमय्य विषयिगतं विदधाति ।

रुचेर्वैचित्र्यं स्पष्टतयैव जनस्य शिक्षा-संस्कार-वातावरणादिकैर्निर्मित जायते चेत् कश्चिज्जनो मूर्त्यां जुगुप्सते तदा तत्र कारणं तस्य सम्प्रदाय-

मतादिपरकाभिनिवेश एव हेतुः । एवमेव कलासु रूपकौशलाभिव्यक्तिभावना सम्बन्धिन्याः क्षमतायाः मनीषायाश्च परिपाकोऽपि रुचिविभिन्नतां जनयितुं क्षमते । संस्कृतिः समुदाचारश्च स्वयं यस्यां धरायामानन्दं ग्रहीतुं शक्नुवाते तां निर्धारयितुमुद्यतेते ।

अस्मदीयः स्थायी निर्बन्धो, नैतिकसामाजिक-वैयष्टिकमान्यताः, एतावदेव न, प्राग्वर्ती अभिनिवेशः, पक्षपातश्चैकतः, एकतश्चानुक्षणं परिवर्तनप्रियस्य मनसोऽवस्थाः रसम्प्रति अस्मदीयाभिरुचेः स्वरूपं निश्चिन्वन्ति । एतावत्या विचारणया 'एतेषां समेषामपि एकमेव स्रोतोऽस्ति सचेतसो व्यक्तित्व' मिति सिद्ध्यति ।

गाम्भीर्यगतिदीप्तिपरिपाकविस्तारा रसस्य मानदण्डत्वेन मता भवन्ति । सन्त्येते मूलमानदण्डाः । माधुर्यम्, ओजः, प्रसादः किञ्च एतत्समकोटिकाश्चित्त-सम्बन्धजुषो द्रुतिदीप्तिविस्तारा रसोपकारिणो मता भवन्ति । एतैः रसस्य श्रीः विशिष्टतामाप्नुते । रसो हि सामाजिक-नैतिक-धार्मिकोपयोगितात्मकदृष्ट्या कीदृक् इत्येतदपि रसज्ञास्तद्विषये विमर्शणमपेक्षितं मन्यन्ते । इदमेव कवेः काव्यानि सामाजिकनैतिकधार्मिकादिकानि अपेक्ष्यन्ते येन तेभ्यस्तेते सर्वेऽपि रसमास्वादयितुं प्रभवेयुरित्येतदादिशब्देषु व्यक्तं भवितुमर्हति । रसविदां 'तत्र सामाजिकजीवनं, लोकमङ्गलं यथार्थं भवत् समुद्दीप्येत' इत्येष च वर्ततेऽनुरोधः ।

नैतिकताया उन्मेषार्थं काव्यात् परं किमपि सुन्दरं प्रकृष्टञ्च साधनं न विद्यते तस्माद्धेतोस्तस्याः सन्निवेशः करणीय एव कविभिः । छवी रसस्य तया सत्तया कामप्यद्भुतामेव पुष्टिमुपैति ।

किमस्ति सौन्दर्यम् ? सत्यता सौन्दर्यमस्ति, सदाचारः सौन्दर्यमस्ति; गुरुजनानामाज्ञापालनं सौन्दर्यमस्ति, विद्याविदग्धता सौन्दर्यमस्ति, सद्गुणशालिता सौन्दर्यमस्ति, सतां सेवा सौन्दर्यमस्ति, परमात्मपरकभक्तिः सौन्दर्यमस्ति, सर्वभूतहितपरायणता सौन्दर्यमस्ति, विश्वबन्धुता सौन्दर्यमस्ति, स्वमातृमहीप्रेम सौन्दर्यमस्ति । सौन्दर्यमेव जीवनम् । यस्मिन् जीवने सौन्दर्यं न तज्जीवनं तु भूभारः । प्रेक्षकं सौन्दर्यं नन्दयति । तद् आनन्दाह्लादात्मभावलोकोत्तरैक्यानि मनसि समुत्पाद्य सर्वेभ्योऽपि विषयेभ्यो मानवं परावर्तयति । मानवस्तदा यामनिर्वचनीयां प्रीतिप्रदां स्थितिमनुभवति सा असाधारणी स्थितिर्बुधैः सादरं रस इति व्याह्रियते । तं रसमास्वाद्य सचेताः कृतकृत्यतां याति,

कृतार्थतां च प्राप्नुते । यदा हि स रसमनुभवति न तदा—रसानुभूतिकाले—रसज्ञः स्वत्वाद् भ्रंशति, अपि तु तदा सः स्वकीयं यथार्थं रूपम् (आनन्दमयं रूपम्) पश्यति । सः स्वरूपोपलब्धि विधाय प्रीयते, तुष्यति च । तस्य मनसि, बुद्धौ, चित्ते, इन्द्रियेषु च या चेतना व्याप्नुते सा साधनमासाद्य प्रस्फुटति । इदमेवात्मतत्त्वस्योन्मीलनं रस इति कथ्यते ।

मानव एतस्यां शुभवेलायां जाति-धर्म-नीति-विज्ञान-व्यवहारप्रभृतिभ्यो दूरीभूय शुद्धां चेतनामनुभवितुमारभते । सत्यं ज्ञानमनन्तं ब्रह्म यथा योगी समाधावनुभवन् बाह्याज्जगतो दूरे जायते, तथैव रसानुभुतिकाले सहृदयस्यापि स्थितिः सञ्जायते ।

एषा रसमीमांसा तु औपनिषत्कस्य वादस्यालाप इत्येतन्न, रसास्वादने मनोबुद्धिचित्ताहङ्कारप्राणेन्द्रियशरीराणां न विलयो जायते, अपि तु तदा सर्वेषामप्येतेषां नवोन्मेषो, नूतनं स्फुरणं, दिव्यं जागरणं च जायन्ते, एतद्विधता रसानुभूतिं सान्द्रतामनुपमामेव नवतां नयति, तत्र सा अपूर्वतां जनयति चमत्कारञ्च चारुतरं समुद्भावयति ।

रसस्यास्वादनं तमोऽवस्थायां न भवति, न च मनसो मलीमसायां दशायां, न च चिन्ताग्रस्ते चित्ते, न चाहंभावस्योद्रेके, न च प्राणेन्द्रियादिकानामुत्तेजोग्रस्तास्वस्थतायामेव । तेषां सर्वेषामपि प्रवृत्तिरुन्मुखता गतिश्च व्यवहारेभ्योऽखिलेभ्य आवश्यकताभ्यश्च सर्वाभ्यो निवर्तन्ते । सावस्था ज्ञानं विहाय संसारमपि वृणुते कदापि, कदापि च सा तं हित्वात्मानं ज्ञाने रमयति । निश्चप्रचतया बुद्धेः क्रिया, अन्ततो गत्वा, रसास्वादनोन्मुखी प्राप्यते । समग्रमपि व्यक्तित्वं रसाप्लावितं भूत्वा सक्रियतायां परिणमते । इयं हि रसचेतना वस्तुतोऽनिर्वचनीयास्ति । तामनिर्वचनीयां रसचेतनां बुद्धिमानसेन्द्रियाणि स्वस्वसहजक्रियाभिः सौन्दर्यगुणप्रभावपरिपूर्त्तिपुरस्सरमेकान्ततो विशिष्टितां नयन्ति । अतः रसानुभूतिमध्ये एतेषां सर्वेषामपि समावेशो वर्तते । तानि च सर्वाणि स्वस्वसहजक्रियाभिर्हि रसस्रोतोगतिं समृद्धां स्फीताञ्च विदधति । तं समृद्धं स्फीतं रसं निपीय सहृदयलोकः कृतार्थतां याति ।

अत्रेममपि विचारं प्रकाशयन्तः प्रधीन्द्राः प्रेक्ष्यन्ते—

'रसो न स्थायिभावानामुद्रेकमात्रः । स तु अन्यैश्च तत्त्वैः समन्वितोऽस्ति । तानि तत्त्वानि बुद्धिचित्ताहङ्कारादिक्रियाभ्योऽपि लभ्यन्ते । अनेकरासायनिकविधयस्तानि पचन्ति ततश्च तानि यान्त्येकरूपताम् । रसस्य तरङ्गशतसमु-

च्छलितायां स्रोतस्विन्यामनेकविधानां स्रोतसां संलीनत्वात्, तत्र बुद्धेर्ज्ञानालोकः, मनस उत्तुङ्गास्तरङ्गा, कल्पनानां दशदिशाव्याप्युत्पतनम्, चित्तस्य प्रसादः, अहंभावस्य निषेधपथगा प्रदीप्तिः, स्नायुप्राणादीनां प्लवनम्, इन्द्रियाणां वस्तुगुणवैभवस्यासादनं च युगपत् आपतन्ति। इत्थं रसस्यानुभूतिरखिलव्यक्तित्वस्यानुभूतिर्भवति । सा गम्भीरानेकभावानां व्यापकं जागरणमस्ति। एतद्विधनानावैचित्र्यदर्शनात् सः स्थायिभावानामुद्रेक एवेत्येतदपि कथनं युक्तं न प्रतिभाति।

काव्ये सकलस्यापि जीवनस्य विस्तारो विशदञ्च गाम्भीर्यं गीतं भवितुमर्हति। अतः कवयः स्वकाव्येषु निर्दिष्टस्यापि अखिलस्यादरपूर्वकं समावेशं लोकहितवशाद् विदधीरन्। न मानवस्य जीवनं किमपि तत्त्वमवजानाति, प्रत्युत् सर्वाण्यपि तत्त्वानि प्रत्युद्गच्छति। रसनप्रक्रियायां नैतद्विधं किमपि यद् रसरूपतां न प्रतिपद्यते। अतः कवयस्तत्तत्समावेशने सर्वथैव सावधाना भवेयुः। रसास्वादनेऽवश्यमेव तानि तत्त्वानि दीप्तिं जनयितुं क्षमाणि सन्ति।

काव्यप्रकाशकार आचार्यमम्मटो रसस्य विश्लेषणं हृद्यं विशदं च विदधद् अवाप्यते—

**"लोके प्रमदादिभिः स्थाय्यनुमानेऽभ्यासपाटवतां काव्ये नाट्ये च तैरेव कारणत्वादिपरिहारेण विभावनादिव्यापारवत्वादलौकिकविभावादिशब्दव्यवहार्यैर्ममैवैते शत्रोरेवैते तटस्थस्यैवैते न ममैवैते न शत्रोरेवैते न तटस्थस्यैवेते इति सम्बन्धविशेषस्वीकारपरिहारनियमानध्यवसायात् साधारण्येन प्रतीतैरभिव्यक्तः सामाजिकानां वासनात्मकतया स्थितः स्थायी रत्यादिको नियतप्रमातृगतत्वेन स्थितोऽपि साधारणोपायबलात् तत्कालविगलितपरिमितप्रमातृभाववशोन्मिषितवेद्यान्तरसम्पर्कशून्यापरिमितभावेन प्रमात्रा सकलहृदयसंवादभाजा साधारण्येन स्वाकार इवाभिन्नोऽपि गोचरीकृतश्चर्व्यमाणतैकप्राणो विभावादिजीवितावधिः पानकरसन्यायेन चर्व्यमाणः पुर इव परिस्फुरन् हृदयमिव प्रविशन् सर्वाङ्गीणमिवालिङ्गन् अन्यत् सर्वमिव तिरोदधत् ब्रह्मास्वादमिवानुभावयन् अलौकिकचमत्कारकारी शृङ्गारादिको रसः।** (४, पृ० ९६)

साहित्यशास्त्रस्येतिहासाद् ज्ञाततां गच्छतीदं यत्प्रारम्भादेव विचारवतां विपश्चितां विचारपथेऽयं रसोऽधिरूढो बभूव। रसाभिधं तत्त्वं कविरचनायां पुष्पे सौरभमिव, शर्करायां माधुर्यमिव, सतां व्यवहारे श्रेयोभावनेव, चन्द्रमसि

चन्द्रिकेव, तेजसि आलोक इव, अम्भसि शैत्यमिव, आकाशे विस्तृतनीलिमनीले शब्द इव, समीरे च प्राणप्रद शक्तिरिव समुदं रमते। सोऽधिमानसं मानवस्यानिर्वचनीयानन्देन परामेव कामपि प्रीतिं सृजतीत्येतत्तु सृष्ट्यारम्भानेहस एवान्वभूत् परमनुभूतिकर्तारस्तस्यानन्दस्य समुचितं नाम किं स्यादित्यत्र निर्णयं निश्चयं वा विधातुं न क्षमा बभूवुः।

काव्ये कोऽस्ति सार इत्येतस्य तथ्यस्य विचिकित्सायां केचिदाचार्या अलङ्कारान्, केचिद् रसम्, केचिद् ध्वनिं, केचिद् भणितिभङ्गिविशेषं, केचिच्च रीतिं सर्वोपजीव्यं तत्त्वमङ्गीकुर्वतेस्म। साहित्यशास्त्रेतिहासो निर्दिष्टस्य विवरणस्य समुपस्थापनात् प्राक् अस्माकं पुरो मुनिं भरतमुपश्लोकयति[1] । स मुनिः-'**विभावानुभावसञ्चारिसंयोगाद्रसनिष्पत्तिः**' इत्येतेन सूत्रेण रससम्बन्धिनीं यां सामग्रीं प्रास्तावीत् सा साहित्यानुरागिणः पर्यतूतुषत्। भामह-दण्डि-रुद्रटोद्भटप्रभृतयोऽलङ्कारवादिनो भवन्तोऽपि रसात् स्वां दृष्टिं स्रंसयन्तो न प्राप्यन्ते। अनेनैव प्रकारेण रीतिवादी वामनो वक्रोक्तिवादी कुन्तको ध्वनिवादी च आचार्य आनन्दवर्धनस्तत्र रसे स्वकीयां श्रद्धां प्रकटीकुर्वन्तः प्रेक्ष्यन्ते।

रसानुभूतिकाले दृष्टद्रष्टव्यस्य योगिनः स्थितिमिव सहृदयः परिगृह्णाति स तदनुभवानेहसि किं वा तदास्वादनसमये कोऽहं क्वाहमित्येतदपि सर्वं विस्मरति। अतस्तत्त्वज्ञा रसस्य सद्भावादेव काचित् कृतिः कवेः काव्यमिति संज्ञामधियातुं शक्नुते इत्येतं निश्चयं हि अयासिषुः। ते स्वरचिते काव्यलक्षणे रसं प्राधान्येन सन्निवेशयन्तिस्म। तत्र आचार्यमम्मटः काव्यस्य लक्षणमिदं प्रस्तवीति—

**तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि'।**

पण्डितराजजगन्नाथः किं नाम काव्यमित्यत्र ब्रूते—

**'रमणीयार्थप्रतिपादकः शब्दः काव्यम्'**

आचार्य विश्वनाथोऽत्र शंसति—

**'वाक्यं रसात्मकं काव्यम्'**

एतेषां काव्यलक्षणानां अन्यैः प्राचीनैराचार्यैः किं वा विद्वद्भिर्निरूपितानां काव्यलक्षणानां वा व्याख्या अधःस्थितेषु शब्देषु प्रस्तूयते—

(१) काव्ये सुन्दरमनोरञ्जनकारिणो भावा भवेयुः।

---

१. "मुनिना भरतेन यः प्रयोगो भवतीष्वष्टरसाश्रयो नियुक्तः" (विक्रमोर्वशीयम् २/२७)

(२) सुव्यवस्थितायां काव्योचितायां भाषायां वैचित्र्येण चमत्कारचारुरीत्या च भावानामभिव्यञ्जनं स्यात् ।

(३) पदावली मधुरा मृदुला हृद्या च भवेत् ।

(४) मञ्जुलानां हि शब्दानां यच्चयनं स्यात् तत्र सर्वविधतया स्पष्टता, सार्थकता, स्वाभाविकता, सुबोधकारिता चापेक्ष्यन्ते ।

(५) कल्पनायां हृदयावर्जनशीलता, मनःपवित्रीकरणपटुता, चित्रोपमता च स्युः ।

(६) स्वाभाविकतयैव सह मानसिकभावानां मनोवृत्तीनां च व्यापकं यथार्थं पेशलं च चित्रणं भवेत् ।

(७) मानवजीवनस्य किं वा तदीयानां व्यापाराणां विशदया व्यञ्जनयैव साकं युगपदेव गूढगम्भीरोदग्रविचाराणामपि सामञ्जस्यं स्यात् ।

(८) वर्णनं स्याद् वरेण्यं बन्धुरक्रमयुक्तं सजीवमूर्त्तम् ।

(९) मधुरसङ्गीतात्मकच्छन्दश्छटाच्छुरितता विद्योतेत ।

कलासु काव्यकलायाः सर्वोत्तमत्वात् तामधिकृत्य **'कलासीमा काव्यम'** इत्येषा भणितिः सुविदितास्ति सर्वेषामपि साहित्यसेविनाम् । वस्तुन आभ्यन्तरमभिव्यञ्जनं कलेति विद्वद्धौरेयो बैडलेमहाभागो मनुते । वस्तुन आकारे परिणमनेन, आकारस्य संगठनेन, एकसूत्रतायाञ्च तदानयनेन वस्तुगतं हि सौन्दर्यं प्रत्यक्षं भवति । काव्ये विशिष्टतैषा दृष्टा भवति ।

यामाकर्ण्य यां पर्यवलोक्य वा मनः स्वेच्छयात्मानं प्रीतिपूर्वकं जुहोति सास्ति कला । कलायाः कार्यमस्ति रसस्योद्भावनम् । स्वयं रसो वस्तुतोऽद्भुतानुभूतिः ।

प्रतीच्या प्राच्या च परम्परा ज्ञापयति यद् रसस्य विवेचनं परमपुरातनकालादेवारब्धमभूत् । प्लेटो तं भ्रान्तिमयं सुखमिति मन्यते । यतो हि तद्विचारेण कला सनातनसत्तायाः एका क्षीणा छायैव । एरिस्टोटलस्तु इयमनुकृतेरानन्द इति वदति । कलाकृतिं सः प्रकृतेः स्थायिनां रूपाणामनुकृतिरिति स्वीकुरुते । प्लेटो-अरस्तुदार्शनिकयोः सिद्धान्तमाधारीकृत्य रसस्य मीमांसा समजायत । नवयुगारम्भे नूतना आधारा अपि मार्जिता अभूवन् । रसस्य भारतीया मीमांसा व्यवस्थितरूपेण भरतादारब्धाजायत परं तन्मूलं बीजं वा वेदेषु वर्तते । वेद-रचयिता परमेश्वरः कविरिति वेदेषु प्रोक्तः ।

अतः वेदः स्वयं काव्यरूपं बिभर्ति । तत्र काव्यस्य सम्पूर्णं सौन्दर्य्यमुपलभ्यते । एतस्मादेव हेतोः काव्यसौन्दर्यनिरूपके साहित्यशास्त्रे काव्यसौन्दर्यस्याधायकानां येषां गुणरीतिध्वन्यलङ्कारादितत्त्वानां विवेचनं कृतमस्ति तानि सर्वाण्यपि मूलतत्त्वानि वेदेषु लब्धानि भवन्ति । तत्र माधुर्यौजःप्रसादादिगुणानामुदाहरणानि स्थानेष्वनेकेषु दृश्यन्ते । गुणाधार एव रीतीनां निर्धारणं भवति । अतः रीतिसम्बन्धिनामुदाहरणानामपि दर्शनं तत्र भवति । उपमारूपकाद्यलङ्काराणां तु वेदेषु प्राचुर्य्यमेव ।

**उत त्वः पश्यन् न ददर्श वाचं उत त्वः शृण्वन् न शृणोत्येनाम् ।**
**उतो त्वस्मै तन्वं विसस्रे जायेव पत्ये उषती सुवासाः ॥**

(ऋग्वेदे, १०-७१-४)

विरोधाभासस्य, उपमायाः, उत्प्रेक्षायाश्च कियन्मनोहरं सुन्दरञ्च उदाहरणमयं मन्त्रः ।

**द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।**
**तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति ॥**

अत्र मन्त्रेदर्शनस्य मौलिकतत्त्वानि तु प्रतिपादितान्येव परं साहित्यशास्त्रस्य दृष्ट्यापि परमसुन्दरमुदाहरणं वर्तते । काव्यस्य मनोहरभाषायां दार्शनिकतत्त्वस्येदृशं रमणीयं निरूपणं समग्रेऽपि साहित्ये क्वचिदेव लब्धं भवेत् । किञ्चैतस्मिन् मन्त्रे रूपक-विभावनानुप्रास विशेषोक्त्यलङ्काराः राजन्ते । 'सयुजा', 'सखाय' इत्येताभ्यां पदाभ्यां जीवात्मपरमात्मनो नित्यतायाः सच्चिद्रूपतायाश्चाभिव्यक्तिरपि जायते, अतस्ते पदे ध्वनिं द्योतयतस्तस्मान्मन्त्रो ध्वनेरपि मनोज्ञं निदर्शनम् । एतादृशः शतशो मन्त्राः श्रुतिषु प्राप्ताः भवन्ति येषु साहित्यशास्त्रस्य मूलतत्त्वानां समीचीनतया समावेशः सञ्जातोऽस्ति ।

अस्मद्राष्ट्रस्य चिन्तका रसं ब्रह्मास्वादसहोदरं मत्वा आध्यात्मिकरूपपर्यन्तं तं विधाय प्रदर्शयाञ्चक्रुः । तत्सुखस्य च तुलनां समाधिसुखेन सह अकार्षुः । रसस्य मनोविज्ञानदृष्ट्या या मीमांसा जाता सास्मद्देशस्यैव सम्पत् । भरतकृता संकल्पना एतस्या मीमांसायाः मूलस्रोतः । रसश्चित्तस्यैव रूपत्वेन मतोऽभूत् । तथाहि—रसश्चित्तविद्रुतिः, चित्तदीप्तिः, चित्तस्य विस्तारो वा । परं भारतीयरसमीमांसायाः सर्वोत्तमं रूपं तदस्ति यत्र कलात्मिकया दृष्ट्या रसो निरूपितोऽस्ति । आनन्दवर्धन एतस्य प्रथमो निरूपयिता । अस्मद्युगे शुद्धविज्ञानदृष्ट्यापि रसविवेचनस्योपक्रमः प्रवृत्तोऽस्ति ।

रसविवेचनस्य काठिन्यविशेषवशाद् भवेदिदमुचित यद् वयं प्राक्तनवादात् तद् रक्षेम ।

सौन्दर्यं रससञ्चारकं किं वा सौन्दर्यं रसस्याधिष्ठानम् ? सुन्दरं पदार्थं संस्पृश्य रसस्यानुभूतिर्घटते । एतस्या घटनाया प्राप्तव्योऽस्ति सचेतसो जनस्यात्मा । आत्मनो रूपस्यैव विवेचनेन परं रसस्वरूपनिरूपणं न भवितुमर्हति । एवमेव सुन्दरस्य द्रव्यस्य वैज्ञानिकं विश्लेषणं रसं प्रस्तवीतुं न शक्नोति । अध्यात्मतत्त्वम् 'अहम्' इत्येतस्य स्वरूपान्वेषणं विधास्यति । विज्ञानं च वस्तुनो विश्लेषणम् । उभयोरपि स्वकीयं महत्त्वम् । एतयोर्द्वयोरपि वर्त्तते स्वकीया मान्यता, स्वमर्यादा च । एते द्वेऽपि नास्मान् पूर्णमौलिकासन्दिग्धतथ्थं तन्नयेते यदस्मदीयां सहजरसचेतनां रसानुभूतित्वेन विनायासं परिगृह्णाति ।

अस्मदीयाया रसचेतनायाः साधारणो व्यापारो 'रसास्वादनम्' इति नाम्ना प्रथते । तल्लब्धेश्च नामास्ति 'रस' इति ।

रसमुद्दिश्य मुनिर्भरतो यां कारिकां लिलेख तस्या व्याख्यां याम् आचार्यभट्टलोल्लटशङ्कुकप्रभृतयश्चक्रुः सात्र समासेन प्रस्तूयते ।

**भट्टलोल्लटः**

विभावानुभावादिसंयोगादनुकार्ये रामादौ रस उत्पद्यते । अनुभावास्तमुत्पन्नरसं बोधयन्ति व्यभिचारिभावास्त परिपोषयन्ति । अतः स्थायिभावेन सह विभावानामुत्पाद्योत्पादकभावसम्बन्धः, अनुभावानां तैः सह गम्यगमकभावसम्बन्धो, व्यभिचारिणां तैः सह पोष्यपोषकभावसम्बन्धो भवति । 'संयोग' इत्येतस्य शब्दस्यातस्त्रयोऽर्थाः इमे—उत्पाद्योत्पादकभावसम्बन्धः, गम्यगमकभावसम्बन्धो, व्यभिचारिणां तैः सह पोष्यपोषकभावसम्बन्धो भवति । 'संयोग' इत्येतस्य शब्दस्यातस्त्रयोऽर्थाः इमे—उत्पाद्योत्पादकभावसम्बन्धः, गम्यगमकभावसम्बन्धः, पोष्यपोषकभावसम्बन्धश्च ।

भट्टलोल्लटकृतेयं व्याख्या मीमांसासिद्धान्तमूलकेति व्याह्रियते ।

**शङ्कुकः**

अनुमानेन तटस्थो रसोऽनुमेयो भवति । चित्रतुरगन्यायेन नटे रामादिविषयिणी धीरुत्पद्यते । चित्रिते तुरङ्गे यथा 'तुरङ्गोऽयम्' इत्येष व्यवहारो भवति परं न सा प्रतीतिः सत्यत्वेन वा असत्यत्वेन वक्तुं शक्यास्ति । न सा अनृता, न च सन्देहरूपा, न च सा सादृश्यरूपैव । तदेवं चित्रस्थेऽश्वे जाता सा

धी: प्रोक्तचतुर्विधधीतो भिन्नैव। अनेनैव प्रकारेण नटे समुत्पन्ना रामादि-सम्बन्धिनी बुद्धिः सम्यङ्मिथ्यासंशयसादृश्यविधाभ्यश्चतसृभ्योऽपि प्रतीतिभ्यो विलक्षणैव।

चित्रतुरगन्यायेन विभावभूतानां रामादिकानां प्रतीतिरनुमिता भवति ततो रसोऽनुमेयतामुपैति। किञ्च यैरनुभावव्यभिचारिभावरूपलिङ्गैस्तत्र 'इयं सीता रामविषयकरतिमती, तत्र विलक्षणस्मितकटाक्षादिमत्त्वात्' इत्येतद्विध-मनुमानमुदेति, परं तानि लिङ्गान्यपि न सन्ति यथार्थानि। यथार्थस्मित-कटाक्षाद्यनुभावास्तु यथार्थरामादावेव सम्भवाः परं नटे स्मितकटाक्षादिकं वीक्ष्य 'इयमभिनेत्री सीता रामविषयकरतिमती' वा रामेऽयमभिनेता सीता-विषयकरतिमांस्तत्र स्तम्भस्वेदाद्यनुभावदर्शनात् इत्येतादृशस्यानुमानिकरसस्य प्रतीतिर्नटे सञ्जायते। एतेन भरतसूत्रस्थस्य संयोगस्यार्थो गम्यगमकभाव-सम्बन्ध इत्येतत् सिद्ध्यति। अनुमेयस्य रसस्याप्याधारः सामाजिको न, कृत्रिमरामादिवर्तिरसः सामाजिकेनानुमीयते। अनुमानादिजन्यं ज्ञानं परोक्ष-रूपमेव भवति। अपरोक्षप्रतीत्याः कारणं तु प्रत्यक्षनाम प्रमाणं भवति। परमियं रसानुमितिस्तु विलक्षणैव। अतः सा भवन्त्यपि अनुमितिरनुमित्यन्तराद् भिन्नेव। भवति च सा अपरोक्षस्वरूपा। एतस्माद्धेतोस्तमनुमितं रसं सामा-जिक आस्वादयितुं क्षमते।

रसास्वादसम्बन्धिनीं तां क्षमतां सामाजिके, तद्गता (सामाजिकगता) वासना समुत्पादयति। रसप्रतीत्या च विलक्षणायाः अपरोक्षतायाः कल्पना विभाव्या। वस्तुतोऽनुमितो रसः सामाजिके न सन्तिष्ठते, न च कृत्रिमे रामादौ परं वासनाया बलात् सामाजिके विद्यमानो नटेऽप्यविद्यमानः सोऽनुमीयमानो रसः सामाजिकेनास्वाद्यते।

शङ्कुकस्यास्त्ययमुपरिस्थितो विचारः। तस्यायमनुमितिवादो न्याय-सिद्धान्तनिष्ठः।

**भट्टनायकः**

अस्त्याचार्यो भट्टनायको भुक्तिवादी। तन्मतस्याशयोऽयम्—रसस्य निष्पत्तिर्नानुकार्ये रामादौ भवति, न चानुकर्तरि नटे। तौ तु द्वावपि तटस्थौ। न तु तौ रसमनुभवतः, वस्तुतो रसमनुभवति सामाजिकः।

आचार्यमम्मटपादानां शब्देषु तदीयः सिद्धान्तः प्रस्तूयते—

**'न ताटस्थ्येन नात्मगतत्वेन रसः प्रतीयते, नोत्पद्यते, नाभिव्यज्यते अपितु काव्ये नाट्ये चाभिधातोद्वितीयेन विभावादिसाधारणीकरणात्मना भावकत्व-**

**व्यापारेण भाव्यमानः स्थायी, सत्त्वोद्रेकप्रकाशानन्दमयसंविद्विश्रान्तिसतत्वेन भोगेन भुज्यते' इति ।**

भट्टनायकस्यायं भुक्तिवादः सांख्यसिद्धान्तश्रितः ।

सुखदुःखादिका वस्तुतोऽन्तःकरणस्य धर्माः न चात्मनः, परं पुरुषांतः-करणसम्बद्धत्वात् तेषाम्, पुरुषे तेषां (सुखदुःखादीनाम्) प्रतीतिरौपाधिकी भवति, एवमेव रसः परमार्थतः सामाजिके, न स तूपभुनक्ति तम् । एतद्विध-सादृश्यस्येह दर्शनात् सिद्धान्तो भट्टनायकस्य सांख्यसिद्धान्तपरको मतो भवति ।

**अभिनवगुप्तः**

भरतसूत्रस्य चतुर्थः सर्वप्रमुखो व्याख्याकारोऽस्ति आचार्योऽभिनवगुप्तः । अस्त्ययम् अभिव्यक्तिवादी । अभिव्यक्तिवाद आचार्यानन्दवर्धनध्वनिवादिनः सिद्धान्तमालम्बते । सः प्रकृतप्रसङ्गे ब्रवीति···

सामाजिकगतः स्थायिभाव एव रसानुभूतेर्निमित्तम् वासनां वा संस्कारे गतो रतिशोकादिस्थायिभावः सामाजिकस्यात्मानमधितिष्ठति । सः साधारणी-कृतत्वेननोपस्थितविभावादिसामग्र्याभिव्यक्तो भवति तन्मयीभावत्वाद् वेद्या-न्तरसम्पर्कशून्यब्रह्मानन्दस्वादसंकाशोऽनुभूयते सः ।

उद्भावितात्मस्वरूपो भूत्वा रसोऽवतरतीत्येतद् ज्ञापयति आचार्योऽभिनव-गुप्तः । स रसोत्पत्तिमुद्दिश्य सविस्तरं विमृश्य भट्टलोल्लटादीनां मतानि सम्य-गालोच्य स्वसिद्धान्तं स्थापयाम्बभूव । तदीयस्याखिलविवेचनस्य केन्द्रबिन्दुरस्ति सामाजिकस्य रसानुभूतिः । अस्मिन्नेव निकषे सः परमतानि समीक्षमाणो दृश्यते ।

भट्टलोल्लटः स्वमते सामाजिकस्य रसानुभूतौ न चर्चां कामपि कुर्वाणः प्राप्यते । अतोऽनुपादेयतायाः प्रत्याख्यानाख्यानर्हतायाश्च दृष्ट्या तत्र सर्वप्रथमं विचारो विहितोऽस्ति । शङ्कुकस्य मतमपि नोपादेयं तस्यानुमितिरूपत्वात्, तत्र साक्षात्कारात्मकत्वस्याभावो वर्तते । तदीयमतमिदं द्वितीयस्मिन् स्थाने स्थापितं कृतमस्ति । भट्टनायकस्य मते रसानुभूतिं सामाजिककृतसाक्षात्कारा-त्मकानुभवरूपत्वेन प्रस्तुतीकर्तुं यत्नोऽनुष्ठितोऽस्ति, किञ्च तत्र भावकत्व-भोजकत्वव्यापारयोर्द्वयोः कल्पनापि विधीयते, तयोरप्रामाणिकत्वात् तन्निरा-करणं कृत्वा अभिनवगुप्तपादाः अभिव्यक्तिवादं संस्थाप्य, तद्द्वारेण रसस्य स्वरूपं समीचीनतया दर्शयन्त उपलभ्यन्ते ।

तदेवं रससम्बन्धिनीं चर्चां साधारणरीत्यैव न, गम्भीरतया प्रौढतया विस्तृततया च पुरा प्राञ्चश्चक्रिरे। तदा ते रसभेदान् निरूपयन्तः करुणादि-रसानां सुखात्मकत्वेन, रौद्रवीररसयोर्विशिष्टत्वेन, शृंगारस्य रसराजत्वेन, शान्तस्य रसत्वेनाभ्युपगमनं कृतं स्यादथवा न इत्यत्र च विषये, भक्ती रसो वा भाव एवेत्येतस्मिन् प्रश्ने, रससंख्याया निर्धारणायां, के च रसाः परस्पर-विरोधिनोऽविरोधिनो वा इत्येतस्मिश्च विषये विचारान् भृशगम्भीरतया प्रावर्तयन्।

मर्म्मज्ञानामाचार्याणां टीकाकाराणाञ्च तत्त्वोन्मेषणकारिविश्लेषणेन रसो गच्छतानेहसा महनीयतमत्वेन श्रेष्ठत्वेन चावागम्यत।

प्रत्नेऽनेहसि रसस्य महनीयतमत्वं श्रेष्ठत्वं च निर्धारितमभूदित्येतद् आधु-निकाः साहित्यसेविनोऽपि मनोयोगपूर्वकमधीत्य तत्र स्वयमभिरुचिपूर्वकं विचारितवन्तः। ततश्च तेषां निश्चयोऽयमभवद् यद् रसोऽस्ति दीप्यमानानु-भूतिः। तत्र सर्वात्मना सहृदयो मिलति। रसास्वादनेऽस्मदीय आत्मा व्यक्तित्वस्य आकस्मिकपरिस्थितिजन्यदुश्छेद्यबन्धनादुन्मुक्तमात्मानमनुभवति। अस्मादेव कारणाद् रसानुभूतिर्ब्रह्मानन्दानुभूतिरिव वा स्त्रीपुरुषकृतसान्द्राश्लेष-सुखमिव मतास्ति। तदा रसानुभूत्यां हृदयग्रन्थयो भिद्यन्ते, सर्वेऽपि तदानीं मानसिकाः क्षोभा विलीयन्ते। विचारवन्तः स्वविचारांस्तत्रोन्मीलयन्तस्तांस्तान् अग्रे च तेऽदीदृशन्—

अत्र रसज्ञस्य-अनुभवितुः—स्वरूपस्थितेस्तदनुभूतेश्च विवेचनं कर्त्तव्यम्। अनुभवितुः स्वरूपस्यावगाहनेनैव नात्राभीष्टसिद्धिस्तदर्थं त्वनुभवितुर्दृष्ट्या तदीयाया अनुभूतेः स्वरूपस्य च निश्चयनं वाञ्छितमस्ति। अनुभूत्यामेतस्यां वस्तुसौन्दर्यमपि निषीदति। वस्तुतः कथनमेतत् उचिततरं स्याद् यत् सौन्दर्यानुभूतिः, सुन्दरवस्तुबोधः, तल्लयः, गतितुलना, साम्यसम्बन्धिनो गुणा रसस्य कार्यं परिपुष्णन्ति। एतदर्थमाध्यात्मिकतादृष्ट्या विवेचनमेव न पर्याप्तम्। रसानुभविता स्वरसानुभूतेः आद्यः साक्षी। अतस्तद्दृष्ट्या रसस्य मीमांसा युक्ता स्यात्।

रसानुभूतिः पूर्णां सुपुष्टाञ्चावस्थां प्राप्य वाणीबलसम्पन्नेव जायते। अतोऽनुभविता रसमीमांसायाञ्च प्रवर्तते। मीमांसक एकतः कलासृष्टिनिष्ठ-सौन्दर्यस्य प्रत्यङ्गमवगाहते, एकतश्च सौन्दर्यस्य प्रभावं सोऽवलोकयति। सः (प्रभावः) मनसो बुद्धेश्चित्तस्य चेतनायाः शरीरस्य भागे भागे—मधुरवेदनात्वेन

रसानुभवितरि संलक्ष्यते। मीमांसकस्य मनसोऽयमुभयवाहिप्रवाहो भवति रुचिरः। नयने वस्तुनः स्वरूपे निमज्जत उन्मज्जतश्च। कदाप्यङ्गिगतोऽङ्गानि प्रति, कदाप्यङ्गेभ्योऽङ्गिनो दिशि, कदाप्यङ्गानां सौकुमार्यं, कदापि तु विन्यासस्य पूर्णता, कदापि हि सन्तुलितगतेरुन्मेषो यदि, तदा कदापि साम्यावबोधः समुल्लसति।

भावोऽयमेकतो नेत्रे रूपनिधिमादाय आभ्यन्तरे प्रदेशेऽवगाहते त्वन्यतो हि-सहृदयमीमांसकस्तप्रभावान् स्वव्यक्तित्वस्य विशालेऽन्तरालेऽन्तर्गामिन्या दृष्ट्या निभालयति। स ततो रसस्य मधुरामनुभूतिं वचोभिर्व्यक्तीकर्तुं प्रक्रमते।

रसस्य प्रकृतिर्नियमानां व्यवस्था नास्ति। नियमव्यवस्थायाः ज्ञानं रसं तु न रसाभासं समुपस्थापयितुं शक्नुते, न च रसं किं वा रसानुभूतिम्। नियमः सामान्यः, स बुद्धिग्राह्यः। रसानुभूतिः असामान्या, सा सर्वात्मना भवति ग्राह्या। रसो वा तदनुभूतिर्न पृथक् पृथक्। रसानुभूतेः पोषणं बुद्धिमनःस्मृतिकल्पनाचित्ताहंभावभावनाः किञ्चैतासामाश्रयभूता चेतना च कुर्वन्ति। अनेकानि स्रोतांसि यथा निर्झरं, तथैवोक्तानि तत्त्वानि रसं सृजन्ति। अनुभूत्यां सुन्दरस्य वस्तुनः साक्षात्कारो जायते। न रसानुभूतेः प्रत्यक्ष-संस्पर्शनतत्त्वानि पृथक् कर्तुं शक्यन्ते।

प्रतीच्यां प्राच्यामपि एतादृशोऽनेके विज्ञाः सन्ति ये रसानुभूतिं सुषुप्तितः स्वप्नतश्च भिन्नां न मन्यन्ते। तेषां मान्यतेयमेकान्ततो न निराधारा, परं सा ताभ्यां भिन्ना। रसानुभूत्यां स्वप्नस्य सन्ति तत्त्वानि परं तानि स्वप्न-भूतानि न, तत्र तु चेतनास्ति जागृतावस्था च वर्तते। रसानुभूत्यां कल्पनातः प्राप्ता मानसप्रतिमाः केवलं न, अपि तु तत्रेन्द्रियसंस्पर्शजनितानेकगोचर-तत्त्वानां प्रत्यक्षप्रतीतिरपि सन्तिष्ठते। रसानुभवो जागृतप्रत्यक्षोऽनुभव एव न, तदुदयस्तु चेतनाया बह्वीषु भूमिषु भवति। एवमेव रसानुभूतिः सुषुप्तितो भिन्ना। सुषुप्तिश्चेतनाया आवृतावस्थास्ति। सा रिक्तशून्यव्यवहारज्ञानयोर-पेक्षास्तेऽतो निर्मुक्ता च वर्तते। सा चेतनानन्दयुक्ता। सुषुप्तिर्वा स्वप्न स्तमिस्रास्ति रसानुभूतिस्तु चन्द्रज्योत्स्नाविभ्राजिता रजनी। रसानुभूति-रज्ञेयायाः अनिर्वचनीयाया शक्तेः स्पन्दनमिव।

मनोविज्ञानं रसमर्म्मावगन्तुं यतमानमवेक्ष्यते। तद्बोधतत्त्वं विनिवार्य भावनामुद्रेकं रसमवगच्छति। परमिदमपि न पूर्णतया युक्तम्। रसस्यानु-भूत्यां बुद्धेरालोको भावानाञ्चोद्रेकः प्रतीयेते।

अध्यात्मवादिनो रसविवेचनायां चित्तस्य वा चितेर्दशाः स्वीकुर्वन्ति। परमिदमपि सत्यं यद् रसः श्रद्धाध्यात्मिकी अनुभूतिरपि न, तत्र इन्द्रियसंस्पर्शज-शरीरज-मनोबुद्ध्युत्पन्न-तत्त्वानि अपि निवसन्ति। तत्र सुन्दरतायाः साक्षात्कारो भवति, अतः केवलाध्यात्मिकदृष्ट्या रसविवेचनं नोपादेयं भवितुमर्हति। वस्तुतो रसस्य कलादृष्ट्यापि विचारो भवितुं शक्यः।

रसानुभूतिः कालदिक्कारणविशेषपरिस्थितिष्वपि घटिता भवितुं वा व्याप्तिं परिगृह्य प्रकटीभवितुं क्षमते। स्वसत्तायाः अंशेनान्यतमेन सहृदयो रसं न गृह्णाति, अपितु सर्वात्मना तमात्मसात् सः कुरुते। एतादृशतैव तन्मयतेति कथ्यते। एतस्यां तन्मयतायां वपुर्मनोऽसुबुद्धिचित्तात्मभ्यश्च स्रोतांस्यनेकानि उद्भूय समाविष्टानि भवन्ति। तानि च स्वसारभूतनिस्यन्दं तत्र पातयन्ति। एतेन रसस्यानुभवो विपुलो गम्भीरश्च भूत्वा समुदेति। रसोऽस्ति वस्तुत आत्मनो निर्गतिः। मनोबुद्धिचित्ताहङ्कारभावकल्पनाविमर्शस्मृत्यादि-सकाशान्निस्यन्दं परिगृह्य स इन्द्रियाणि यावदासादितो भवति। तद्दशायां सः प्रत्यक्षतां याति।

विज्ञानपद्धतिर्वस्तूनि विश्लेषयति। सा वस्तुनो मानं, स्वरूपं, गुणान्, व्यापारञ्च निरीक्षते। तेन सा तत्तद्विषयकं ज्ञानमुपार्जयति, तुलनां च विधाय वर्गाणां मार्गणं विदधती घटनानां कार्यकारणयोः क्रमं स्थापयन्ती सम्बन्धान्तरं गवेषयति। तस्य प्रयोजनमस्ति बुद्धिगम्यायाः व्यवस्थाया समुत्पादनम्। एतद् व्यवस्थितं व्यवस्थाकारि ज्ञानं विज्ञानमिति कथ्यते। विज्ञानस्य क्षेत्रमस्ति व्यापक विशालतरं च। मनोविश्लेषणासिद्धान्तो विज्ञानस्यैवान्यतममङ्गम्। अत्र सिद्धान्तस्यास्य दृष्ट्या विचारः क्रियते।

कलां तदीयामनुभूतिं चावगन्तुं योऽन्यश्च प्रयत्नः कृतोऽभूत् सोऽस्ति मनोविश्लेषणसिद्धान्तो वा विज्ञानम्।

विश्वविख्यातो मनोविज्ञानवेत्ता सिगमण्डफ्रायडः स्थापनामिमां कुरुते यदस्मदीयं चेतनमनोऽस्ति परिमितम्। परं तदाधारोऽथ च स्रोतोऽस्त्यचेतनमनो यदस्त्यपरिमितम्। तदपरिचितं सदपि, अस्मदज्ञाततायामेव, अस्मदीयान् व्यवहारविचारक्रियाकलापान् नियन्त्रयति वा शास्ति। अग्रे स ब्रूते 'जीवनस्य मूलप्रवृत्तिर्बाह्यसंसारेण सह संघर्षं कृत्वा आनन्दमधिगच्छति। जगति यो हि मनुष्यकृतो वैभवात्मकनिधिर्दृश्यते स जीवनस्य मूलप्रवृत्तितो निर्गतोऽस्ति।

फ्रायडवादेन यन्महत्कार्यमनुष्ठितं तदस्त्यचेतनासीमजीवनप्रवृत्त्या सह

कलायाः संयोजनम् । चेतनास्ति सीमिता, कलाकृतिरपि वर्तते सीमिता। यथा रागो मूर्तिश्चित्रं कविता च। परं यथा परिमितायाश्चेतनाया मूलेऽपरिमिताचेतनसमुद्रस्तरङ्गांस्तरलीकरोति तथैव कलाकृतेरधस्तात् अनन्तर्जीवनस्योर्मिलप्रवृत्तयो वहन्ति। कृतिस्तु प्रतीकत्वाय कल्पते। कृतिर्नास्ति कस्यापि बाह्यवस्तुनोऽनुकृतिः। बाह्येन सह तस्य सम्बन्धोऽपि न। कृतेराकारप्रकारेण तस्याः सीमाया मापनं नोचितम्। सा तु जीवनानन्तसिन्धुं यावत् यशस्करस्य गमनस्यामोघं साधनमेव। कृतिसौन्दर्यसामर्थ्येन चेतनाया अचेतनदिशाम्प्रति निवर्तनमेव रसास्वादोऽस्ति।

फ्रायडस्तदीयाः शिष्याश्च एतां मान्यतां विशिष्टां कृत्वोपस्थापितवन्तः। फ्रायडोऽत्र ब्रूते स्वकीये 'लियोनार्डो दविची' नामकग्रन्थे—

अचेतनमनसो गम्भीरास्तरङ्गाः, कलाकारस्य प्रतिभायाः कौशलेन बाह्यकृतेः रूपं गृह्णन्ति। न तत्र कलाकारोऽपि भवत्यभिज्ञः। प्रेक्षकास्तां कृतिं वीक्ष्य विस्मयं प्रकटीकुर्वन्ति परं न कलाकारो न च प्रेक्षक एव तदुद्गममवगन्तुं क्षमो जायते।

प्रौढतां परिपाकं चादाय वयमचेतनाद् दूरदूरतरस्था भवामः। परं शैशवशीतलच्छायायां वयं तत्सविधे उषित्वा तदुपयुञ्ज्मः। यतो हि शिशोरनियन्त्रितस्वच्छन्दनिर्बाधबोधजीवनं त्वचेतनस्य साक्षात् प्रतिरूपं भवति। संस्कृतेः सभ्यतायाश्च नियमाः, धर्मस्य नीतेश्च मर्यादाश्चेतनां निबध्नन्ति। तेन हि परिपक्वः प्रौढः (जनः) स्वमूलस्वरूपाद् दूरे जायते। कलाकारः स्वयम् अनन्तमचेतनं यावद् गन्तुं शिशुरेव भूत्वा जीवति। लियोनार्डो द विची पञ्चदशे शतके इटल्यां महांश्चित्रकारो बभूव। स आजीवनं शिशुरेवादृश्यत। महापुरुषो विना बालकत्वं महान् न भवितुमर्हति। यतो हि प्रौढजीवनस्यापेक्षितव्यताः नियमैर्जीवनमुद्ग्रथितं विधाय तं (मानवम्) तदीयान्मूलस्वरूपाद् दूरे नयन्ति।

फ्रायडो रसं शैशवस्यानुभूतिमिव मन्यते। कला शिशुनेत्रपरिवीक्षितस्य संसारस्य चित्रं प्रौढाय प्रौढस्य कौशलेन प्रस्तवीति। रसास्वादनक्रिया प्रौढं शिशुतायां परिणमयति। आनन्दस्य स्वच्छन्दो मर्यादित उपभोगः, कल्पनाया निर्बाधमुत्पतनं च रसास्वादनस्य लक्षणमस्ति। फ्रायड इदं च मन्यते यच्छिशुतामूलकत्वात् अस्मत्परिपक्वजीवनार्थं कलाया मूल्यं सन्देहास्पदम्।

फ्रायडानन्तरं तद्विचारान् परिगृह्य तत्प्रतिक्रियायै द्वे चान्ये धारे प्रकटी-

बभूवतुः। फ्रायडस्याचेतने नवां मीमांसां यश्चकार सोऽस्ति जर्मनविचारको युंगः। तन्मतेन 'अचेतनम्' जीवनस्य मूलप्रवृत्तिरवश्यमस्ति, परं सा कृतदमनस्य कामस्य किं वा आनन्दस्य, इच्छानां वा शैशवस्यानुभूतीनां रसं प्रस्तुतीकरोति। अचेतनं जीवनस्य स्रोतः, जीवनस्य सम्पूर्णोऽप्याह्लादो विषादश्च तत एव आविर्भवतः तत्रैव मृत्युरपि वर्तते शान्तिस्वरूपत्वात् तस्य, वाञ्छनीयतास्ति तस्य। अचेतनमस्मदीयाध्यात्माधिमानसाधिभूतानां मूलमपि विद्यते। सृष्टिः प्रलयश्च, जीवनं मृत्युश्च, हर्षो विषादश्च तत एवोद्भूय तत्रैव लीयन्ते। कला एतस्यैवाचेतनस्य द्रष्टव्यस्वरूपं वर्तते, तत् प्राप्य रसिको बलं प्रेरणां च लभते। रसास्वादनसम्बन्धिनी क्रिया कलाकृतिविषयकगुणैः सहृदयं तदीयचेतनाया मूलं यावत् कृषति। तत्र गत्वा सा समृद्धा भवति। वस्तुतो युंगस्य विचाराः कलां कलिलतातो गोपायाञ्चक्रुः। सः (युंगः) तत्स्वरूपं नितरामाध्यात्मिकं विदधौ।

फ्रायडस्तदनुयायिनश्च अचेतनस्य समीपतमाऽनुभवं शैशवात् प्राप्नुवते वा स्वप्नस्य स्वच्छन्दाभ्यः कल्पनाभ्यः—इमां मान्यतामाश्रित्य बहवो विचारवन्तः कलां स्वप्नसहोदरत्वेन कलानुभूतिं च स्वप्नत्वेन अमंसत। शालं बोदुवाँ वदति 'वर्तमानमनोविज्ञानं कलाकृतिः काव्यं तु विशेषतो दिवास्वप्नवत्—स्वप्न इव—वर्तत' इति यथा स्वप्ने तथैव कलाकृतौ अनेकानि तत्त्वानि एकस्थानि भूत्वा धनीभूतानि जायन्ते, तत्र कारणमस्ति भावनायाः साम्यं वा सामञ्जस्यम्। भावनाविषयकसामञ्जस्याभावः कलापरिपाकस्य परिपन्थी।

एण्टन एरंजवेगेन मनोविज्ञानविश्लेषणविज्ञानेन कलामीमांसापरक आधुनिकतमो विचारः प्रस्तुतीकृतः। तद्विचारनिष्कर्षोऽयम्—

दर्शनं श्रवणं च कलानुभूतेः प्रमुखं द्वारद्वयम्। अन्येषामिन्द्रियाणामनुभवश्च स्पर्शघ्राणादिषु वितनुतायाः बोधः—सुन्दरस्य वस्तुनो विलोकने श्रवणे च तस्य, अस्मासु प्रभावं क्षिपतः। परं दर्शनश्रवणे मुख्यतया कलाकृतेः सौन्दर्यं ग्रहीतुं वर्तेतेऽनन्योपादाने। एनयोरेवोभयोः क्रिययोरद्य वैज्ञानिकं मनोविज्ञानसिद्धान्तीयञ्चाध्ययनं प्रवर्तेते। तत् कलायाः सम्पूर्णां रसमीमांसामुत्क्षिपदवलोक्यते। मनोविज्ञानवित् कलाकारं किमपि बोधयामास इत्येतत्तु न, परं कलाकारादेव मनोविज्ञानशास्त्री किमपि ज्ञातव्यं ज्ञातवान्। आधुनिके चित्रण संगीते च येषां हि बौद्धिकानां तत्त्वानां सन्निवेशः सञ्जातोऽस्ति तेभ्योऽस्मदीयेष्वाभ्यन्तरेषु गाम्भीर्येषु घटमानानां क्रियाणां बोधो भवति। इदं कलाकार

एवानुष्ठितवान् । मनोविज्ञानवित् तस्मादवगम्यैतेषां तत्त्वानां वैज्ञानिकमध्ययनं विदधौ । अस्तु ।

कला अस्ति सौन्दर्यम्, आनन्दस्तस्या असुत्वाय कल्पते । आत्मा च तस्याः रसः सुविदितः कलातत्त्वज्ञो हरवर्टरोडो जीवनस्य चेतनायाश्च विकासं व्यवस्थायाश्च प्रेरणां कलायाः सौन्दर्ये निहितां मन्यते ।

कलायाः कार्यं वर्तते सौन्दर्यस्योद्भावनम् । इदं सौन्दर्यं रसस्याधायकम् । तमेव रसं रसिक आस्वादयति । रसास्वादनाय मनसो रेचनमपेक्ष्यते । यावन्मनोरेचनं स्यात् तावदेव रसानुभूत्यां तीव्रतोद्भवेत् । एतस्य कार्यस्य कृते गतिमतीनां कलानामावश्यकता वर्तते तासां प्रभाववत्वात् । संङ्गीते, नृत्ये, साहित्ये च गुणोऽयं भूयान् भूत्वा विभासते । संगीतं स्वरनिर्मितलयात्मकगतेः श्रेष्ठं रूपमस्ति । नृत्यं (अभिनयश्च) लयस्य प्रबलं शुद्धं रूपं वर्तते । साहित्य लये गतौ चार्थानां स्थैर्य्यमालोकं च योजयति ।

नाट्यं तु तद् यत्र गतेः अर्थाच्च समन्वितो लयः प्राप्यते । अत्र संगीतनृत्याभिनयसाहित्यानां सम्पृक्तता सञ्जायते । तानि सर्वाणि मिलित्वा सौन्दर्यस्य निर्माणं कुर्वन्ति, यथा स्वरघटितमनोहरो रागः ।

नाट्यं न केवलं लयात्मक-गत्यात्मकार्थवत्—कलानां मिलनबिन्दुस्तत्र चित्र-मूर्ति-स्थापत्यप्रभृतीनां तासां कलानां समावेशो भवति याः स्थैर्य्यविस्तार दृश्यरूपाण्युद्घाटयन्ति । नाट्यं कलानां मूलबीजमस्ति । अन्याः कलास्तस्मादेव स्वकीयरूप-स्वभाव-स्थानमहत्त्वादिकं गृह्णन्ति । भरतस्य नाट्यशास्त्रमत एव कलामीमांसायाः प्रस्थानसिद्धान्तत्वाय कल्पते ।

मनसो रिक्तत्वात्--स्वच्छत्वात्--सङ्कल्पविकल्पौ उत्तेजना च शाम्यन्ति । तस्येदं फलं भवति यदद्भुता शान्तिः प्रकटीभवति । या हि रसानुभूतेः सारः ।

रसं रसास्वादनं चावधारयितुमस्माभिरचेतनं नैवोपेक्षणीयं, तदनङ्गीकरणेन रसानुभुतेर्गम्भीरः सारो न विवेचनाया विषयो भवितुमर्हति । परं रसानुभवे चेतनस्य विघटनमपि न करणीयम्, यतो हि तन्मनसोऽस्ति सहयोगि ।

मनः आस्वादयति रसम्, तत् कलाकृतेर्गम्भीरतमेषु तलेषु अवगाहते । यादृशं यावच्च गाम्भीर्यं कृत्यामस्ति तादृशं तावच्च गाम्भीर्यं प्रेक्षकस्य मनस्यपि शोभते । मनसः कृतिमत्वं, कृतेश्च मनोमयत्वमेव रसास्वादनस्य रहस्यमस्ति । सारांशोऽयं प्रेक्षकस्य समग्रमपि जीवनं, चेतनेन्द्रियाणि शरीरं

च यदा कलाकृतिं तन्मयत्वेन गृह्णन्ति तदा रसोऽनुभूयते । रसोऽस्ति पूर्णोऽनुभवः । सः पूर्णमानवस्याभिव्यक्त्यामेव प्राप्तो भवितुमर्हति ।

रसस्य तद्विधविशिष्टत्वात् काव्यशास्त्रजगति यावन्तमनन्यगमादरं रसः प्राप्तवान् तावन्तमादरं नान्यत् किमपि प्राप्तुमशकत् । रसतत्त्वस्य प्रवर्त्तको मुनिर्भरतस्तं रूपकस्यानिवार्यधर्मत्वेनाभ्युपगच्छति । नाट्यशास्त्रे स इदं लिखन् श्रूयते—

**एतद्रसेषु भावेषु सर्वकर्मक्रियासु च ।**
**सर्वोपदेशजननं नाट्यमेतद् भविष्यति ।। १/११०**

व्याहरति स एवाग्रे तत्रैव—

**बहुरसकृतमार्गसन्धिसन्धानयुक्तम् ।**
**भवति जगति योग्यं नाटकं प्रेक्षकाणाम् ।। १७/१२६**

सोऽलङ्कारगुणदोषाणां रससंश्रयत्वेऽपि प्रकाशं क्षिपति—

**एवमेते ह्यलङ्कारा गुणदोषाश्च कीर्तिताः ।**
**प्रयोगमेषां च न पुनः वक्ष्यामि रससंश्रयम् ।। १७/१०८**

अलङ्कारवादिन आचार्या भामहदण्ड्युद्भटा रसभावादिकस्य रसवदाद्य-लंकारत्वे मतिं निबध्नन्ति परं ते तस्मिन्नुचितामेवादरधियं निदधतोऽपि लभ्यन्ते । भामहो दण्डी च तं काव्यार्थमावश्यकतत्त्वत्वेन मन्येते । उक्तमिदं काव्यालङ्कारे—

(क) **युक्तं लोकस्वाभावेन रसैश्च सकलैः पृथक् । १/२१**

काव्यादर्शे दण्डी प्राह—

**'अलङ्कारकृतमसंक्षिप्तं रसभावनिरन्तरम् ।।' १/१८**

रससान्निध्याच्छास्त्रचर्चा मधुरतां प्रपद्यते—

**स्वादुकाव्यरसोन्मिश्रं शास्त्रमप्युपयुज्यते ।**
**प्रथमालीढमधवः पिबन्ति कटुभेषजम् ।। काव्यालङ्कारः, ५/३**

रसो वस्तुनि मधुरतां सञ्चारयतीति दण्डी पुनश्चाग्रे वदति—

**मधुरं रसवद्वाचि वस्तुन्यपि रसस्थितिः ।**
**येन माद्यन्ति श्रीमन्तो मधुनेव मधुव्रताः ।। काव्यादर्शः १/५१**

वस्तगतमाधुर्यं दण्डी अग्राम्यतेति नाम्ना व्यवहरति । स माधुर्यगुणो

रसवदेवेति विचारं व्यनक्ति—

**'कामं सर्वोऽप्यलङ्कारो रसमर्थे निषिञ्चतु ।**
**तथाप्यग्राम्यतैवैनं भारं वहति भूयसा ॥** काव्यादर्शः, १/६२

रुद्रटोऽपि सन्नप्यलङ्कारप्रभावलक्ष्यभूतो ध्वनिनावर्ज्यमानो रसं मुक्तकण्ठतया स्वीकुरुते । भामहदण्डिनाविव सोऽपि काव्यार्थं रसं त्वावश्यकतत्त्वत्वेनावगच्छति ।[1] स एव सर्वप्रथमं वैदर्भीं पाञ्चालीं च रीतिं, मधुरां ललितां च वृत्तिं रसानुकूलप्रयोगाय निर्दिशन् प्राप्यते । शृंगाररसस्य च प्राधान्यमाद्रियते सः ।[2] कवयो रसनिमित्तेन स्युः प्रयत्नवन्त इति च निगदति—

**'तस्मात् तत्कर्तव्यं यत्नेन महीयसा रसैर्युक्तम् ।**
**उद्वेजनमेतेषां शास्त्रवदेवान्यथा हि स्यात् ॥**

काव्यालङ्कारः, १२/२

अलङ्कारवादिनामाचार्याणामनन्तरं ध्वनिवादी आचार्य आनन्दवर्धनो ध्वनिं काव्यस्यात्मत्वेन मन्यमानोऽपि ब्रूते—

**'अवस्थादिविभिन्नानां वाच्यानां विनिबन्धनम् ।**
**भूम्नैव दृश्यते लक्ष्ये तत्तु भाति रसाश्रयात् ॥**

ध्वन्यालोकः, ४/८

व्यंग्यार्थध्वनेः कतिपये भेदा भवन्ति तु, परं रसभावादिभेदास्तेभ्यः प्रधानतरा भवन्ति—

**'प्रतीयमानस्य चान्यभेददर्शनेऽपि रसभावमुखेनैवोपलक्षणं प्राधान्यात् ।'**

ध्वन्यालोकः १/५

रससान्निध्यात् प्रचलिता अर्थास्तथैवाभासन्ते यथा वसन्तसम्पर्कमवाप्य तरवः—

**दृष्टपूर्वा अपि ह्यर्थाः काव्ये रसपरिग्रहात् ।**
**सर्वे नवा इवाभान्ति मधुमास इव द्रुमाः ॥** ध्वन्यालोकः ४/४

रसभावादिनिस्यूतवाच्यवाचकयोरौचित्येन योजनं महाकवेः प्रधानं कर्म—

**वाच्यानां वाचकानां च यदौचित्येन योजनम् ।**
**रसादिविषयेणैतत् कर्ममुख्यं महाकवेः ॥** ध्व०, ३/३२

---

१. काव्यालङ्कारः १६; १/५
२. तत्रैव, १४/३७; १४/३८

सत्स्वपि व्यंग्यव्यञ्जकभावानां (ध्वनितत्त्वानाम्) अनेकेषु कवी रसादिमयध्वनिकाव्येऽवधानवानेव भवेत्—

**व्यंग्यव्यञ्जकभावेऽस्मिन् विविधे सम्भवत्यपि ।**
**रसादिमय एकस्मिन् कविः स्यादवधानवान् ॥** ध्व०, ४/५

एवमेव आचार्यमम्मटोऽपि रसं काव्यस्योत्कृष्टतमप्रयोजनत्वेन मन्यते—

**'सकलप्रयोजनमौलिभूतं समनन्तरमेव रसास्वादनसमुद्‌भूत विगलितवेद्यान्तरम् आनन्दम्—'**

काव्यप्रकाशः, प्रथमोल्लासे

ततश्च वक्रोक्तिजीवितकार आचार्यः कुन्तको वक्रोक्ति काव्यस्य जीवितत्वं मन्वानोऽपि रसं काव्यस्यामृतमन्तश्चमत्कारविस्तारमवगच्छन् प्रकारान्तरेण तं (रसम्) काव्यस्य सर्वप्रमुखप्रयोजनत्वेन व्याजहार—

**'चतुर्वर्गफलास्वादमप्यतिक्रम्य तद्विदाम् ।**

**काव्यामृतरसेनान्तश्चमत्कारो वितन्यते ॥** वक्रोक्तिजीवितम्, १/५

स उपसर्गगतां निपात गतां च पदवक्रतां निरूपयन् रसचर्चां कुर्वन् प्राप्यते—

**'रसादिद्योतनं यस्यामुपसर्गनिपातयोः ।**
**वाक्यैकजीतितत्वेन सापरा पदवक्रता ॥** (व० जी, २/३३)

प्रकरणवक्रतायाः प्रबन्धवक्रताया उद्देश्येन रसस्यानिवार्यतामनेकधा निर्दिशति । अत्र स आमनति—

**'यत्र निर्यन्त्रणोत्साहपरिस्पन्दोपशोभिनी**
**व्यावृत्तिर्व्यवहर्तॄणां स्वाशयोल्लेखशालिनी ।**
**अव्यामूलादनाशङ्क्य समुत्थाने मनोरथे**
**काप्युन्मीलति निःसीमा सा प्रबन्धस्य वक्रता ॥**

उदाहरति च—

**शैलाः सन्ति सहस्रशः प्रतिदिशं वल्मीककल्पा इमे**
**दोर्दण्डाश्च कठोरविक्रमरसक्रीडासमुत्कण्ठकाः ।**
**कर्णास्वादितजम्भसम्भवकथा किन्नाम कल्लोलिनी**
**प्रायः गोष्पदपूरणेऽपि कपयः कौतूहलं नास्ति वः ॥** (सेतुबन्धः)

अन्यच्च (नीलस्य सेनापतेर्वचनानन्तरं वानराणामुत्तरवाक्यम्)

आन्दोल्यन्ते कति न गिरयः कन्दुकानन्दमुद्रां
व्यातन्वानां करपरिसरे कौतुकोत्कर्षहर्षे ।
लोपामुद्रापरिवृढकथाभिज्ञताप्यस्ति किन्तु
व्रीडावेशः पवनतनयोच्छिष्टसंस्पर्शनेन ॥

(व० जी०, पृ० २२३)

एवंविधमपरमपि विभावनीयमभिनवाद्भुतं भोगभङ्गिसुभगं सुभाषित-सर्वस्वम् ।

प्रकरणवक्रतायाः उदाहरणानि कुन्तको रघुवंशस्य पञ्चमात् सर्गात् प्रस्तवीति (श्लोकाः १८, २४, ३०, ३१) ।

प्रबन्धवक्रतायाः आचार्यः कुन्तकः इह द्वे कारिकेऽवतारयन् दृश्यते—

इतिवृत्तान्यथावृत्तरससम्पदुपेक्षया ।
रसान्तरेण रम्येण यत्र निर्वहणं भवेत् ॥
तस्या एव कथामूर्तेरामूलोन्मीलितश्रियः ।
विनेयानन्दनिष्पत्त्यै सा प्रबन्धस्य वक्रता ॥

प्रबन्धवक्रतायाः अन्यासामपि विशिष्टतानां सत्त्वात् ताः अपि कारिकास्तेन प्रस्तूयन्ते—

त्रैलोक्याभिनवोल्लेखनायकोत्कर्षपोषिणा ।
इतिहासैकदेशेन प्रबन्धस्य समापनम् ॥१॥
तदुत्तरकथावर्तिविरसत्वजिहासया ।
कुर्वीत यत्र सुकविः सा विचित्रास्य वक्रता ॥२॥
प्रधानवस्तुसम्बन्ध तिरोधान विधायिना ।
कार्यान्तरान्तरायेण विच्छिन्नविरसा कथा ॥३॥
तत्रैव तस्य निष्पत्तेर्विनिर्बन्धरसोज्ज्वलाम् ।
प्रबन्धस्यानुबध्नाति नवां कामपि वक्रताम् ॥४॥
तत्रैव फलसम्पत्तिसमुद्युक्तोऽपि नायकः ।
फलान्तरेष्वनन्तेषु तत्तुल्यप्रतिपत्तिषु ॥५॥
धत्ते निमित्ततां स्फारयशः सम्भारभाजनम् ।
स्वमाहात्म्यचमत्कारात् सापरा चास्य वक्रता ॥६॥

**अप्येककक्ष्यया बद्धाः काव्यबन्धाः कवीश्वरैः ।**
**पुष्णन्त्यनर्घामन्योऽन्यवैलक्षण्येन वक्रताम् ॥७॥**

उदाहरणत्वेन च रामायण-महाभारत-मुद्राराक्षस-प्रतिमाभिज्ञानशाकुन्तलादिका निर्दिष्टाः आचार्यकुन्तकेन ।

अग्निपुराणकारोऽपि यथा लक्ष्मीः विना दानं न शोभते, तथैव वाण्यपि रसं विना न राजते इत्येतद् ब्रुवाणोऽग्निपुराणे कथयति—

**'लक्ष्मीरिव विना त्यागान्न वाणी भाति नीरसा ।'** (अ० पु० ३३९/९)
**'वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम्'** इत्येकमतेन सर्वेऽप्यमंसत ।

महिमभट्टश्च रसमधिकृत्य वक्ति—

**'काव्यस्यात्मनि संगिनि रसादिविषये न कस्यचिद् विमतिः ।'**

काव्यशास्त्रेतिहासावलोकनेन रसे चिरादनन्यग आदरः प्रदर्शितो बभूव । प्रथमन्तु रसोऽन्येषां काव्यतत्त्वानां स्वरूपे समावेशितोऽभवत् ततश्च स आत्मत्वेन घोषितोऽभूत् ।

रसः काव्यस्यात्मेत्येतत्प्रसङ्गे औचित्यसिद्धान्तस्यापि चर्चा क्रियते परं नौचित्यं कोऽपि पृथग्भूतः सिद्धान्तः । औचित्यस्य भावना रसध्वनिप्रभृतिसकलकाव्यतत्त्वानां मूलभावना वर्तते । प्रत्नैः सर्वैरपि आलङ्कारिकैः औचित्यं गोपायितुं स्वस्वकृतिषु सङ्केतः कृतोऽस्ति । क्षेमेन्द्रेण औचित्यस्य विचारार्थं सविस्तरं, ग्रन्थ एवैकः स्वतन्त्रो विरचितः । स आह—

**'औचित्यस्य चमत्कारकारिणश्चारुचर्वणे ।**
**रसजीवितभूतस्य विचारं कुरुतेऽधुना ॥'** (का० ३)

औचित्यस्य व्याख्या तेन विहितेत्थम्—

**'उचितं प्राहुराचार्याः सदृशं किल यस्य यत् ।**
**उचितस्य च यो भावस्तदौचित्यं प्रचक्षते ॥** (का० ७)

पदे, वाक्ये, अर्थे, कारकेषु, लिङ्गेषु, वचनेषु रसे चैतदौचित्यं प्रदर्श्य वस्तुतः क्षेमेन्द्रो भृशं साहित्यरसिकानुपचकार ।

परमत्रेदं च प्रकटीकरणं युक्तमेव भवेद् यदौचित्यस्य मूलतत्त्वमानन्दादेवोन्मीलिततामगमत् । स ब्रूते—

**अनौचित्यात् ऋते नान्यद् रसभङ्गस्य कारणम् ।**
**औचित्योपनिबन्धस्तु रसस्योपनिषत्परा ॥'**

परम् आचार्यादानन्दवर्धनादपि प्रागौचित्यं काव्यस्य मूलतत्त्वं मतमभूत्। आचार्यभरतो मुनिः पात्राणां कृते देशावस्थानुरूपवेषादिविन्यासं व्यवस्थापयन् इदमेव तत्त्वं पर्यपूपुषत्। स नाट्यशास्त्रे आमनति—

**अदेशजो हि वेषस्तु न शोभां जनयिष्यति।**
**मेखलोरसि बन्धे च हास्यायैवोपजायते॥** (२३/६९)

कलासु नाट्यकलायाः मूर्धन्यत्वं च मतम्। तत्र कारणं वर्तते तस्या रसस्थत्वात्, रसात्मकत्वाद् वा।

एषः रसः 'आनन्द' इत्येतया संज्ञया, 'सत्यम्' इत्येतेन नाम्ना, 'शिवम्' इत्येतेन च नामधेयेन, 'सौन्दर्यम्' इत्येतया चाभिधया लोके व्यवहृतो भवति सादरम्। सौन्दर्यं कं न प्राणिनं प्रीणयति ? आनन्दः कं न जनं नन्दयति ? सत्यं कं न पुरुषं प्रमोदयति ? शिवम् कं न कल्याणाभिलाषिणं तर्पयति ?

दृश्यश्रव्यभेदगकाव्यस्यानन्दसत्यशिवसौन्दर्यात्मकत्वात् तद् द्रष्टुं, श्रोतुं, पठितुं, पाठयितुं सर्वेऽपि सचेतसः आत्मानं प्रवर्तयन्ति। काव्यं विलोक्य निशम्य वा द्रष्टुर्वा श्रोतुः साधारणीकरणसामर्थ्येन द्रष्टेन वस्तुना श्रुतेन वा विषयेण सह तस्यैक्यं सञ्जायते किं वा तादात्म्यं भवति। उभयोरपि मध्ये घटमानं तादात्म्यं ततो ब्रह्मानन्दसदृशमानन्दमनुभवति। अनुभूतिविषयं प्रपन्नोऽयमेवानन्दः साहित्यशास्त्रेण 'रस' इत्येतेन नाम्ना परिभाष्यते। रससत्वेनैव कवेः कृतिः 'काव्यम्' इति कथ्यते। यत्र रसोऽयम् न, सा कृतिः काव्यं न शब्दाडम्बर एव।

उपर्युक्तानां शिवसत्यसौन्दर्याणां, येषां समन्वयो वा ऐक्यमानन्दो वा रस इति निगद्यते, यदि व्याख्या कृता स्यात् तदोचितमेवातः प्रयस्यते।

शिवं हि विश्वचेतनायां निहितं तत् तत्त्वमस्ति यन्मानवहितमाचरति। शिवं वस्तुतस्तु साधनं सत् साध्यत्वेन सन्तिष्ठते। तत् स्वतः पूर्णम्। सत्याच्च न तत् पृथक्। तज्ज्योतिः। अतः तस्मिन् विकीर्णे सति रागद्वेषादिकाः सर्वेऽपि मनोविकारास्तत्क्षण एव विलीयन्ते। तस्य मङ्गलवर्षित्वात् समग्रमपि जीवनं दिव्यताश्लिष्टां सुषमां गृह्णाति सर्वथैव। इदं हि शिवतत्त्वम् आचारदर्शनस्य प्रतिनिधित्वाय कल्पते।

सत्यं हि तत् तत्त्वं यत् स्वतः स्फुरति। तदस्ति प्रेरणाकृत्। प्रेरणात्मकत्वं तस्य, भ्रान्तिं निरस्यति, द्वैविध्यं भनक्ति, संशयं भिनत्ति च।

सौन्दर्यं मनसि किमपि अद्भुतमेव सुखं जनयति, तदनिर्वचनीयामेव प्रीतिमुत्पादयति। न तद्वीक्ष्य कदापि मनस्तृप्यति। तत् कोऽपीत्थं व्याख्याति— **'क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः'** भौतिकं सौन्दर्यं नयनं नन्दयन्मनः प्रीणयति, परं न ददाति तच्छान्तिम्। परं भौतिके वस्तुनि यद् वा प्राणिनि विलसत् तत् (सौन्दर्यम्) अधिकृत्य 'सौन्दर्यमिदं वस्तुतः परमेश्वरस्यैव वर्तते, परमेश्वर एव सौन्दर्यं भूत्वा तत्र विद्योतते' इत्येतेन प्रकारेण विचार्यते तदा कामप्यनिर्वचनीयामेव प्रसन्नतां जनयति शान्तिञ्चोद्भावयति। तथाविधं विचारितं तन्मनो विमलीकरोति, धियं वर्धयति च। काव्यं यस्य सौन्दर्यस्य यद् वर्णनं कुरुते तस्य सौन्दर्यस्य तद् वर्णनमपि सौन्दर्यमेवान्यद् भूत्वा प्रादुर्भवति। वर्णनस्य सौन्दर्यवत्वे कारणं भवति रसः। कुशलकविस्तथा वस्तु वर्णयितुमुद्यतते यथा तदीयं वर्णनं सरसं सत् समुज्जृम्भेत। इयं सरसता सुधीभिः सुन्दरतेति शंस्यते।

तदेवं सिद्ध्यति यत् सुन्दरतातः सत्यं न भिन्नं, सत्याच्छिवं न भिन्नम्। त्रीण्यप्येतानि नाम्नैव भिन्नानि परं नो तत्र यथार्थतया भिन्नत्वम्। एतावता विवेचनेनेदमवगम्यते यद् 'रसः' इत्येतत् पदं सत्यशिवसौन्दर्यत्रवाचकम्।

एतादृशस्य रसस्य साधकत्वात् कविर्दार्शनिकादपि गरीयान् वैज्ञानिकादपि च महीयान्।

सकलस्यापि सामान्यस्य लोकस्योद्धारभरः कवावेव स्थितस्तस्मात् पौराणिकात् दार्शनिकाद् विज्ञानविदादिकाच्च कविर्महीयान् गरीयांश्च। पौराणिक-दार्शनिकप्रभृतयो बुधवरा यस्य तत्त्वस्याभिव्यक्तिं विदधति तस्यैव तत्त्वस्य कविरपि स्वकीयया काव्यकलया करोति। परं सः काव्यकलाभिधया पद्धत्या परमार्थं सौन्दर्यमयं विदधत् समुपस्थापयति। तत्प्रस्तुतीकृतं सत्यं मधुरं भवत् सुन्दरं भवद् आनन्दमयं भवच्चावतरति। इदं सुन्दरमधुरानन्दमयसत्यमेव 'रस' इत्युच्यते। कविः स्वकीयायां रचनायां शब्दार्थौ रसात्मकौ कृत्वा समुपन्यस्यति। अत एव तदीयां वाणीं निशम्य शूराः संग्रामाजिरेऽसूनपि सुखेन जुह्वति, कार्पण्यवन्तोऽपि तामाकर्ण्य दातारो भवन्ति, जनानां मानसं विविधानि पुण्यमयानि कार्याणि अनुष्ठातुं प्रवर्तते; येषां जनानां हृदये मनागपि देशभक्तिर्न वर्तते तेऽपि जना स्वकीयं देशमुद्धतुं स्वकीयस्य देशस्य परतन्त्रताश्रृङ्खलां छेत्तुं विविधाः असहनीयाः अत्यापदः सोढुं सहर्षं समुद्यता सञ्जायन्ते। किं बहुना, जगत्यामसम्भाव्या अपि घटनाः सम्भाव्यास्तदा

जायन्ते, यदा कविः स्वकीयां तां गिरां प्रयुनक्ति यत्र कवित्वं किं वा रसः प्रवहति। तया गिरया जनेषु अन्यायनिरोधनाय असीमेव शक्तिः सञ्चरितुमारभते; सर्वत्रैव करुणासरित् तथा प्रवहमाना भवति यथा तेऽपि जनाः करुणापरिलुप्ता भवेयुर्ये पुरा नैकमपि वाष्पविन्दुं मुञ्चन्तः परिलक्षिताः सञ्जाताः। अहह, सा तु संयमिनामपि कृतब्रह्मचर्याभिमानानामपि चेतांसि अनुरक्तानि कर्तुं प्रभवति।

कवेर्वाण्यामेतादृशमलौकिकं प्रभविष्णुत्वं यो जनयति स एव 'रस' इति कथ्यते। कवेर्वाण्याः प्रभावात् क्षिप्रमेव स्वकीयस्वरूपं ज्ञातुं शक्नुते। सः कः किमर्थं तदीयं मानवीयं शरीरमित्येतदनायासेन बोद्धुमर्हति। अतः सः संकीर्णतातो दूरीभूय अनन्तायां स्थित्यां स्थितो भवति। 'स मम, स मम न' इत्येतां क्षुद्रां भुवं हित्वा 'सर्वं एव आत्मीयाः' इत्येतां वन्दनीयामुदारतां परिगृह्णाति। एतस्यामवस्थायां तत्र सत्साहसं, सद्बलं सदुत्साहः, सत्कर्माचरणं समुत्पद्यन्ते। सः कामप्यनिर्वचनीयां प्रीतिं विन्दन् तानि सत्कर्माणि कर्तुं प्रवर्तते; यैः अस्मिन् लोके यशोऽधिगच्छन् प्रेयांसि लभमानः श्रेयांसि चान्ततोगत्वोपभुनक्ति। एतद्विधं परमकल्याणं यो हि साधयति तमेव साहित्यशास्त्रं 'रस' इत्यामनति।

क) प्रजानां विनयाधानाद्रक्षणाद् भरणादपि।
स पिता पितरस्तेषां केवलं जन्महेतवः॥

ख) तपो रक्षन् स विघ्नेभ्य स्तस्करेभ्यश्च सम्पदः।
यथा स्वमाश्रमैश्चक्रे वर्णैरपि षडंशभाक्॥

ग) धनं जनं च काञ्चनं ददाति मानवो मुदा।
स्वदेशभूमिरक्षणे, पुरस्सरो युवा जनः॥

घ) वसुन्धरास्ति पीडितारिदुष्टमार्गगामिभिः।
जयं भजन्तु सैनिकाः, निहत्य दुर्जनाक्रमम्॥

ङ) यन्मुनीनां तपस्यास्थली कथ्यते
यत्परब्रह्मलीलास्थली विद्यते।
यच्च नानाकथानां निधी राजते
भूतले भाति तन्मामकं भारतम्॥

च) जीविताविधि वनीयकमात्रै
र्याच्यमानमखिलैः सुलभं यत्।

**अर्थिने परिवृढाय सुराणां**
**किं वितीर्य परितुष्यतु चेतः ॥**

च) **सन्तः स्वतः प्रकाशन्ते गुणा न परतो नृणाम् ।**
**आमोदो न हि कस्तूर्याः शपथेनानुभाव्यते ॥**

ज) **नायं जनः स्वदेशस्य, सजातीयश्च नैष मे ।**
**अज्ञानां भावना ह्येषा, वयं विश्वस्य बान्धवाः ॥**

**न को देशः स्वदेशो नः बान्धवाः न च के भवे ।**
**मत्या त्वेव वयं सर्वे मातास्माकं च भूरियम् ॥**

इत्येतदादिकाः सन्ति सहस्रशः श्लोकाः यैः कवयो रसदात्रीं पद्धतिमवलम्ब्य सर्वानपि जनान् कर्त्तव्यपथोन्मुखान् कुर्वन्तः प्राप्यन्ते ।

रस इत्येतत् पदं रस आस्वादनस्नेहनयोरित्येतस्माद् धातोर्निष्पद्यते । रस्यते साक्षात्कर्तृभिः ।

किमप्यसामान्यं सौन्दर्यसुन्दरं वस्तु विलोक्य तदर्थमस्मदीये मनसि आस्वाद सम्बन्धिनी भावनोत्पद्यते सैव रस इति नाम्ना प्रथते । स्वादवान् स्वाद्यः पदार्थो रसनायां जलं जनयति, अत एव जिह्वा रसनमिति कथ्यते । श्रीमद्भगवद्गीतायां जिह्वावाचकं रसनमित्येतत् पदं प्राप्यते—

'······**रसनं घ्राणमेव च**' (१५/९)

उपवासेन विषयास्तु दूरे नीयन्ते परं रसस्तु वर्धत एव । अत्याहारो हि रसं विकृतं कुरुते, अनाहारो रसं वर्धयति । अतो युक्त एवाहारः श्रेष्ठो मतः ।

इन्द्रियाणां विषयान् प्रति यद् आकर्षणं भवति तद् भगवद्दर्शनमन्तरेण न निरस्तं जायते । उक्तंच—'**न असति सम्यग् दर्शने रसस्योच्छेदः**।' रसोऽस्ति सारः । भगवांश्च रस इति गीयते ।

वनस्पतिषु चन्द्रो रसं विनिवेशयति । चन्द्रः 'सोम' इति नाम्ना च प्रथते । गीतायामुक्तम्···

'**पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः**' (१५/१३)

आहारे च पिष्टतां गमितो ह्यंशो रसो वा रस्य इत्यभिधीयते । भगवान् आह—'**रसोऽहमप्सु कौन्तेय**······।' ७/८

सुखं वा आनन्द एव रस इत्येदुपरि कथितम् । पञ्चदश्यां किं नाम सुखम् इत्यत्रोक्तम्—

**यद् यत् सुखं भवेत् तत् तद् ब्रह्मैव निर्विघ्नं प्रतिबिम्बनात् ।**
**वृत्तिष्वन्तर्मुखास्वस्य निर्विघ्नं प्रतिबिम्बनम् ॥**

रसो भृशव्यापकमर्थं परिगृह्य शब्दसंसारे संशोभते। स लौकिकान् पदार्थानेकतोऽभिव्याप्योद्दीप्यते एकतश्च लोकोत्तरानपि पदार्थान् आच्छाद्य आध्यात्मिके लोके तस्य तत्त्वस्य श्रीचरणयोर्विलुण्ठन्नपि दृश्यते यत् तत्त्वं 'सत्' वा 'परब्रह्म' इति कथ्यते। भावोऽयं यत् परब्रह्म रस इत्येतेन नामान्तरेण च प्रोच्यते। छान्दोग्योपनिषदि[१] द्रष्टव्यमिदमस्ति। सच्चिदानन्दमयब्रह्मणो द्वे रूपे मूर्तम् अमूर्तञ्च। इदमखिलमपि जगत् प्रमेयात्मकं भूतं भविष्यच्च तस्य ब्रह्मणो मूर्तं रूपम्। तदीयमेतन्नवनवरहस्यवश्यं विश्वं चराचरात्मकम्। इदं विश्वं, मन्ये, तस्य काव्यं यन्न क्षीयते, न च जीर्यति। उक्तं च श्रुत्याम्—

**'पश्य देवस्य काव्यं न ममार न जीर्यति'**

तदेव रस्यते चक्षुरादिभिः, अनुभूयते हृदयेन, चिन्त्यते मनीषया। रसयिता च स्वयमेव जीवभूतः। तस्यैव प्रतिकृतिः शब्दब्रह्मणा ग्रन्थकारेण स्थाप्यते, प्रस्तूयते, विधीयते च रसमयी। आनन्दे जीवः प्रीयते। न रस आनन्दाद् व्यतिरिक्तः सकलोऽपि व्यापारः प्राणिनां रसाभिलाषमूलः। न केवलं काव्ये व्यवहारे च प्राणिनां रसमभिलक्ष्यैव आहार-विहारयोः प्रवृत्तिः। आनन्दमुद्दिश्यैव हि विषयेष्वभिनिवेशः। अत एव काव्यजनित आस्वादोऽपि रस एव। तस्य स्वरूपं न ब्रह्मणो रूपाद् भिद्यते इत्यनुपदमेवोक्तम्। पुनश्चाभिधीयते—

**ब्रह्मास्वाद इव प्रकाशरुचिरानन्दस्वरूपो हि चित्**
**दिव्योऽसौ परमाभिरामसुखदः शान्त्येकधामाद्भुतः।**
**स्पन्दश्चारुचमत्कृतेः किमपि सत् स्रोतो विचित्रो रसः**
**सञ्जातेऽनुभवे न याति सरणिं तस्यास्ति वस्तु स्मृतेः॥**

तदर्थमेव काव्यरचनायामभिरुचिः प्रवृत्तिश्च। मानवः सामान्योऽप्यतः काव्यमध्येतुं श्रोतुं कर्तुं च प्रवर्तते। स ततो रसं निपीय कृतकृत्यतां व्रजति। **'सद्यः परनिर्वृतये'** इत्येतत् काव्यस्य प्रयोजनेष्वन्यतमं प्रयोजनम् एतस्मात् कारणात् तदनुशीलनं मतिमद्भिः कदाचिदपि न हेयम्। भरत आचष्टे—

**'नहि रसाद् ऋते कश्चिदर्थः प्रवर्तते।'**

काव्याद् रसो यदानुभूयते तदा भवत्येव स्वरूपानुभूतिः। कामं स्यान्न

---

२. स एष रसानां रसतमः परतमः

सा द्राधीयसी । अस्ति यद् हि स्वरूपं तद् आत्मा । आत्मा हि शुद्धो बुद्धश्चिन्मय सत्त्वमयः ज्ञानमयश्च निर्विकल्प उपाधिरहितः । यदा सामाजिकाः काव्यमनुशील्य तदवस्थां प्रपद्यन्ते तदा ते दुःखाद् भवन्ति निर्मुक्ताः । ते यान्तोन्द्रियातीतं सुखम्—

**'सुखमात्यन्तिकं यत् तद्बुद्धिग्राह्यमतीन्द्रियम् ॥'** (गीता)

अविद्यायां पतितस्यापि जीवस्य नैसर्गिकोऽभिलाषः स्वपदप्राप्तौ । काव्यस्यास्ति उद्देश्यं तदनुशीलयिता स्वकीयं रूपं जानीयात् । रसमनुभूयानुभूय सः स्वरूपेऽवतिष्ठते । स्वरूपावस्थानमेव रसानुभूतिरित्युच्यते । काव्यस्यात्मा रसो यः प्रतिपादितः, साहित्यशास्त्रं तमेव विशिनष्टि ।

रसस्य त्रिविधत्वं मातृगुप्तो निर्दिशति—

**रसास्तु त्रिविधा वाचिकनेपथ्यस्वभावजाः ।**
**रसानुरूपैरालापैः श्लोकैर्वाक्यैः पदैस्तथा ॥**

**कर्मरूपवयोजातिदेशकालानुवर्तिभिः ।**
**माल्यभूषणवस्त्राद्यैर्नेपथ्यरस इष्यते ॥**

**रूपयौवनलावण्यस्थैर्यधैर्यादिभिर्गुणैः ।**
**रसः स्वाभाविको ज्ञेयः स च नाट्ये प्रशस्यते ॥**

नाट्यशास्त्रे षष्ठेऽध्याये मुनयो भरतं पप्रच्छुरिह तस्योल्लेखः क्रियते—

**"ये रसा इति पठ्यन्ते नाट्ये नाट्यविचक्षणैः ।**
**रसत्वं केन वै तेषामेतदाख्यातुमर्हसि ॥२॥**

**भावाश्चैव कथं प्रोक्ताः किं वा ते भावयन्त्यपि ।**
**संग्रहं कारिकां चैव निरुक्तं चैव तत्त्वतः ॥३॥**

रसस्य प्रधानतया निर्देष्टव्यत्वात् तत्रैव संग्रहकारिकादिविवेचनमपि नाट्यशास्त्रकारेणानुष्ठितमस्ति—

**अहं वः कथयिष्यामि निखिलेन तपोधनाः ।**
**संग्रहं कारिकां चैव निरुक्तञ्च यथाक्रमम् ॥५॥**

**रसा भावाः ह्यभिनयाः धर्मो वृत्तिप्रवृत्तयः ।**
**सिद्धिः स्वरास्तथातोद्यं गानं रङ्गाश्च संग्रहः ॥१०॥**

अल्पाभिधानेनार्थो यः समासेनोच्यते बुधैः ।
सूत्रतः सानुमन्तव्या कारिकार्थप्रदर्शिनी ॥११॥
नानानामाश्रयोत्पन्नं निघण्टुनिगमान्वितम् ।
धात्वर्थहेतुसंयुक्तं नानासिद्धान्तसाधितम् ॥१२॥
स्थापितोऽर्थो भवेद् यत्र समासेनार्थसूचकैः ।
धात्वर्थवचनेनेह निरुक्तं तत्प्रचक्षते ॥१३॥
संग्रहो यो मया प्रोक्तः समासेन द्विजोत्तमाः ।
विस्तरं तस्य वक्ष्यामि सनिरुक्तं सकारिकम् ॥१४॥
शृङ्गारहास्यकरुणा रौद्रवीरभयानकाः ।
बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः ॥१५॥

एतां कारिकां व्याख्यायताभिनवेन रससम्बद्धानां प्रश्नानां विचार आरब्धः ।

अभिनवस्य दृष्टिरत्र वस्तुतोऽतितरां केन्द्रिता प्राप्यते । भरतमाधृत्य अभिनवो रसमेव नाट्यं मन्यते । नाट्यस्य समग्राप्युपलब्धिर्हि रसान्तर्गतैव स्वीकर्तुं शक्यास्ति ।

नाटकान्तर्गतानां प्रयुक्तानां लौकिकानां गीतानां गेयपदादिसमुल्लसिता लास्यदशाङ्गसमन्विता संयुक्तलक्षणललितगुणालङ्कारगीतवाद्यादिकानां संयोगद्वारेण, नटाङ्गीकृतप्रयोगपरम्परायाः अभ्यासविशेषस्य चाधारे प्रस्तुतमभिनयं सहकृत्य अत्यन्तसौन्दर्यं गता व्यापिकैका चित्तवृत्तिः सामाजिकान् स्वकीयपरकीयभावविरहितान् विधाय साधारणीकरणभूम्यां तान् समावेशयति । अभिनवस्तदेवं काव्यसन्दर्भे उदात्ततत्त्वमभिनयादित्वेन हि स्वीकुरुते । प्रकृते हि प्रसङ्गे साधारणीकरणस्य तादात्म्यस्थितिहेतोः रसानुभवोऽनुमानागमयोगिगोचरसम्बन्धज्ञानेभ्यो भिन्नः । अनुमानागमजन्यं ज्ञानं परोक्षं भवति, यदा दि रसानुभवसाक्षात्कारः प्रत्यक्षोऽस्ति रसानुभवस्तु योगिप्रत्यक्षादपि भिन्नो मतः । योगिप्रत्यक्षे साक्षात्कारात्मके सत्यपि, तस्य (योगिप्रत्यक्षस्य) इन्द्रियसन्निकर्षानपेक्षित्वात् ।

अयं रसानुभवो विलक्षणो लौकिकचित्तवृत्त्याः भवति भिन्नः । अस्य च लौकिकप्रेमशोकसंकाशत्वात् चित्तवृत्त्यन्तरोत्पादनाक्षमत्वात् निर्विघ्नं चानुभूते हि विश्रान्तिरूपास्वादनं स्वीक्रियते ।

अभिनव इदमेव मत्वेदं ब्रूते सर्वमपि । अत्र अभिनवेन रसविषयिका अन्या च समस्या समुत्थापितास्ति । रसानुभूतिजननं नाट्यकलाया उद्देश्यं मतमस्ति ।

वस्तुतस्तु रस एक एव। तद्व्याप्तिः सम्पूर्णेऽपि नाट्यवस्तुनि स्वीकृतास्ति (रसः समग्रमपि नाट्यवस्त्वभिव्याप्य सन्तिष्ठते) स नाट्यरसः (काव्यरसः) वक्तुं सुशकः। अन्येषाञ्च रसानां या चर्चा कृतास्ति सैतस्य प्रमुखस्य महारसस्य भूम्यामेव ज्ञेया। रसाश्च सर्वे महारसस्यास्यांशरूपत्वेन स्थिताः अवगमनीयाः। किञ्चैषा चर्चा प्रमुखरसव्यापिनां विभिन्नानां रसानां स्थितित्वेनैवादृता वर्तते (प्रमुखरसस्य सहायकरसस्थितिरूपत्वेनैष भावः)। परमिह स्पष्टतयाशयोऽयं हि ज्ञेयः—यस्य नाट्यरसस्य व्यञ्जना जायते, स एव मुख्यभूतो महारसः, अन्येषां स्थितिस्तु वितथैव।

इदं तथ्यमभिनवः स्फोटान्विताभिधानाभिहितान्वयसिद्धान्ते स्पष्टीकर्तुं प्रायतिष्ट। वैयाकरणाभिमतस्फोटवादानुसारेण वर्णः पदं वाक्यं च अखण्डात्मकतया सन्तिष्ठन्ते। वाक्येषु पदानां स्वतन्त्रसत्ता नास्ति। अखण्डं पदं पदस्फोटः, अखण्डं वाक्यं वाक्यस्फोट इति कथ्यते। स्फोटोऽस्ति अर्थबोधनपरः। एतत् सिद्धान्तानुसारेणैव नाट्यरसस्य प्रतीतिरखण्डाभिव्यक्तिरूपेणैव भवति। वाक्ये यथा तथैव पदेऽप्यवयवप्रतीतिर्न सत्यत्वाय कल्पते। अन्विताभिधानसिद्धान्तानुसारेण यद्यपि पदार्थः सत्यः परं वाक्यार्थबोधसमये तस्य पृथक् पृथगेव प्रतीतिर्भवति। परं वस्तुतः प्रतीतिरन्वितपदार्थस्य जायते। पृथक् पृथक् स्थितिरुपायभूतैव। अतो नाट्यरसेन सह रसान्तराणां स्थितिरुपायभूतसत्यमिव वर्तते। अभिहितान्वयसिद्धान्ते पदार्थानां बोधः पूर्वं भवति ततश्च तत्समुदयबोधो वाक्यार्थत्वेन जायते। एवमेव नाट्यरसान्तर्गतान्यरसानां स्थिति मुख्यरसस्य समुदयबोधार्थायैव कल्पते। अभिनवस्तत्र रसं काव्यार्थं भावयितृत्वेन स्वीकरोति।

अभिनवो नाट्यसन्दर्भे नवरसान् स्वीकुरुते। परं रससंख्यायां भेदोऽपि दृश्यते। अभिनवस्तु तत्राह—ये नाटके शान्तरसं न स्वीकुर्वन्ति तेषां मतेन रसाः अष्टावेव।

अभिनवो रसक्रमेऽपि विचारं स्वं दर्शयामास। सः शृङ्गारं प्रथमस्थानाधिष्ठितं कुरुते तस्य सर्वसुलभत्वात् सर्वपरिचितत्वात्, सर्वाह्लादकत्वाच्च। हास्यरसोऽस्ति तदनुगामी। अस्ति ततश्च करुणो रसः। स विपरीतो निरपेक्षश्च। करुणानन्तरं रौद्रः स्थानं परिगृह्णाति। सः करुणानिमित्तभूतोऽर्थप्रधानश्च। कामस्यार्थस्य च धर्ममूलकत्वाद् वीररसो रौद्ररसानन्तरं स्थितिमाददाति। अस्ति वीररसो धर्मप्रधानः भयभीतानां त्राणं वीररसस्य प्रयोजनम्। स भीतानभयान् विदधाति। अतस्तदनन्तरं भयानको रस उल्लिखितः।

विभावानां सादृश्याद् भयानकेन सह बीभत्स उपस्थितो भवति। अन्ततश्च अद्भुतः परिगण्यते। अभिनवोऽद्भुतः सदैवान्त एव स्थातव्य इति वदति। शान्तो रसो निवृत्तिमार्गरूपमोक्षफलाख्यः। तस्यात्मनिष्ठत्वाद् रसोभवत्यास्वाद-विषयः।

सर्वेऽपि रसाः सन्ति सुखप्रधाना इत्यभिनवो मन्यते। यतो हि ते स्वानुभवात्मप्रकाशरूपा आनन्दस्य च साराः। निर्विघ्नविश्रान्तिरूपानुभवत्वाच्छोकानुभवोऽप्यानन्दपरकः।

केचन रसाः सन्ति प्रधानाः केचन च भवन्त्यप्रधानाः। येषु रसेषु प्राप्यते उपरागस्ते रसा दुःखं स्पृशन्ति अतः हास्य-करुण-भयानक-बीभत्साद्भुता अप्रधाना मताः। श्रृङ्गार-शान्त-रौद्र-वीराः सन्ति प्रधानाः।

रसस्य किं वैलक्षण्यमित्यत्र नाट्यशास्त्रं ब्रूते—

**"तत्र लोकव्यवहारे कार्यकारणसहचारात्मकलिङ्गदर्शने स्थाय्यात्मपरचित्तवृत्त्यनुमानाभ्यासपाटवादधुना तैरेवोद्यानकटाक्षवीक्षादिभिर्लौकिकीं कारणत्वादिभुवमतिक्रान्तैर्विभावानुभावनासमुपरञ्जकत्वमात्रप्राणैः, अत एवालौकिकविभावादिनामधेयव्यपदेशभाग्भिः प्राच्यकारणादिरूपसंसारोपजीवनख्यापनाय विभावादिनामधेयव्यपदेश्यैर्भावाध्यायेऽपि वक्ष्यमाणस्वरूपभेदैर्गुणप्रधानतापर्यायेण सामाजिकधियि सम्यग् योगं सम्बन्धमैकाग्र्यं वा आसादितवद्भिरलौकिकनिर्विघ्नसंवेदनात्मकचर्वणागोचरतां नीतोऽर्थश्चर्व्यमाणतैकसारो न तु सिद्धस्वभावस्तात्कालिक एव न तु चर्वणातिरिक्तकालावलम्बी स्थायिविलक्षण एव रसः :"**

लौकिकप्रत्यक्षजगति परगतान् भावान् सामाजिकोऽनुमानेन न स्वानुभवविषयान् कर्तुं शक्नुते। संस्कृतो हि सामाजिकः परप्रमदादिविभावेषु ताटस्थ्येन प्रतिपद्यते। न स तत्स्थायिभावानुभावने कारणं भवितुमर्हति। परं काव्यस्य वा नाट्यस्य प्रसङ्गे सामाजिक इमान् भावान् प्रति न तद्विधतया तटस्थो भवितुमर्हति। स तत्स्थायिभावेन सह एकां विशिटां भुवं यावत् सम्बद्धो भवति। सहृदयस्य व्यापकसहानुभूतेराधारे रसास्वादने विकलरूपेणोद्बुद्धो भूत्वा तन्मयतायाः स्थित्यामास्वाद्यतां गच्छति।

एतस्यां प्रक्रियायां सामाजिकस्य मनसि अनुमानं स्मृत्याश्च क्रमानुगता विकासो न जायते, यथा प्रत्यक्षक्षेत्रे सम्भाव्यं भवति। कलात्मकवैशिष्ट्यहेतोः प्रत्यक्षाद् भिन्नो विभावानुभवात्मकस्तन्मयः पूर्णश्च जायते। सामाजिकः

स्वसहृदयतायाः आधारे व्यापकमिदं संवेदनमनुभवितुं सफलो भवति। एषा हि हार्दिकता सामाजिकस्य चेतसि समानभावेनावतिष्ठते। काव्याद् वा नाट्यात् प्राप्तो रसास्वादः सामाजिके स्वां स्थितिं न पूर्वत एव निधत्ते इति न स्वीकर्तुं शक्यम्। अतः सः स्मृतित्वेन न मन्तुं योग्यः।

अस्मिन् आस्वादने लौकिकप्रत्यक्ष जगतो विभिन्नानां प्रमाणानां प्रक्रियायाः न सम्भावना सञ्जायते। लौकिके हि जगति प्रत्यक्षानुमानागमोपमानप्रमाणानि मतानि। तेभ्यः सञ्जायमानो रसास्वादस्तु भिन्नो विशिष्टश्च कोऽपि भवति एतदन्यविधोऽनुभवो योगिगम्यः। न सः परसंवेदनात्मकत्वात् तटस्थत्वाच्च रसानुभवत्वेनावगन्तुं शक्यः। योगिजनानुभवस्तु आत्मानन्दात् स्फुरितो भवति। परं स विषयसम्पृक्तो वैराग्ययुक्तश्च भवति। अतः स रसास्वादत्वेन ग्रहीतुं शक्यते। अस्ति सः साक्षात्रूपात्मकज्ञानाश्रितः। भवति च योगिनोऽनुभवो लौकिको विषयानपेक्षी च। प्रत्यक्षानुभवात्मकक्षेत्रे, विभिन्नविधोपर्युक्त-प्रत्यूहानुपस्थितत्वात् आस्वादनस्वरूपं सौन्दर्यमूलकं सन्नावशिष्यते। परगत-प्रत्यक्षस्थित्यामेवंविधा तटस्थता अस्पष्टता च अवतरतः। तद्वशात् काव्यात्मकसौन्दर्यसम्बन्धिनी कल्पना तत्र न कर्तुं शक्या भवति। अन्ततो योगिनः समाधौ यमात्मनिष्ठमानन्दमनुभवन्ति सोऽपि न सौन्दर्यपरको भवितुमर्हति, तत्र विषयानुबन्धिनः कस्यापि भावावेशस्यासम्भवात्। सा स्थितिर्भवति भावशून्यतासम्बन्धिनी, अतो रसास्वादाद् भिद्यते।

**रसस्यालौकिकत्वम्**

परमयोगिनोऽनुभवस्य साक्षात्कारः स्वगतो भवति। तस्माद्धेतोः सः परेषामनुभवस्य विषय एव न भवितुं शक्यः। परं रसात्मकोऽनुभवः सर्वेष्वपि सामाजिकेषु समानभावेन समवतिष्ठते। अतस्तत्सम्बन्धे नेदं वक्तुं सुशकं यत् तदनुभवे कीदृश्यपि बाधा वर्तते। रसानुभवस्येयं साधारणीकृता स्थितिस्तं स्वात्मगतानुभवात् पृथक् करोति। द्वितीयस्याञ्च भूम्यां रसानुभूतो सामाजिकस्याभ्यन्तरो बोधः सम्मिलति, तस्मात् परानुभवविषये या तटस्थता अस्पष्टता च प्रतिलक्ष्यते सापि न सम्भवा। एषोऽनुभवः सामाजिकस्याभ्यन्तरानुभवे समाहितो जायते, अतः स तं सम्पृक्ततया निर्बाधमास्वदते। तदनन्तरं रसप्रक्रियायां यस्य विभावादेः संयोजनं भवति, तेन साधारणीकरणस्थित्यां सामाजिकस्य स्थायिन्या वासनाया रूपं दधाना रत्यादिभावाः उद्बुध्यन्ते। तदैव च अनुभावेन तेषां विघ्नानां सम्भावना नावशिष्यते, येषां चर्चा सविस्तरमुपरि कृतास्ति। अलौकिकत्वमुद्दिश्य मूले प्रोक्तम्—

"अत्र तु स्वात्मैकगतत्वनियमासम्भवात्, स्वानुप्रवेशात् परगतत्वनियमाभावात्, तद्विभावादिसाधारण्यवशसम्प्रबुद्धोचितनिजरत्यादिवासनावेशवशाच्च न विघ्नान्तरादीनां सम्भावना प्रवर्तते । अत एव विभावादयो न निष्पत्तिहेतवो रसस्य । तद्बोधापगमेऽपि रससम्भवप्रसङ्गात् । नापि ज्ञप्तिहेतवो येन प्रमाणमध्ये पतेयुः, सिद्धस्य कस्यचित् प्रमेयभूतस्य रसस्याभावात् । किं तर्ह्येतद्धि विभावादय इति । अलौकिक एवायं चर्वणोपयोगी विभावादिव्यवहारः ।"

नाट्यशास्त्रं भावं प्रतिपादयति—

**नानाभिनयसम्बद्धान् भावयन्ति रसानिमान् ।**
**यस्मात् तस्मादमी भावा विज्ञेया नाट्ययोक्तृभिः ॥**
**नानाद्रव्यैर्बहुविधैर्व्यञ्जनं भाव्यते यथा ।**
**एवं भावा भावयन्ति रसानभिनयैः सह ॥**
**न भावहीनोऽस्ति रसो न भावो रसवर्जितः ।**
**परस्परकृता सिद्धिस्तयोरभिनये भवेत् ॥**
**व्यञ्जनौषधिसंयोगो यथान्नं स्वादुतां नयेत् ।**
**एवं भावा रसाश्चैव भावयन्ति परस्परम् ॥**
**यथा बीजाद् भवेद् वृक्षो वृक्षात् पुष्पं फलं यथा ।**
**तथा मूलं रसाः सर्वे तेभ्यो भावा व्यवस्थिताः ॥**

कस्य रसस्य को वर्णः, का च तस्य देवता इत्येतच्च नाट्यशास्त्रे निरूपितं वीक्ष्यते । तथाहि—

**श्यामो भवति शृङ्गारः सितो हास्यः प्रकीर्तितः ।**
**कपोतः करुणश्चैव रक्तो रौद्रो हि संस्मृतः ।**
**गौरो वीरस्तु विज्ञेयः कृष्णश्चैव भयानकः ।**
**नीलवर्णस्तु बीभत्सः पीतश्चैवाद्भुतो मतः ॥**

यस्माद् रसाद् हृदये यादृक् प्रभावः पतति, यादृशीं च स विकृतिं हृदय नयति, यादृशं च गुणं जनयति पोषयति च तस्य रसस्य स एव वर्णो मतः । शृङ्गारे कोऽस्ति प्राणी स यो न रज्यति, प्राणी प्राणिनं प्रति आकृष्यते । तत्र प्राणिनो हृदये सा विकृतिः समुत्पद्यते या भवति आसक्त्यात्मिका, भवति च तत्र प्राणिनो हृदयं सर्वथैवान्येन सह संयोजितम् अतः शृङ्गारस्य वर्णः श्यामः प्रोक्तः । श्यामवर्णे प्रतिपादिता हि विशिष्टता प्राप्यते । तस्मात् कारणात् स वर्णः शृङ्गारमनुबध्नाति । एवमेव चान्येषां हास्यादीनां वर्णो

यो यो निर्दिष्टस्तस्य तस्य वर्णस्य गुणप्रभावादिका ऊहनीयाः । तस्य तस्य रसस्य प्रभावविकारादितथ्येषु दृष्टिं निधायैव रसवर्णाः निर्धारिताः सन्ति ।

रसानधिकृत्य वस्तुतो गम्भीरतया विचार्य्य वर्णदैवतानि निरूपितानि सन्ति । कामं हि जनयति शृङ्गारो रसस्तस्मात् तस्य रसस्य देवता विष्णुः प्रकीर्तितोऽस्ति । विष्णुः कामार्थक इत्यभिनव उल्लिखति । तस्य रसस्य सा देवता कारणान्निर्धार्यते इत्यत्रापि यदा विचार्यते तदा तस्य रसस्य सा देवता कस्माद्धेतोरुच्यते इत्येतत् सम्यग् विदितं जायते ।

नाट्यशास्त्रे, रसदैवतानि अधोलिखितयोः कारिकयोः प्रकटीकृतानि सन्ति —

**शृङ्गारो विष्णुदैवत्यो हास्यः प्रमथदैवतः ।**
**रौद्रो रुद्राधिदैवत्यः करुणो यमदैवतः ॥**
**बीभत्सस्य महाकालः कालदेवो भयानकः ।**
**वीरो महेन्द्रदेवः स्यादद्भुतो ब्रह्मदैवतः ॥**

शृङ्गारमुद्दिश्य नाट्यशास्त्रे, षष्ठेऽध्याये ३३६ तमे पृष्ठे ततश्चाग्रे यदुक्तं तस्य संक्षेपेणोल्लेखोऽयम् —

शृङ्गारोऽस्त्युज्ज्वलवेषः । लोके यत् किञ्चित् पवित्रं शुद्धमुज्ज्वलं दर्शनीयं च तच्छृङ्गारेणोपमीयते । योऽस्त्युज्ज्वलवेषः सः शृङ्गारवानित्युच्यते ।

यथा च गोत्रकुलाचारोत्पन्नानि आप्तोपदेशसिद्धानि पुंसां नामानि भवन्ति, तथैवैषां रसानां भावानां च नाट्याश्रितानां चार्थानामाचारोत्पन्नान्याप्तोपदेशसिद्धानि नामानि । एवमेष आचारसिद्धो हृद्योज्ज्वलवेषात्मकत्वाच्छृङ्गारो रसः । स च स्त्रीपुरुषहेतुक उत्तमयुवप्रकृतिः । तस्य च द्वेऽधिष्ठाने सम्भोगो विप्रलम्भश्च । तत्र च सम्भोगस्तावद् ऋतुमाल्यानुलेपनालङ्कारेष्टजनविषयवरभवनोपभोगोपवनगमनानुभवनश्रवणदर्शनक्रीडालीलादिभिः समुत्पद्यते । तस्य च नयनचातुर्यभ्रूक्षेपकटाक्षसञ्चारललितमधुराङ्गहारवाक्यादिभिरनुभावैरभिनयः प्रयोक्तव्यः । व्यभिचारिणश्चास्यालस्यौग्र्यजुगुप्सावर्ज्याः । विप्रलम्भकृतस्तु निर्वेदग्लानिशङ्कासूयाश्रमचिन्तौत्सुक्यनिद्रास्वप्नविबोधव्याध्युन्मादापस्मारजाड्यमरणादिभिरनुभावैरभिनेतव्यः ।

**हास्यः**

हास्यो विकृतपरवेषालङ्कारधाष्ट्र्यलौल्यकुहकासत्प्रलापव्यङ्गदर्शनदोषो-

दाहरणादिभिर्विभावैरुत्पद्यते ।

तस्यौष्ठनासाकपोलस्पन्दनदृष्टिव्याकोशाकुञ्चनस्वेदास्यरागपार्श्वग्रहणादिभिरनुभावैरभिनयः प्रयोक्तव्यः ।

व्यभिचारिणश्चास्यावहित्थालस्यतन्द्रानिद्रास्वप्नप्रबोधासूयादयः । द्विविधश्चायमात्मस्थः परस्थश्च । यदा स्वयं हसति तदात्मस्थः, यदा तु परं हासयति तदा परस्थः ।

**विपरीतालङ्कारैर्विकृताचाराभिधानवेषैश्च ।**
**विकृतैरर्थविशेषैर्हसतीति रसः स्मृतो हास्यः ॥**
**विकृताचारैर्वाक्यैरङ्गविकारैश्च विकृतवेषैश्च ।**
**हासयति जनं यस्मात् तस्माज्ज्ञेयो रसो हास्यः ॥**
**स्त्रीनीचप्रकृतावेष भूयिष्ठं दृश्यते रसः ।**

**करुणः**

करुणः शापक्लेशविनिपतितेष्टजनविप्रयोगविभवनाशवधबन्धविद्रवोपघातव्यसनसंयोगादिभिर्विभावैः समुपजायते । तस्याश्रुपातपरिदेवनमुखशोषणवैवर्ण्यस्रस्तगात्रतानिश्श्वासस्मृतिलोपादिभिरनुभावैरभिनयः प्रयोक्तव्यः । व्यभिचारिणश्चास्य निर्वेदग्लानिचिन्तौत्सुक्यावेगभ्रममोहश्रमभयविषाददैन्यव्याधिजडतोन्मादापस्मारत्रासालस्यमरणस्तम्भवेपथुवैवर्ण्याश्रुस्वरभेदादयः ।

**रौद्रः**

रौद्रो रसो दानवोद्धतमनुष्यप्रकृतिः । संग्रामहेतुकः । स च क्रोधाधर्षणाधिक्षेपानृतवचनोपघातवाक्यपारुष्याभिद्रोहमात्सर्यादिभिर्विभावैरुत्पद्यते । तस्य च ताडनपाटनपीडनच्छेदनभेदनप्रहरणशस्त्रसम्पातसम्प्रहाररुधिराकर्षणाद्यानि कर्माणि । पुनश्च रक्तनयनभ्रुकुटीकरणदन्तौष्ठपीडनगण्डस्फुरणहस्ताग्रनिष्पेषादिभिरनुभावैरभिनयः प्रयोक्तव्यः । व्यभिचारिभावाश्चास्य सम्मोहोत्साहावेगामर्षचपलतौग्र्यगर्वस्वेदवेपथुरोमाञ्चगद्गदादयः ।

**वीररसः**

वीरो नामोत्तमप्रकृतिरुत्साहात्मकः । स चासम्मोहाध्यवसायनयविनयबलपराक्रमशक्तिप्रतापप्रभावादिभिर्विभावैरुत्पद्यते । तस्य स्थैर्यधैर्यशौर्यत्यागवैशारद्यादिभिरनुभावैरभिनयः प्रयोक्तव्यः ।

**भयानकः**

भयानको विकृतरवसत्त्वदर्शनशिवोलूकत्रासोद्वेगशून्यागारारण्यगमनस्वजनवधबन्धदर्शनश्रुतिकथादिभिर्विभावैरुत्पद्यते। तस्य प्रवेपितकरचरणनयनचपलपुलकमुखवैवर्ण्यस्वरभेदादिभिरनुभावैरभिनयः प्रयोक्तव्यः। व्यभिचारिभावाश्चास्य स्तम्भस्वेदगद्गदरोमाञ्चवेपथुस्वरभेदवैवर्ण्यशङ्कामोहदैन्यावेगचापलजडतात्रासापस्मारमरणादयः।

**बीभत्सः**

बीभत्सोऽहृद्याप्रियाचोष्यानिष्टश्रवणदर्शनकीर्तनादिभिर्विभावैरुत्पद्यते। तस्य सर्वाङ्गसंहारमुखविकूणनोल्लेखननिष्ठीवनोद्वेजनादिभिरनुभावैरभिनयः प्रयोक्तव्यः। व्यभिचारिभावाश्चास्यापस्मारोद्वेगावेगमोहव्याधिमरणादयः।

**अद्भुतः**

अद्भुतो दिव्यजनदर्शनेप्सितमनोरथावाप्त्युपवनदेवकुलादिगमनसभाविमानमायेन्द्रजालसम्भावनादिभिर्विभावैरुत्पद्यते। तस्य नयनविस्तारानिमेषप्रेक्षणरोमाञ्चाश्रुस्वेदहर्षसाधुवाददानप्रबन्धहाहाकारबाहुवदनचेलाङ्गुलिभ्रमणादिभिरनुभावैरभिनयः प्रयोक्तव्यः। व्यभिचारिभावाश्चास्य स्तम्भाश्रुस्वेदगद्गदरोमाञ्चावेगसम्भ्रमजडताप्रलयादयः।

**शान्तः—**

मोक्षाध्यात्मसमुत्थस्तत्त्वज्ञानार्थहेतुसंयुक्तः।
नैःश्रेयसोपदिष्टः शान्तरसो नाम सम्भवति॥

बुद्धीन्द्रियकर्मेन्द्रियसंरोधाध्यात्मसंस्थितोपेतः।
सर्वप्राणिसुखहितः शान्तरसो नाम विज्ञेयः॥

न यत्र दुःखं न सुखं न द्वेषो नापि मत्सरः।
समः सर्वेषु भूतेषु स शान्तः प्रथितो रसः॥

भावा विकारा रत्याद्याः शान्तस्तु प्रकृतिर्मतः।
विकारः प्रकृतेर्जातः पुनस्तत्रैव लीयते॥

स्वं स्वं निमित्तमासाद्य शान्ताद् भावः प्रवर्तते।
पुनर्निमित्तापाये च शान्त एवोपलीयते॥

सप्तमेऽध्याये भरतो मुनिर्नाट्यशास्त्रे भावान् व्याचख्यौ। तेनाभिहितम्—

वागङ्गसत्त्वोपेतान् काव्यार्थान् भावयन्तीति भावा इति। स निर्दिशति—

**नानाभावार्थसम्पन्नाः स्थायिसत्त्वाभिचारिणः।**
**पुष्पावकीर्णाः कर्त्तव्याः काव्येषु रसा बुधैः॥ ७/१२८**

रसस्य सत्त्वगुणोद्रेककारित्वादभिनवगुप्तो रसस्य लोकोत्तरत्वं यन्मन्यते तत्र पण्डितराजो जगन्नाथो ब्रवीति—

'**आनन्दो ह्ययं न लौकिकसुखान्तरसाधारणः। अनन्तःकरणवृत्तिरूपत्वात्।**'[1] अग्रे च स ब्रूते—

"**इयं च परब्रह्मास्वादात् समाधेर्विलक्षणा। विभावादिविषयसंवलितचिदानन्दालम्बनत्वात्। भाव्या च काव्यव्यापारमात्रात्।**"[2]

वस्तुतो रसो लौकिकेष्वानन्देषूच्चतम आनन्दः। आध्यात्मिकस्तु न सः। तदास्वादानन्तरं चित्ते विकृतिरवश्यमेव जायते। अतोऽसौ नाध्यात्मिकः। आध्यात्मिके क्षेत्रे विकृतेः कल्पनापि न कर्तुं शक्या भवति।

रसनिष्पत्तिसन्दर्भे साधारणीकरणं विशिष्टमेव महत्त्वं भजते। अभिनवगुप्तेन अभिनवभारत्यां "**तस्य च......साधारणीभावः सुतरां पुष्णाति**"[3] इत्येतदुक्तम्।

दशरूपककारो धनञ्जयोऽप्यस्मिन्नेव साधारणीकरणतत्त्वे प्रकारान्तरेण प्रकाशं क्षिपन् प्राप्यते। सः साधारणीकरणमित्येतस्य पदस्य प्रयोगं न कृत्वा 'परित्यक्तविशेष' इत्येतत् पदं प्रयुनक्ति।

धनञ्जयो धनिकश्चोभौ आचार्याभिनवगुप्त-भट्टनायकाभिव्यक्तविचाराधारे साधारणीकरणस्य व्याख्यां चक्रतुः।

एतेषु त्रिष्वपि आचार्य रुद्भटः स्वकीयासु परिभाषासु विषयमेतमतितरां स्फुटतया विशदतया च प्रस्तुतीकुर्वन् दृश्यते।

आचार्यविश्वनाथः साधारणीकरणमुल्लिखन् '**ननु कथं रामादिरत्याद्युद्बोधककारणैः सामाजिकरत्याद्युद्बोध**' इत्येतं यं प्रश्नमुत्थापयामास तदुत्तरमधोनिहितासु कारिकासूपन्यस्यति —

---

१. रसगङ्गाधरः, नि० सा० प्रेस, पृ० २३

२. तत्रैव

३. अभिनवभारती, पृ० ४७०, ४७१

व्यापारोऽस्ति विभावादेर्नाम्ना साधारणीकृतिः ।
तत्प्रभावेण यस्यासन् पाथोधिप्लवनादयः ।
प्रमाता तदभेदेन स्वात्मानं प्रतिपद्यते ॥

उत्साहादिसमुद्बोधः साधारण्याभिमानतः ।
नृणामपि समुद्रादिलङ्घनादौ न दुष्यति ॥

(साहित्यदर्पणः, ३/९-११)

उपसंहरन्तं तमेतं विषयं स आह —

**'साधारण्येन रत्यादिरपि तद्वत् प्रतीयते'**

(सा० द०, ३/१२)

विश्वनाथोऽभिनवगुप्तस्यैव मन्तव्यं स्पष्टीकुर्वन् विशदीकुर्वंश्च दृश्यते ।

पण्डितराजो जगन्नाथश्चात्र स्वरसगङ्गाधरे वदति —

**'नव्यास्तु काव्ये नाट्ये च कविना नटेन प्रकाशितेषु विभावादिषु व्यञ्जनव्यापारेण दुष्यन्तादौ शकुन्तलादिरतौ गृहीतायामनन्तरञ्च सहृदयतोल्लासितस्य भावनाविशेषरूपस्य दोषस्य महिम्ना कल्पितदुष्यन्तत्वावच्छादिते स्वात्मन्यज्ञानावच्छिन्ने शुक्तिकाशकल इव रजतखण्डः समुत्पद्यमानो निर्वचनीयः साक्षिभास्यशकुन्तलादिविषयकरत्यादिरेव रसः । अयञ्च कार्यो दोषविशेषस्य । नाश्यश्च तन्नाशस्य ।'**

(प्रथमानने, पृ० २५)

साधारणीकरणाख्यः सिद्धान्तो यदि सम्यगधीतोऽवधारितश्च स्यात् तदा तेषां दुःखात्मकतातः सुखात्मकतायां परिणमनं समीचीनतया विदितं भवितुं शक्नोति । एतत् साधारणीकरणं भयं भयात्, शोकं शोकाद् दूरीकरोति । एतावदेव न, तत् तत् सर्वं देशकालबन्धनादपि मुक्तं भूत्वा वर्तमान एवावतरति, समस्तमोहसङ्कटादिविषमता च ततो निवर्तते । फलमिदं भवति काव्यनाटकगतं पात्रं स्वविशिष्टं व्यक्तित्वं विहाय सामान्यमेव व्यक्तित्वं प्रतिपद्यते । रामादिनामानो जनाः —पुरुष-स्त्रीपात्राणि—परमार्थतस्त एवानुभूयन्ते येषां ह्यभिनयांस्ते (नराः) कुर्वन्तो दृश्यन्ते । तत्साधारणीकरणप्रभावात् सहृदयश्चापि[1] निजत्वपरत्वपरकप्रतीतिधरातलादुत्थितो भूत्वा परित्यज्य ततोऽप्युपरिस्थं धरातलं संसेधते ।

---

१. हि० नवभारती, पृ० ४७०, ४६४, ४६५

एतद्विधायां परिस्थित्यां न कोऽपि कीदृगपि रसो दुःखात्मको भवति।[१] भयानकादिरसा लोकोत्तरताप्राप्तिवशात् सुखात्मका भवन्ति।

प्रतीच्या विपश्चितोऽपि करुणादिरसास्वादे विचारं गम्भीरतया कुर्वन्तो दृश्यन्ते। दुःखात्मकानि दृश्याणि प्रेक्षकस्य हृदयमुद्वेजयन्ति उद्वेल्लयन्ति च इत्येतदादिकं वदन् रूसो वदति चाग्रे "……**तत्र प्रेक्षको वाध्येता वा श्रोता द्वेषजन्यदृश्येषु आनन्दजन्यतामनुभवन्ति**" तदितरे च विचारका आहुः—**कारुणिकदृश्येषु मानवसहानुभूतिपरकं सुखं लभ्यते। परसहानुभूतिश्च वस्तुतस्त्वात्मसहानुभूतेरेव रूपम्** इत्येतदादिविचाराः सन्ति 'शैले' इत्येतदाख्यस्य कवेः, फ्रांसदेशाधिवासिनो फान्तनेलस्य च। जर्मन्याश्च शापेनहारोऽपीदृशमेव विचारमभिव्यनक्ति। श्लेगेलो ब्रूते—**ईदृशस्य दृश्यस्य दर्शनेन तस्याश्चेतनाया उदयो भवति यया ज्ञायते यत् पार्थिवस्य जीवनस्य सञ्चालनं कस्याश्चन अदृष्टशक्तेरधीनतायामस्ति, यस्याः पुरः पुरुषस्य समग्रापि शक्तिः क्षुद्रा वर्तते। अनया भावनया धारणया वा एकतोऽहङ्कारः शाम्यति, अपरतश्चैतया धारणया दुःखे-विपदि, धैर्यमवाप्यते।**

निकल्सनस्य मतेन कारुणिकेषु नाटकेषु मानवहृदयस्य शूरतोदारताप्रभृतिगुणानां प्रदर्शनं भवति। वीरताया श्लथत्वेऽपि गरिमैको निहित आप्यते। सः शोकस्य दिव्यया आभया भूषितो भवति। एतादृशे शोक-विपत्कालेऽस्मन्मानसे उदात्तानुभूतिः (न च क्लेशजनिता व्यथा) उत्पद्यते। सा अनुभूतिः सुखदा प्रीतिदा च भवति।

हीगेलोऽत्र भणति—"**कारुणिकेषु दृश्येषु जीवनं जयपराजययोरनुभूतिं कुरुते। सा चास्मच्चेतनायाः परस्परविरोधिनीः वृत्तीर्जनयति। अन्ततो गत्वा तत्र समन्वयतां च सा सूते।**"

अस्तु, प्रतीच्यविदुषां विचारा इह सङ्केतिता एव।

सर्वेभ्योऽपि रसेभ्यो निःसंशयं दुःखानुभूतिर्जायते परमेतादृश्यनुभूतिः सर्वेषु रसेषु न तुल्यरूपतया भवति। सत्त्वगुणस्य प्रधानत्वात् तत्र सुखानुभूतिरेकान्ततः सञ्जायते। परं क्वचित् क्वचिद् रसे नैतादृशत्वं विलोक्यते। रजोगुणस्तमोगुणश्चावश्यमेव केनाप्यंशेन तत्र समाविशतः। एतस्मादेव कारणात्

---

१. लौकिकशोकहर्षादिकारणेभ्यो लौकिकहर्षादयो जायन्ते इत्येष लोक एव प्रतिनियमः। काव्ये पुनः सर्वेभ्योऽपि विभावादिभ्यः सुखमेव जायते।

—साहित्यदर्पणे, ३/७

मधुसूदनसरस्वती शंसति—

**'सत्त्वगुणस्य सुखरूपत्वात् सर्वेषां भावानां सुखरूपत्वेऽपि रजस्तमोंऽश-सन्निवेशात् तारतम्यमवगन्तव्यम्। अतो न सर्वेभ्यो रसेभ्यस्तुल्यसुखानुभवः।'**

(नम्बर आफ रसाज, पृ० १५६)

साहित्यशास्त्रस्य कथनमत्रेदम्—लौकिकं कारणं, कार्यं, सहकारि च दृश्ये श्रव्ये च यदावतार्यन्ते तदा तानि विभावानुभावसञ्चारिभावनामानि प्राप्नुवन्ति, किञ्च तत्रागम्य लौकिकक्षेत्रादुत्पत्य लोकोत्तरतायां परिणतानि भवन्ति। तेषां लौकिकतैव भवति दुःखदा, अलौकिकता तु तेषां सुखदा भवति। अतः भयानककरुणादिकाः सर्वे रसाः सुखात्मकतायां परिवर्तन्ते।

शृंगारमधिकृत्य भोजराजो भणति—

**शृङ्गारवीरकरुणाद्भुतरौद्रहास्यबीभत्सवत्सलभयानकशान्तनाम्नः।**
**आम्नासिषुर्दशरसान् सुधियो वयं तु शृङ्गारमेव रसनाद् रसमामनामः॥**

(शृङ्गारप्रकाशे, पृ० ४७०)

सः शृङ्गारम् अहङ्काराभिमानयोः पर्यायत्वेन मन्यते। स ब्रूते—

**"रसोऽभिमानोऽहङ्कारः शृङ्गार इति गीयते।'**

(सरस्वतीकण्ठाभरणे, ५/१)

भोजराजप्रयुक्तोऽहङ्कारशब्दो मिथ्यागर्वस्य वा उत्तेजनाजन्याभिमानस्य वाचको न, अपितु स मनुष्यस्य सहजानुरागमभिव्यनक्ति। एतस्मादेवाहंभावात् (आत्मानुरागात्) सः स्वस्नेहार्द्रव्यक्तित्वमाभासयति। कयापि कोमलाङ्ग्या स्निग्धदृष्ट्या आत्मज्ञानस्य, आत्मविश्वासस्य, आत्मानुरागस्य च भावना जागृता भूत्वा तं (मनुष्यम्) सहजसुखे निमज्जयति। एषैव स्थितिः शृङ्गार-स्याप्यस्ति। इमं भावमुद्भावयन् सः (भोजराजः) शृङ्गारप्रकाशे ४६४ तमे पृष्ठे श्लोकमेतमुपन्यस्यति—

**अहो अहो नमो मह्यं यदहं वीक्षितोऽनया।**
**मुग्धया त्रस्तसारङ्गतरलायतनेत्रया॥**

भोजमीदृशमेवाहङ्कारं रसत्वेन मन्यते। स रसस्य परिभाषामेतां परि-भाषते—

**"मनोऽनुकूलेषु दुःखादिषु शृङ्गार इति गीयते।"**

(सरस्वतीकण्ठाभरणम्, ५/१)

अहङ्काराभिधानेयं प्रकृतिर्न जनमात्रसुलभा। पुण्यात्मभिः कृतनिर्मलकर्मभिः प्राप्यते सा। मानवस्य वस्तुतः सैव सम्पत्। तत एव श्रेष्ठा गुणा उद्भवन्ति। भोजराजः शृङ्गारप्रकाशे लिखति पृष्ठे ४६४ तमे—

**सत्त्वात्मनाममलधर्मविशेषजन्मा जन्मान्तरानुभवनिर्मितवासनोत्थः।**
**सर्वात्मसम्पदुदयातिशयैकहेतुः जागर्ति कोऽपि हृदि मानमयो विकारः॥**

यत्र अहङ्काराभिधाना प्रवृत्तिः सक्रियास्ति, यस्मिन् मानवेऽहङ्कारस्य किंवा शृङ्गारस्य स्थितिर्वर्तते, स एव रसवानन्यथा स नीरसः। उक्तञ्च शृङ्गारप्रकाशे—

**"शृङ्गारो हि नाम···आत्मनोऽहङ्कारविशेषः सचेतसा रस्यमानो रस इत्युच्यते, यदस्तित्वे रसिकोऽन्यथात्वे नीरस इति।** (पृ० ५१७)

अहङ्कारी, शृङ्गारी, कविः, सामाजिक, एव संसारं रसमयं कर्तुं प्रभवति, काव्यानन्दं चानुभवितुमनुभावयितुं सः शक्नुते। अग्निपुराणे प्रोक्तम्—

**शृङ्गारी चेत् कविः काव्ये जातं रसमयं जगत्।**
**स चेत् कविर्वीतरागो नीरसं व्यक्तमेव तत्॥** (३३९/८)

अहङ्कारिणि, शृङ्गारिणि, रतिहासोत्साहादिभावा उदिता भवन्ति, न च अरसिके अनहङ्कारिणि अशृङ्गारिणि वा। अतः रत्यादितो रसोत्पत्तिरिति कथनं न युक्तम्, अपि तु आत्मनोऽहङ्कारविशेष शृङ्गाराख्यरसादेव रत्यादिरुत्पद्यते इति कथनं युक्तं समीचीनञ्च। उक्तञ्च—

**'न हि रत्यादिभूमा रसः, किं तर्हि? शृङ्गारः।'**

शृङ्गारो हि आत्मनोऽहङ्कारविशेषः। ···रत्यादीनामयमेव प्रभव इति। शृङ्गारिणो (अहङ्कारिणः) हि रत्यादयः सम्भवन्ति, न अशृङ्गारिणः। शृङ्गारी हि रमते, रमयते, उत्सहते, स्निह्यति च।

(शृङ्गारप्रकाशे, पृ० ४७०)

भोजराजो वक्ति—**"रत्याद्यष्टस्थायिभावाः, निर्वेदादिकास्त्रयस्त्रिंशद् व्यभिचारिभावाः, सात्त्विकभावाश्चाष्टौ सन्तीति कथनं नोचितम्। एते सर्वेऽपि भावा परिस्थितिसमयानुरोधात् स्थायिनः सञ्चारिणश्च जायन्ते।"**

(शृङ्गारप्रकाशे, पृ० ४७१, ५७१)

अथ च सत्त्वात्, मनसः, प्रसूतत्वात् सात्त्विकाः सात्त्विका इति प्रोच्यन्ते। उपयुक्ता नवचत्वारिंशद्भावाः मानवस्याहङ्कारतत्त्वादुद्भवन्तोऽहङ्कारं

(शृङ्गाररसं) तथैव प्रकाशयन्ति यथानलादुत्पन्ना ज्वालाः स्वयमेवाग्निं समन्तात्। प्रकटीकुर्वन्ति। सोऽत्र विषये तत्रैव (पृ० ४६९) ब्रवीति—

**रत्यादयोऽर्धशतमेकविवर्जिता हि भावाः पृथग्विविधविभावभुवो भवन्ति।**
**शृङ्गारतत्त्वमभितः परिवारयन्तः सप्तार्चिषं द्युतिचया इव वर्धयन्ति॥**

भोजमतेन सर्वे एकोनपञ्चाशद्भावा अहङ्कारमनुप्रविश्य विभावादिसाहचर्य्यमवाप्य प्रकृष्टां दशां प्रयाय आनन्दप्रदा भवन्ति। आनन्दप्रदायकत्वात् तेषां, रस इति नाम्ना त उपचारादुक्ता भवन्ति। वस्तुतस्तु ते सन्ति तु भावा एव। अत्र स शृङ्गारप्रकाशे यदुक्तवांस्तदुद्धारेण तस्य (भोजस्य) अभिप्रायः पूर्णतया विदिततां गतो भवितुमर्हति तस्मात्कारणात् तदुक्तानि कानिचन वाक्यान्युद्ध्रियन्ते—

**यच्चोक्तं, विभावानुभावव्यभिचारिसंयोगात् स्थायिनो रसत्वमिति तदपि मन्दम्, हर्षादिष्वपि विभावानुभावव्यभिचारिसंयोगस्य विद्यमानत्वात् तस्माद् रत्यादयः सर्व एवैते भावाः। शृङ्गार एव एको रस इति। तैश्च स विभावानुभावैः प्रकाश्यमानः शृङ्गारो विशेषतः स्वदते।** (पृ० ५१७) तत्रैव।

इत्थं भोज एक एव रसः शृङ्गारः (अहङ्कारः) इति मन्यते। अत्राग्रे चान्ये तदीया विचारास्तच्छब्देष्वेव निधीयन्ते—

'यद्यपि शृङ्गार एव एको रसस्तथापि तत्प्रभावाद् ये रत्यादयस्तेऽप्युद्दीपन विभावैरुद्दीप्यमानास्तदनुप्रवेशादेव सञ्चारिणामनुभावानाञ्च निमित्तभावमुपयन्तो रसव्यपदेशं लभन्ते' (पृ० ४७२) तत्रैव।

**आभावनोदयमनन्यधिया जनेन यो भाव्यते मनसि भावनया स भावः।**
**यो भावनापथमतीत्य विवर्तमानः साहङ्कृतौ हृदि परं स्वदते रसोऽसौ॥**
(पृ० ५२०) तत्रैव

ते रत्यादयस्तु भाव्यमानत्वाद् भावा एव न रसाः। भावनापथमतीतस्तु रसः मनोऽनुकूलेषु दुःखादिष्वात्मनः सुखाभिमानो रसः। स तु पारम्पर्येण सुखहेतुत्वाद् रत्यादिभूमसु उपचारेण व्यवह्रियते - अतो न रत्यादीनां रसत्वम् अपि तु भावनाविषयत्वाद् भावत्वमेव (तत्रैव, पृ० ५१७)

ततश्चाग्रे तत्रैव रत्यादीनामेकोनपञ्चाशतोऽपि विभावानुभावव्यभिचारिसंयोगात् परप्रकर्षाधिगमे रसव्यपदेशार्हता।

भोजो रसं त्रिकोटिषु विभजते—(१) रूढाहङ्कारभावः, (२) रत्यादिकैकोनपञ्चाशद्भावानां परप्रकर्षताया उपचारेण रस इति व्यपदेशः (३) प्रेम

शृङ्गारप्रकाशे ४६३ तमे, ५२७ तमे च पृष्ठे विवरणमिदमुपलभ्यते। प्रेम इत्येतं भेदमुद्दिश्य तत्रैवाभिहितम्—

रसं तु इह प्रेमाणमेवामनन्ति रसिकाः, सर्वेषामपि रत्यादिप्रकर्षाणां रतिप्रियरसप्रियामर्षप्रियविधप्रेम्ण्येव पर्यवसानात् ।

मन्ये, एतादृशेभ्यः स्थलेभ्यः प्राप्य प्रेरणां कविकर्णपूरोऽपि प्रेमरसे सर्वेषामपि रसानामन्तर्भावं स्वीकुरुते (अ० कौस्तुभे, १४७/८) निगदितं च—

**उन्मज्जन्ति निमज्जन्ति प्रेम्ण्यखण्डरसत्वतः ।**
**सर्वे रसाश्च भावाश्च तरङ्गा इव वारिधौ ॥**

निःसंशयं भोजो रसोऽहङ्कारशब्दस्य पर्याय इत्युक्त्वा मानवमानससागरस्याऽतलस्थले गाहते—

**'आत्मनस्तु कामाय सर्वं प्रियं भवति'**

(बृहदारण्यकोपनिषत्, २-४-५)

अहङ्कारस्य परिप्रीणनमुद्बोधनञ्च काव्यस्य भवति चरमं लक्ष्यम्। भोजस्योपर्युक्तं मौलिकं चिन्तनं काव्यशास्त्रस्य मनोविज्ञानस्य च द्वयोरपि कृतेऽभूतपूर्वमेव दानम् ।

अग्निपुराणकारोऽपि भोजनिर्दिष्टं सिद्धान्तं संवदन् दृश्यते—

आनन्दः परब्रह्मसहोदरः । आनन्दस्याभिव्यक्तिश्चैतन्यचमत्कारो वा रस इत्युच्यते। चमत्कारो रसविकारो वा (अभिव्यक्तिः) अहङ्कार इति कथ्यते। अहङ्कारादभिमानोऽभिमानाच्च रतिर्जायते। रतिरेषा व्यभिचारिभावादिसंयोगाच्छृङ्गार इति निगद्यते। स्वस्वस्थायिभावैः परिपुष्टा हास्यादिका एतस्यैव (रतेर्वा शृङ्गारस्य) भेदाः सन्ति।[1]

अग्निपुराणकारो भरत इव शृङ्गाररौद्रवीराद्भुतसंज्ञकमूलरसान् मन्यमानोऽपि रतिमेवैतेषां चतुर्णां मूलत्वेनावगच्छति । रतिर्निदधाति रूपाणि चत्वारि—

**१. रागः, २. तैक्ष्ण्यम्, ३. अवष्टम्भः, संङ्कोचश्च।**

एतेषु क्रमेण शृङ्गारादिचतूरसानामुत्पत्तिर्भवति। तेभ्यश्च चतुर्भ्यः

१. अग्निपुराणे, ३३९/१-८

क्रमशो हास्यकरुणाद्भुतभयानकाः उत्पद्यन्ते ।[1]

शृङ्गार एव रसान्तरोत्पादक इति भोजोऽग्निपुराणकारश्च मन्येते । पर्यालोचनेनेदमेव ज्ञायते । कामं तन्मान्यतायां न्यूनतान्यूनतयोः अवस्थितिः स्यात् ।

रामचन्द्रगुणचन्द्रौ प्रोक्तायाः धारणायाः परिपुष्ट्यां मनोविज्ञानात्मकं कारणं निबधतौ दृश्येते । शृङ्गार आद्यो रसः । रसेषु स मूर्धन्यः । कामस्य सर्वेषामप्यसुभृतां सुलभमसत्त्वत्वात् । हास्यरसः शृङ्गार रसमनुयाति । करुणो रसो हास्यरसस्य विरोधी । रौद्ररसोऽर्थप्रधानः, वीरोऽस्ति धर्मप्रधानः । अर्थस्योत्पत्तिः कामाज्जायते, धर्मस्योत्पत्तिः कामार्थाभ्याम् । शान्तरसोऽस्ति धर्माणां मूलम् । वीररसो भयानकरसानुलग्नः । वीररसस्य भीतजनाभयकारित्वात् । भयानको बीभत्सश्च परस्परसमन्विततत्वगः । बीभत्सोऽद्भुतेन सहात्मानं संयुनक्ति । विस्मयस्य बीभत्सवारणक्षमत्वात् ।[2]

साहित्यदर्पणकार आचार्यो विश्वनाथः परस्परविरोधिनो रसानाह दर्पण—

'आद्यः करुणबीभत्सरौद्रवीरभयानकैः ।
भयानकेन करुणेनापि हास्यो विरोधभाक् ॥
करुणो हास्यशृङ्गारभयानकरसैरपि ॥
भयानकेन शान्तेन तथा वीररसः स्मृतः ॥
शृङ्गारवीर रौद्राख्यहास्यशान्तैर्भयानकः ।
शान्तस्तु वीरशृङ्गाररौद्रहास्यभयानकैः ॥
शृङ्गारेण तु बीभत्स इत्याख्याता विरोधिता ॥ (३/२३२...)

शृङ्गारं रसमधिकृत्य कतिपयानामाचार्याग्रणीनां मन्तव्यं भरत आह—

जगति यत् किमपि पवित्रं शुद्धमुज्ज्वलं दर्शनीयञ्च तत्सर्वं शृङ्गार एव शृङ्गारस्तस्योपमानम् ।[3]

रुद्रटो ब्रवीति—

शृङ्गार रस इव नान्यो रसः । अस्मिन् रसे सर्वेऽप्याबालवृद्धाः सन्ति

१. अग्निपुराण, ३३६, १-८
२. नाट्यदर्पणे, ३/६
३. रुद्रटः, का० अ० १४/३८

स्निह्यन्तः प्रेक्ष्यन्ते। रसस्यैतस्य सत्त्वादेव काव्यमुत्कृष्टतमत्वं विन्दति। अतस्तत्र कविना यत्नवता भवितव्यम्।[२]

श‍ृङ्गारमधिकृत्य रुद्रटः कियन्मधुरमुदीरयति—

अनुसरति रसानां रस्यतामस्य नान्यः,
सकलमिदमनेन व्याप्तमाबालवृद्धम्।
तदिति विरचनीयः सम्यगेषः प्रयत्नात्
भवति विरसमेवानेन हीनं हि काव्यम्॥

आनन्दवर्द्धनो वदति—

'श‍ृङ्गार एव मधुरः परः प्रह्लादनो रसः'

(ध्वन्यालोके २/७)

अभिनवगुप्तपादाः प्राहुः

श‍ृङ्गारः परः प्रह्लादन इति। रतौ हि समस्तदेवनरतिर्यङ्गादिजातिष्वविच्छिन्नैव वासनास्तीति न कश्चित् तत्र तादृग्यो न हृदयसंवादमयः। यतावपि तस्य चमत्कारोऽस्त्येव। अत एव मधुर इत्युक्तम्।

(ध्वन्यालोकलोचने, २/७)

हेमचन्द्र-विद्याधर-रामचन्द्र-गुणचन्द्रादिकाः

श‍ृंगारस्य प्रथमस्थानाधिष्ठितत्वे कारणमिदम्—

तत्सम्बन्धो न मानवजातिमात्रव्यापी, अपि तु सकलजातिसामान्यगामी। तस्यातिसंस्तुतत्वात् सर्वहृदयहारित्वाच्च तस्योच्चतमाधिष्ठानाधिष्ठितत्वम्।

(काव्यालङ्कारे, पृ० ८१: एकावल्याञ्च, पृ० ६६)

नाट्यदर्पणे च १६३ तमपृष्ठेऽभिहितम्—

'तत्र कामस्य सकलजातिसुलभतयात्यन्तपरिचितत्वेन सर्वमपि प्रति हृद्यतेति पूर्वं श‍ृङ्गारः।'

श‍ृङ्गाररसे विश्वनाथस्य विचारसारः

श‍ृङ्गाररसः सर्वाधिकव्यापकस्तत्र कारणमिदम्—श‍ृङ्गार एव एको रसः। तत्रोग्रतामरणालस्यानि विहाय अवशिष्टान् सर्वानपि सञ्चारिभावान् किञ्च

---

२. नाट्यदर्पणे, ६/४५

**जुगुप्सां हित्वा अवशिष्टसकलसञ्चारिभावत्वापन्नस्थायिभावानां यथापरिस्थिति सम्बन्धो भवति ।**[1]

शारदातनयस्तु सर्वेषामपि सञ्चारिभावानां श्रृङ्गाररसेन सार्धं सम्बन्धं स्वीकुरुते ।[2] परं केवलं स्थायिभावानां सञ्चारिभावानामपि न, अनुभावानां सात्त्विकभावानाञ्च सर्वाधिकतया स्थितिः श्रृङ्गाररसस्य, उभाभ्यामपि सम्भोगविप्रलम्भाख्यभेदाभ्यां सहैव सम्भवा ।

इत्थं प्रायेण आचार्याः सर्वे श्रृङ्गारस्य प्रकृष्टतमत्वमुररीकुर्वन्ति । अस्तु नाम श्रृङ्गारस्य स्वकीय श्रेष्ठत्वं, परं करुणादिरसानामप्यास्वादनीयतास्त्येव । रसस्य सुखदुःखात्मकत्वमुक्तं तत्र दुःखमपि सुखमिव भवति । दुःखं तु न कोऽपीच्छति । तद्दिशि कोऽपि मुखमपि न करोति यत्र दुःखमास्ते । रसस्यास्वाद्यत्वात् सचेतसः करुणादिरसेषु गाहमानाः प्रेक्ष्यन्ते । रसस्य सुखदुःखात्मकत्वसम्बन्धिनीं सामग्रीं रामचन्द्रगुणचन्द्रौ स्वकीये नाट्यदर्पणे विशेषतः उपायनीकुर्वन्तौ प्राप्येते । अत्र ततस्तद्विचारः संक्षेपेण निधीयते—

**'यदा हि श्रृङ्गार-हास्य-वीराद्भुतशान्ता इत्येते पञ्च रसाः सन्ति मुख्यतया सुखात्मकास्तदा करुण-रौद्र-बीभत्स-भयानकाः इत्येते चत्वारो रसाः सन्ति दुःखात्मकाः । करुणभयानकादिका सहृदयान् कामप्यवर्णनीयां क्लेशदशां नयन्ति । ते सामाजिकानां स्वान्ते कामप्युद्भावयन्त्युद्विग्नताम् । उद्वेगोत्पादयिता कदा नु सुखदो भवितुमर्हति ?**

नाट्यदर्पणेऽभिहितमेतत्

**'भयानको बीभत्सः करुणो रौद्रो रसास्वादवतां कृतेऽनाख्येयां क्लेशावस्थामुपनयन्ति । अत एव भयानकादिभिरुद्विजते समाजः । न नाम सुखास्वादे उद्वेगो घटते ।'**

सीताहरणविषयकान् द्रौपदीकेशवसनकर्षणपरकान्, हरिश्चन्द्रस्य भूपतेरभिनयानुद्वीक्ष्य क ईदृक् सचेताः न यः सुखास्वादमाप्नोति ?

सीतारामाद्यनुकार्याणां करुणदशाः निःसंशयं भवन्ति दुःखात्मिकाः, अतश्चेत् तेषां काव्यनाटकगतानुकरणं सुखात्मकत्वेन गृहीतं स्यात्, तदा तदनुकरणं कथं परमार्थतया गृहीतं भवितुमर्हेत् ? तत्तु संवर्तते लौकिकस्थितिविपर्यस्तम् ।

---

१. त्यक्त्वौग्र्यमरणालस्यजुगुप्साव्यभिचारिणः । (सा० द०, ३/१८६)

२· समग्रवर्णानाधारः श्रृङ्गारो वृद्धिमश्नुते । (भा० प्र०, ९१ तमे पृष्ठे)

नाट्यदर्पणे कथितम्—

(क) **तथानुकार्यगताश्च करुणादयः परिदेवनानुकार्यत्वात् तावद् दुःखदा एव। अनुकरणस्य सुखात्मकत्वे न तदनुकरणं युक्तसम्यगनुकरणं भवितुमर्हत्, विपरीतत्वेन भासनात्।**

(ख) **योऽपीष्टादिविनाशजनितदुःखदुःखितानां वर्णनं भवति काव्ये वा नाटकेऽभिनयं जायते तत्र सुखास्वादो हि परमार्थतो दुःखास्वाद एव सः। दुःखवार्तया दुःखमेव सम्भवमतः करुणादिका दुःखात्मान इति।**

(तत्रैव, पृ० २६२)

(ग) **यत्पुनः एभिरपि चमत्कारो दृश्यते स रसास्वादविरामे सति यथावस्थितवस्तुप्रदर्शनेन कविनटशक्तिकौशलेन च।···अनेनैव च सर्वाङ्गाह्लादकेन कविनटशक्तिजन्मना चमत्कारेण विप्रलब्धाः परमानन्दरूपतां दुःखात्मकेष्वपि करुणादिषु सुमेधसः प्रतिजानते।**

(नाट्यदर्पणे, पृ० २६१)

अत्राभिप्रायोऽयं-कवेर्मार्मिकं व्यवस्थितञ्च निरूपणमधीत्य किं वा नटस्य सुन्दरं हृदयहारिणं मर्म्मस्पर्शिनमभिनयं वीक्ष्य अस्माभिर्यः स्वादोऽनुभूयते तस्य लोलुपतैव करुणभयानकादिरसवत्सु काव्यनाटकेषु आनन्दं जनयति। पुनः पुनश्च सः पठितुं वा श्रोतुं वा विलोकयितुञ्च रुचिं प्रवृत्तिनिमित्तकां समुत्पादयति। अन्यथा ते रसास्तु दुःखात्मकाः एव सन्ति। तथा हि लोके यथा वीरपुरुषाः स्वकीयं प्राणघातकमप्यरातिं, यो भवति प्रहारे परमनिपुणः, प्रेक्ष्याश्चर्यवन्तो जायन्ते, तथैव सम्प्रेक्षकाः अपि कवेर्वा नटस्य नैपुण्येन चमत्कृता जायन्ते।

रसानां सुखदुःखात्मकत्वं स्वीकुर्वत्सु सुधीषु रामचन्द्रगुणचन्द्रावेव मुख्यौ प्रथमौ वा गण्येते। अन्येऽप्याचार्यास्ततः प्राग्बभूवुर्ये तद्विधं विचारं निदधुः। अभिनवभारत्यां प्रथमे भागे २७८ तमे पृष्ठे वाक्यमिदं दृश्यते—

(क) **येन त्वभ्यधायि सुखदुःखजननशक्तियुक्ता सामग्री बाह्यैव। सुखदुःखस्वभावो रसः।** (कश्चिदज्ञात आचार्यः)

इदं वाक्यं रसस्य सुखदुःखात्मकत्वं परिपोषयति।

(ख) अन्यच्च, **रसा हि सुखदुःखरूपाः।**

(शृ० प्र० द्वितीयो भागः, पृ० ३३६)

(ग) किञ्च, **रसस्य सुखदुःखात्मकतया तदुभयलक्षणवत्त्वेनोपपद्यते। अत एव तदुभयजनकत्वम्।**

(रसकलिका), (नम्बर आफ रसाज, पृ० १५५)

एतैर्वाक्यैः केषाञ्चन रसानां सुखदुःखात्मकत्वं, केषाञ्चन सुखात्मकत्वं केषाञ्चन दुःखात्मकत्वञ्च सिद्ध्यति।

रौद्रवीररसयोः साम्यं निर्दिशन् आचार्य विश्वनाथः प्राह उभयत्र शत्रुपक्ष आलम्बनम्। स तल्लक्षणे कथयति—**'आलम्बनमरिस्तत्र।'**

(सा० द०, पृ० १६६)

वीररसस्य लक्षणे स लिखति—

**'आलम्बनविभावास्तु विजेतव्यादयो मताः।'**

रौद्रस्य स्थायिभावः क्रोधो भवति रजोगुणसमुद्भूतः। परम् उत्साहो भवति सत्त्वगुणप्रसूतः। क्रोधे विवेको नश्यति। उत्साहस्तु न विवेकनाशकः। क्रोधिनि प्रतिक्रियाभावना प्राप्यते। परं वीरे तु न। क्रोधवति भयं दृश्यते परमुत्साहवति तु न तत्। क्रोधी अन्यायमपि कर्तुमवतरति परं वीरस्तु न कदापि अन्याये प्रवर्तते। क्रोधिनि चपलतोद्धततावकत्थनादिकाः प्राप्यन्ते, वीरे तु न। सः स्वबलानुरूपं चापल्यं दर्शयितुं कदाप्युत्क्रमते परं तदीयं वीर्यं भवति न क्षुद्रताक्रामि। एतेन विवेचनेन द्वयोरपि भिन्नता विदिता भवति। नैकस्यान्यस्मिनन्तर्भावो भवितुमर्हति।

अद्भुतं रसं कतिपये आचार्या अन्येभ्यो रसेभ्यो महनीयतरं मन्यन्ते। अस्मिन् विषये किमप्युपरि सङ्केतितमिह स्फुटतया लिख्यते—

रामचन्द्र-गुणचन्द्र-धर्मदत्त-नारायण-विश्वनाथाद्याचार्या अद्भुते स्वविचारान् प्रकटीकुर्वन्तः प्राप्यन्ते।

रामचन्द्रगुणचन्द्रावत्र ब्रूतः—

नाटकाख्ये रूपके एको रसोऽङ्गी, अन्ये च रसाः अङ्गत्वेनावतिष्ठन्ते। अन्ततश्च अद्भुतरसस्य सद्भाव उचितः—

**'एकाङ्गिरसम् अन्याङ्गम् अद्भुतान्तम्'**

एतादृश्या धारणया, मन्ये, प्रेरितो भूत्वा धर्मदत्तो ब्रूते—

**रसे सारश्चमत्कारः सर्वत्राप्यनुभूयते।**
**तच्चमत्कारसारत्वे सर्वत्राप्यद्भुतो रसः॥**

एतस्मिन्नेवाधारे नारायणो नाम आचार्योऽद्भुतमेवैकमात्रं रसं मन्यते—

**'तस्माददद्भुतमेवाह कृती नारायणो रसम्'**

निःसंशयं रसे चमत्कार एव सारभूतः। इममेव चमत्कारम् आचार्यो विश्वनाथोऽद्भुतस्य पर्यायमत्रगच्छति। चमत्कारः सहृदयस्य हृदयं विस्तृतं कुर्वाणस्तदाह्लादयति। साहित्यदर्पणे तेनोच्यते—

**'चमत्कारश्चित्तविस्ताररूपो विस्मयापरपर्यायः।'**

अयमद्भुतो रसः सर्वेष्वपि रसेष्वनिवार्यत्वेनापेक्ष्यते। एतमन्तरेण रसस्य सिद्धिरेव असम्भवा। वस्तुतोऽस्ति अद्भुतश्चमत्काराधायकः।

शान्तं रसमधिकृत्य नाधुनिकेषु विपश्चित्स्वेव प्राचीनेष्वपि विद्वत्सु मतभेदो दृश्यते। तस्य मतभेदस्य मुख्य आधारो भरतमुनेः—

**'अष्टौ नाट्ये रसाः स्मृताः'** (ना०शा०, ६/१६)

इत्येषः श्लोकोऽस्ति। भरतस्यैतस्मात् कथनादेव कालिदासामरसिंहभामह-दण्डिप्रभृत्याचार्यैं नाटकेऽष्टानामेव रसानां सन्निवेशनं समुचितं मतम्। परम् उद्भटानन्दवर्धनाभिनवगुप्तैः स्पष्टतया शान्तस्य प्रतिपादनं विहितम्।

वड़ोदाप्रकाशितस्य अभिनवभारतीव्याख्योपेतस्य भरतकृतनाट्यशास्त्रस्य सम्पादकः (द्वितीयसंस्करणे) श्रीरामस्वामी शास्त्री लिखति यत् तस्य सार इह प्रस्तूयते—

शान्तरसस्य स्थापनां सर्वप्रथमं भरतनाट्यशास्त्रस्य टीकाकार उद्भटः स्वविरचिते काव्यालङ्कारसंग्रहे कृतवान्। आनन्दवर्धनोऽभिनवगुप्तश्च तस्य समर्थनं कृतवन्तौ। श्रीरामस्वामी सम्पादकस्तु नाट्यशास्त्रे सोंऽशः प्रक्षिप्तो-स्तीति वदति। तत्र हेतू द्वौ तेनोपस्थापितौ—

१. भरतमुनिः प्रथमम् अष्ट एव रसानुल्लिलेख, अतो नवमस्य रसस्य वर्णनं तद्ग्रन्थे कदा सम्भवम्। एतेन तस्यांशस्य प्रक्षिप्तत्वं सिद्ध्यति।

२. शान्तरसविषयकं प्रकरणं न कासुचन पाण्डुलिपिषु विद्यते एतदपि तस्यांशस्य प्रक्षिप्तत्वं ज्ञापयति।

प्राचीनेष्वाचार्येषु शान्तरसस्य पक्षे यावाचार्यौ स्तस्ताविमे—

१. धनञ्जयः, २. धनिकश्च।

एतौ द्वावपि नाट्ये अष्ट एव रसा भवन्तीति मन्येते।

शान्तस्य रसस्यानभिनेयत्वात् तस्य नाटके सद्भावो न सम्भव इति वदन्तः

शान्तरसविपक्षस्था आचार्याः कथयन्ति यद् भवति निवृत्तिप्रधानं तस्याभिनयनं न शक्यम् अतः नाटके शान्तस्य वर्जनमभिमतमस्ति ।

दशरूपकस्य टीकाकारोऽत्र विविनक्ति—

**'शममपि केचित् प्राहुः पुष्टिर्नाट्येषु नैतस्य ।**
**निर्वेदादिस्ताद्रूप्यादस्थायी स्वदते कथम् ।**
**वैरस्यायैव तत्पोषस्तेनाष्टौ स्थायिनो मताः ॥**

शान्तरसे वादिनामनेकविधाः विप्रतिपतयः सन्ति । केचिदाहुः नास्त्येव शान्तो रसः । तस्य आचार्यो हि विभावादिकं प्रतिपादयन् किञ्च लक्षणं तदीयं निर्दिशन् न संलक्ष्यते ।

अनादिकालात् प्रवहमानयोः रागद्वेषयोरुच्छेदनं न भवितुमर्हतीति मत्वा केचन तु तस्याभावं वर्णयन्ति । अन्ये तु रसान्तरेषु तस्यान्तर्भावं कुर्वन्ति । तस्य समस्तव्यापारप्रविलयरूपस्याभिनयायोगाद् बहवो हि बुधा अभिनयात्मनि नाटकादौ शमस्य स्थायित्वं सर्वथैवासम्भवं विमृश्य शमस्य निषेधं कुर्वन्ति ।

यत्तु कैश्चिन्नागानन्दादौ शमस्य स्थायित्वं वर्णितं, तत्तु आप्रबन्धप्रवृत्तेन मलयवत्यनुरागेण विद्याधरचक्रवर्तित्वप्राप्त्या च विपर्यस्तम् । न ह्येकानुकार्यविभावावलम्बिनो विषयानुरागापरागौ उपलभ्येते । अतः दयावीरस्येव (दयावीरोत्साहस्येव) तत्र स्थायित्वम् ।

विरुद्धाविरुद्धाविच्छेदित्वस्य निर्वेदादीनामभावादस्थायित्वमत एव ते चिन्तादयः स्वस्वव्यभिचार्यन्तरिता अपि परितोषं नीयमाना वैरस्यमावहन्ति ।
(दशरूपके, ४-पृ० २१६, २२१)

दशरूपके कृतेन विवेचनेन केवलमेतदेव सिद्ध्यति यन्नाट्ये शान्तरसस्य नास्त्युपयोगिता ।

आचार्य आनन्दवर्धनः शान्तरसे स्वकीयान् एतान् विचारान् अभिव्यक्तीकुर्वन् प्राप्यते ध्वन्यालोके—

**शान्तश्च तृष्णाक्षयसुखस्य यः परिपोषस्तल्लक्षणो रसः प्रतीयत एव । तथा चोक्तम्—**

**यच्च कामसुखं लोके यच्च दिव्यं महत् सुखम् ।**
**तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम् ॥**

**यदि नाम सर्वजनानुभवगोचरता तस्य नास्ति नैतावताऽसावलोकसामान्य-**

**महानुभावचित्तवृत्तिविशेषः प्रतिक्षेप्तुं शक्यः। न च वीरे तस्यान्तर्भावः कर्तुं युक्तः। तस्याभिमानमयत्वेन व्यवस्थापनात्। अस्य चाहङ्कारप्रशमैकरूपतया स्थितेः। तयोश्चैवंविधविशेषसद्भावेऽपि यद्यैक्यं परिकल्प्यते तद्वीररौद्रयोरपि तथा प्रसङ्गः। दयावीरादीनां तु चित्तवृत्तिविशेषाणां सर्वाकारमहङ्काररहितत्वेन शान्तरसप्रभेदत्वम्, इतरथा तु वीररसप्रभेदत्वमिति व्यवस्थाप्यमाने न कश्चिद् विरोधः। तदेवमस्ति शान्तो रसः। तस्य चाविरुद्धरसव्यवधानेन प्रबन्धे विरोधिरससमावेशे सत्यपि निर्विरोधत्वम्। यथा प्रदर्शिते (नागानन्द) विषये।'** (३। पृ० २३९)। अभिनवगुप्तोऽपि अत्र विचारं स्वकीयमवतारयामास। अयमपि शान्तरसं स्थापयामास। भरतसूत्रस्य टीकाकारश्च भट्टनायकः शान्तरसस्य सत्तां स्वीकुरुते शान्तरसोपक्षेपोऽयं भविष्यतीत्येतद् भट्टनायकस्य वचोऽभिनवगुप्तेनोद्धृतमस्ति। एतेन श्रीरामस्वामिशास्त्रिणः 'प्रक्षिप्तोंऽशोऽसा' वित्येतन्मतं निरस्तं भवति। भरतमुनिः शान्तरसं मन्यते इत्येतत् प्राचीनटीकाकारैर्दृढतया स्पष्टतया च सिद्धीकृतम्। अष्टौ नाट्ये रसाः स्मृताः' इत्येतेन कथनेन तु नाट्ये अष्ट रसा एव स्मृताः इति सिद्ध्यति, काव्ये शान्तरसो भवितुमर्हति। काव्यप्रकाशकारश्च—

**'निर्वेदस्थायिभावोऽस्ति शान्तोऽपि नवमो रसः'**

इत्यभिधाय शान्तरसं प्रतिपादयति।

रामचन्द्रगुणचन्द्रौ शान्तस्य स्थायिभावं शमं किञ्च निर्वेदं तस्य सञ्चारिभावं मन्येते। शान्तस्य लक्षणं तन्मतेनेदम्—

**'कामक्रोधलोभमानमायाद्यनुपरक्तपरोन्मुखताविवर्जिताक्लिष्टचेतोरुपशमस्थायी शान्तरसो भवति।'**

(नाट्यदर्पणः, पृ० ३१७)

यत्र निर्वेदः सञ्चारिभावत्वेन न वर्ण्यते तत्र शान्तो रस इति कथनं नोचितमपि तु तत्र भावध्वनिरिति कथनमुचितम्।

रुद्रटप्रणीतस्य काव्यालङ्कारस्य टीकाकारो नमिसाधुरत्र शान्तरसे प्राह—**क्वचिच्छान्तस्य रसत्वं नेष्टम्'। तदयुक्तम्, भावादिकारणानामत्रापि विद्यमानत्वात्।'**

(काव्यालङ्कारः, १५/१६)

शान्तरसस्य मूलरसत्वेन स्वीकरणे नाट्यशास्त्रस्य मतमेतत्—

**'भावा विकारा रत्याद्याः शान्तस्तु प्रकृतिर्मतः।**
**विकारः प्रकृतेर्जातः पुनस्तत्रैव लीयते ॥**

**स्वं स्वं निमित्तमासाद्य शान्ताद् भावः प्रवर्तते ।**
**पुनर्निमित्तापाये च शान्त एवोपलीयते ।।**

(ना०शा० ६/६१-६२)

अभिनवगुप्तेन एष एवाशयः प्रस्तुतीकृतः । सः शान्तरसस्य स्थायिभावम्, आत्मज्ञानं सर्वेषामपि स्थायिभावानामाधारत्वेन मन्यते । किञ्चान्यान् स्थायिभावांस्तस्य व्यभिचारिभावत्वेन मन्यते । आत्मज्ञानस्यास्ति तात्पर्यम्—

परिकल्पितविषयभोगादिवासनामुक्तशुद्धानन्दमयता । अभिनवभारत्यामुल्लेखोऽयम्—

**(क) तेनात्मैव ज्ञानानन्दादिविशुद्धधर्मयोगी परिकल्पितविषयभोगरहितोऽत्र स्थायी ।**

**(ख) तत्त्वज्ञानन्तु सकलभावान्तरभित्तिस्थानीयं सर्वस्थायिभ्यः स्थायितमं सर्वा रत्यादिकाः स्थायिचित्तवृत्तीर्व्यभिचारिभावयन्निसर्गत एव सिद्धस्थायिभावमिति ।**

(अभिनवभारती पृ० ६२३-६२४)

महाभारतादौ शान्तरसस्य पुष्टिर्द्रष्टव्यास्ति ।

अस्ति शान्तरस ईदृग् यस्य समतां, यस्य अनन्यगामिनीं परमप्रकृष्टतां कोऽपि रसो न प्राप्तुं शक्नोति , स मानवस्य चिन्तादुःख-क्लेशदैन्य-द्वेषेच्छादिकानखिलानपि विकारान् हृत्वा तस्य हृदयं निर्मलं विदधाति । स मानवं प्रवृत्तितो निवार्य निवृत्युनमुखं करोति । यदपि श्रेयः, कल्याणं वा तदयमेव रसो मानवार्थं सम्पादयति ।

**मन्ये मायेयमज्ञानं यत्सुखं स्वजनादपि ।**
**निदाधवारणायालं निजच्छाया न कस्यचित् ।।**
**अशीमहि वयं भिक्षामाशावासो वसीमहि ।**
**शमीमहि महीपृष्ठे कुर्वीमहि किमीश्वरैः ।।**
**यावतः कुरुते जन्तुः सम्बन्धान्मनसः प्रियान् ।**
**तावन्तोऽस्य निखन्यन्ते हृदये शोकशङ्कवः ।।**
**प्रचण्डवासनावातैरुद्धूता नोर्मनोमयी ।**
**वैराग्यकर्णधारेण विना रोद्धुं न शक्यते ।।**
**आशा नाम नदी मनोरथजला तृष्णातरङ्गाकुला**
**रागग्राहवती वितर्कविहगा धैर्यद्रुमध्वंसिनी ।**

मोहावर्तसुदुस्तरातिगहना प्रोत्तुङ्गचिन्तातटी
तस्याः पारगता विशुद्धमनसा नन्दन्ति योगीश्वराः ।।
धावन्तः प्रतिवासरं दिशि दिशि प्रत्याशया सम्पदां
दृष्ट्वा कालवशेन हन्त पलितं कस्यापि दैवद्रुमम् ।
श्रावं श्रावमवज्ञयोपहसितं सर्वत्र भग्नोद्यमाः
जीवामः परमार्थशून्यहृदयास्तृप्ता मनोमोदकैः ।।

इत्येतदादिसुधामयवचांसि कामं क्वापि श्रुतानि स्युः काव्ये वा नाटकेऽवश्यमेवास्मान् तानि वैराग्योन्मुखान कुर्वन्ति, अस्माकं मानसे तानि किमपि तत्सुखं सञ्चारयन्ति यत् संसारस्य किमपि वस्तु न दातुं प्रभवति । अतः यथा रसान्तरं स्वकार्यं कुरुते तथैवैष रसोऽपि स्वकार्यं विधत्ते । यदि शान्तरसार्थमनुकूलं पात्रं वा अभिनेता प्राप्यते तदा तद्द्वारेण तादृशोऽभिनयोवश्यमेव दृष्टो जायते यः शान्तरसं जनयितुं सर्वथैव क्षमते । जगति कस्यापि वस्तुनोऽभावो न । ईदृग् जनोऽपि प्राप्तुं शक्यो यो हि शान्तरसार्थं समुचितः । एतस्यैव रसस्य प्रयोजनेन मानवो दुर्लभो भवति इदन्तु कथनं न युक्तं, अन्येषामपि रसानां निमित्तेन जनाः दुर्लभतयैव लभ्यन्ते । तस्मात्कारणात् 'नाट्येऽष्टौ रसाः स्मृताः' इत्येतद् वाक्यं न कदापि सर्वेषामपि जनानां हृदयं प्रीणयितुं प्रभवति ।

वेदान्तदेशिकस्य सङ्कल्पसूर्योदयाभिधं नाटकं विश्रुतं प्रतीकं नाटकं वर्तते । एतस्य नाटकस्यास्ति विषयो मोहस्य पराजयो विवेकस्योदयः । एतन्नाटककर्तुः कथनमिदम्—

**शान्तरस एव चित्तखेदापनेता पारमार्थिकानन्ददातास्त्यतः सः शान्त एव वस्तुतो रसः । शृङ्गारस्तु असभ्यकोट्यामायाति, वीररसोऽपि तिरस्कारमवज्ञां च प्रोत्साहयति, अद्भुतरसस्य गतिर्निसर्गतो विरुद्धा, अतः शान्तरस एव निःसन्दिग्धो याथार्थ्येण रसः—**

असभ्यपरिपाटिकामधिकरोति शृङ्गारिता
परस्परतिरस्कृतिं परिचिनोति वीरायितम् ।
विरुद्धगतिरद्भुतस्तदलमल्पसारैः परैः
शमस्तु परिशिष्यते शमितचित्तखेदो रसः ।।

संस्कृतनाटककाराणामुद्देश्यं न केवलं जनमनोरञ्जनमपि तु जनतायाश्चरित्रे निर्मलतायाः सञ्चारणं तस्य चोत्थापनमपि वर्तते। वस्तुतः

संस्कृतनाटककारोऽस्यामेव दिशि प्रधानतया यतते । इदं हि स्तुत्यं महनीयं कार्यं विना तेन तत्त्वेन न भवितुमर्हति यत् तत्त्वं शान्तरस एव बिर्भात । अतः संस्कृतनाटकानि यस्मिन्नाधारे स्थितानि सन्ति स आधारोऽस्त्याध्यात्मिकः : एषाध्यात्मिकता शान्तरसं विहाय अन्यत्र कुतः ?

एतान् नव रसान् व्यतिरिच्य केचन कोविदा भक्तिरसमपि मन्यन्ते । साहित्यशास्त्रन्तु देवादिविषयकरतिमध्ये भक्तिं समावेशयति । तन्मतेन सा (भक्तिः) भाव एव, न च रसः । परं गौडीयवैष्णवा भक्तिं रसमेव—सर्वश्रेष्ठं रसं मन्यन्ते । रूपगोस्वामिना स्वकीये भक्तिरसामृतसिन्धौ किञ्च उज्ज्वलनीलमणौ भक्तिरसस्य प्रतिपादनं सविस्तरं कृतमस्ति । स देवताविषयकरति तु साहित्यशास्त्रिण इव भावमेवावगच्छति परं भक्तिरसस्य स्थायिभावः श्रीकृष्णविषयिका रतिरेवेति कथयति । श्रीकृष्णो देवता न, स तु साक्षाद् भगवान् एव । अतस्तद्विषयिका रतिर्देवविषयिकाया रतेर्भिन्ना सर्वथैव । अत एव भक्तिरसो न भावान्तर्गतोऽपि तु स्वतन्त्रो रस इत्येतद् आमनति सः । तत्र आलम्बनविभावो रामो वा कृष्णः । उद्दीपनविभावा भक्तसमागम - तीर्थसेवन - सरिद्वनाद्येकान्तपावनस्थलादीनि । अनुभावाः— भगवन्नामजपः, भगवल्लीलाकीर्तनम्, गद्‌गद्‌भावः, अश्रुप्रवाहः, नृत्यहसनरुदनादिकाः । व्यभिचारिभावाः— मतिः, ईर्ष्या, वितर्क इत्येतदादिकाः ।

भक्तिमुद्दिश्य धनञ्जय आह—

> **प्रीतिभक्त्यादयो भावा मृगयाक्षादयो रसाः ।**
> **हर्षोत्साहादिषु स्पष्टमन्तर्भावान्न कीर्तिताः ॥**

(दशरूपकम् ४/८३)

आचार्योऽभिनवगुप्तोऽपि भक्तिरसमधिकृत्य कथयति—

(क) **एते नवैव रसाः पुरुषार्थोपयोगित्वेन रञ्जनाधिक्येन वा, इयतामेवोपादेयत्वात् ।**

(ख) **अत एव ईश्वरप्रणिधानविषय भक्तिश्रद्धे स्मृतिमतिधृतिउत्साहानुप्रविष्टे, अन्यथैव वा अङ्गमिति, न तयोः पृथग् रसत्वेन गणनम् ।**

(अभिनवभारती)

भानुदत्तो नव एव रसा इति न मत्वा अन्यांश्च भक्त्यादीन् स्वतन्त्ररसत्वन जानाति । श्रीरूपगोस्वामी भक्तिं रसं मन्यमान 'आनन्दातिरेकातिशये भूत्वा

तदा भक्तो मोक्षमप्युपेक्षते; तादृश्याः सहस्रगुणानन्दाया भक्तेः रसत्वेनाङ्गीकरणं सर्वथैवोचितमिति वदन् अग्रे विचारस्वकीयमित्थमभिव्यनक्ति—

'इह अनुभवसिद्धोऽपि सहस्रगुणितो रसो जडेनैव त्वया कस्मादकस्मादपलप्यते' इति ।

भक्तिरसं रूपगोस्वामी पञ्चसु रूपेषु विभजते—

| | | |
|---|---|---|
| १. | शान्तभक्तिरसः | शान्तिः स्थायिभावः |
| २. | प्रीतभक्तिरसः | प्रीति ,, |
| ३. | प्रेयान् भक्तिरसः | सख्यं ,, |
| ४. | वत्सलो भक्तिरसः | वात्सल्यं ,, |
| ५. | मधुरो भक्तिरसः | मधुरारतिः ,, |

मधुसूदनमतेन भगवद्रतिः परिपूर्णरसा । स भक्तिरसः शृङ्गारादिरसेभ्यः प्रकृष्टतर इत्युक्त्वैव न तुष्यति, स तु भक्तिरसः सूर्य इव, अन्याश्च रसाः खद्योत इव इति वदति । भगवद्भक्तिरसायने स आह—

**'परिपूर्णरसा क्षुद्ररसेभ्यो भगवद्रतिः ।**
**खद्योतेभ्य इवादित्यप्रभेव बलवत्तरा ॥'**

(पृ० २७८)

वस्तुतो भक्तिरसेऽन्यरसानां स्थितिः सञ्चारिभावसमा, हासादीनां व्यभिचारिषु पर्यवसानादिति भक्तिरसामृतसिन्धावुल्लेखोऽधिगम्यते ।

(पृ० ७४)

आचार्यौ मम्मटविश्वनाथौ तु भक्तिं देवविषयकरतिं मन्येते । किञ्च तां भावत्वेन स्वीकुरुतः ।

१. **'रतिर्देवादिविषया व्यभिचारी तथाञ्जितः । भावः प्रोक्तः ।'**

(काव्यप्रकाशे, ४ । पृ० ११८)

२. **सञ्चारिणः प्रधानानि देवादिविषया रतिः ।**
**उद्बुद्धमात्रः स्थायी च भाव इत्यभिधीयते ॥**

(सा० दर्पणे तृतीय प०)

पण्डितराजजगन्नाथो रसगङ्गाधरे लिखति—

**'स्नेहभक्तिवात्सल्यमिति रतेरेव विशेषाः'** ।

'प्रेयान् रसः' इत्यत्र सर्वप्रथमं रुद्रटः प्रकाशं क्षिपति काव्यालङ्कारे—

**स्नेहप्रकृतिः प्रेयान् संगतशीलार्यनायको भवति ।**
**स्नेहस्तु साहचर्यात् प्रकृते रूपचारसम्बन्धात् ॥**
**निर्व्याजमनोवृत्तिः स नर्मसद्भावपेशलालापः ।**
**अन्योऽन्यं प्रतिसुहृदो व्यवहारोयं मतस्तत्र ॥**
**प्रस्यन्दिप्रमदाश्रुः सुस्निग्धस्फारलोचनालोकः ।**
**आर्द्रान्तःकरणतया स्नेहप्रदो भवति सर्वत्र ॥**

रसस्यास्य स्वरूपमुपस्थाप्य रुद्रटोऽन्येषां रसानां यथोदाहरणं निदधौ तथा नास्योदाहरणं न्यदधात् । तथात्वे स्नेहस्थायिभावस्य स्वरूपावधारणे प्रभूतायाः सहायतायाः अवाप्तिः सम्भवा । सौहृदपारस्परिकनिश्छलप्रेमसम्बन्धनिमित्ते स्नेहेन किमस्ति तात्पर्यम् ? रुद्रटप्रयुक्तः सुहृच्छब्दश्चेन्मित्रस्य पर्यायस्तदा प्रयोरसस्य कल्पना मौलिकी मनोहृद्या च भवितुमर्हति । विनोदाहरणं तादृशी न कर्तुं शक्या भवति ।

परं रुद्रटस्य परवर्ती भोजराजो यदुदाहरणं दर्शयामास तेन तु नायक-नायिकयोः पारस्परिकः स्नेह एव सिद्ध्यति न च मित्रयोः । भोजराज इहोदाहरणं प्रस्तवीति—

**'यदेव रोचते मह्यं तदेव कुरुते प्रिया ।**
**इति वेत्ति न जानाति तत् प्रियं यत् करोति सा ॥**

सोऽन्वेतुमुदाहरणमाह—

**'अत्र वत्सलप्रकृतेर्धीरतया ललितनायकस्य प्रियालम्बनविभावादुत्पन्नः स्नहस्थायिभावो विषयसौकुमार्यात्मकप्रकृत्यादिभिरुद्दीपनविभावैरुद्दीप्यमानः समुपस्थाप्यमानैर्धृतिस्मृतिमोहादिभिर्व्यभिचारिभावैश्च संसृज्यमानो निष्पन्नः प्रेयानिति प्रतीयते ।**

एतस्मिन्नेव सन्दर्भे भोजो भवभूतिशब्दैः स्नेहस्य परिणामं प्रदर्शयंस्तत्स्व-रूपमपि निर्दिशति ।

कस्याञ्चन व्यक्त्यां कृतो निष्कारणपक्षपातो भवत्यतिकार्यः—

**अहेतुः पक्षपातो यस्तस्य नास्ति प्रतिक्रिया ।**
**स हि स्नेहात्मकस्तन्तुरन्तर्मर्माणि सीव्यति ॥**

(उत्तररामचरिते)

भोज इदमप्यत्राह—

'रतिप्रीत्योरपि चायमेव मूलप्रकृतिरिष्यते ।'

स रतिरित्येतदाख्यस्थायिभावमित्थं व्याचष्टे—

'मनोऽनुकूलेष्वर्थेषु सुखसम्वेदनं रतिः ।।

(सा० क० आ०, ५/१३८)

प्रीतिं स विवृणोति—

शब्दादिभ्यो वहिर्भूता या कर्माभ्यासलक्षणा ।
प्रीतिः साभ्यासिकी ज्ञेया मृगयादिषु कर्मसु ॥

(सा० क० आ०, ५/६७)

एतेन तात्पर्यमिदमादातुं शक्यम्—

यथा रतेः सम्बन्धः शृङ्गारं रसमनुबध्नाति, स्नेहस्य च सम्बन्धस्तथैव प्रयोरसं पर्यनुयुनक्ति । प्रीत्याश्च सम्बन्धः केनापि रसविशेषेण सह न, वस्तुतः सा तु ईदृग् भावः, या ह्यभिरुचेः पर्यायत्वेन ग्रहीतुं शक्यास्ति । भोजः प्रीति मुदाहरति—

इति विस्मृतान्यकरणीयमात्मनः
सचिवावलम्बितधुरं नराधिपम् ।
परिवृद्धरागमनुबद्धसेवया
मृगया जहार चतुरेव कामिनी ।।

(सरस्वतीकण्ठाभरणम्, ५/६७)

रुद्रटात् प्राक् प्रेयोरसमुल्लिखन् न कोऽप्याचार्यः प्राप्यते, परं प्रेयोऽलङ्कारस्य लक्षणमुदाहरणं चावलोक्य तद्रसस्य सङ्केतोऽवश्यमधिगम्यते । भामहप्रस्तुतीकृतस्य प्रेयोऽलङ्कारस्य स्वरूपमिदम्—

प्रेयो गृहागतं कृष्णमवादीद् विदुरो यथा ।
अद्य या गोविन्द मम जाता त्वयि गृहागते ।।
कालेनैषा भवेत् प्रीतिस्तवैवागमनात् पुनः ।

(का० अ०, ४/५)

भामहस्य कथनमिदं दण्डिना परिवर्धितम्—

प्रेयः प्रियतराख्यानम् ···।

**अद्य या मम गोविन्द जाता त्वयि गृहागते।**
**कालेनैषा भवेत् प्रीतिस्तवैवागमनात् पुनः॥**
**इत्याह युक्तं विदुरो नान्यतस्तादृशी धृतिः।**
**भक्तिमात्रसमाराध्यः सुप्रीतश्च ततो हरिः॥**

(का० आ० २/२७५-२७७)

अस्मिन्नेव सन्दर्भे दण्डिनोदाहरणान्तरमपि प्रस्तुतीकृतम्—

**सोमः सूर्यो मरुद् भूमिर्व्योम होतानलो जलम्।**
**इति रूपाण्यतिक्रम्य त्वां द्रष्टुं देव के वयम्॥**
**इति साक्षात् कृते देवे राज्ञो यद् रातवर्मणः।**
**प्रीतिप्रकाशनं तच्च प्रेय इत्यवगम्यताम्॥**

(का० आ० २/२७८-२७९)

भक्तिभाव एव प्रेयोविषय इति दण्डिप्रस्तुतोदाहरणान्तरेण सिद्ध्यति परम् उद्भटो रत्यादिस्थायिभावानुभावादिभिः साकमलङ्कारमेतमनुबध्नाति-

**रत्यादिकानां भावानामनुभावादिसूचनैः।**
**यत्काव्यं बध्यते सद्भिस्तत् प्रेयस्वदुदाहृतम्॥**

(का० सा० सं०, ४/२)

एतस्यालङ्कारस्योदाहरणे सुतवत्सलाया जनन्या वात्सल्यं सः प्रस्तवीति-

**इयं च सुतवात्सल्यान्निर्विशेषा स्पृहावती।**
**उल्लापयितुमारब्धा कृत्वेयं क्रोड आत्मनः॥**

प्रेयोलङ्कार आदरं भक्तिञ्च व्यतिरिच्य वात्सल्यमपि ज्ञापयतीत्येतच्च सिद्ध्यत्येभिरुदाहरणैः।

अलङ्कारवादिनो भामहोद्भटदण्डिन आचार्या रतिं रसवदलङ्कारायोजितां कुर्वन्ति। रतिसादृश्यकामयमानाः सर्वेऽपि प्रणयेतरभावाः प्रेयस्वतो न भिन्ना स्तत्रैव ते निस्यूताः इत्येतदुपरिकृतविवेचनेन निष्पद्यते।

के भावाः रस इत्येतेन व्यपदिष्टाः स्युरित्येतस्य प्रश्नस्योत्तरे कथ्यते इदम्—

'ये भावाः सन्ति सहजाः स्वाभाविकास्ते स्थायिभावाः' इति वक्तव्याः, नान्ये। भगवदनुरागो, देशप्रेम, राजभक्तिरन्ये चैतद्विधाः न सन्ति सहजभावाः मानवस्य मनसि तेषां स्वतोऽनुद्भूतत्वात्। उपदेशप्रवचन-प्रशिक्षणाद्युत्पन्नत्वात्, तत्सम्बद्धकाव्ये, काव्यशास्त्रीयशब्दावली 'रस' इत्येतन्न

परिभाषते । अतः रस इति न तत्र संगच्छते, भाव इत्येव तत्र युक्तत्वेन प्रतीयते ।

भवतु नाम केषाञ्चन जनानां जिह्वया भक्तिर्भाव इति समुच्चरिता । परं भक्तिर्हि रसकोटिमाटीकते न वेत्यत्रान्तःकरणमेव प्रमाणम् । भक्ति-परिपूर्णानि स्तोत्राणि, भक्तिविभाविताः स्तुतीः किं वा भक्तिमयान् श्लोकान् आकर्ण्याधीत्य वा भक्तिसमुल्लसितानि दृश्याणि चरितान्यभिनयान् वा सम्प्रेक्ष्यापि मानवः कोऽहं क्वाहमित्येतदादिकं सर्वं विस्मृत्य परमात्मनि निलीयमान इव जायते सोऽपि समाधिस्थस्य योगिनोऽवस्थां प्रपद्यते । एतद् विधं यत् साधारणीकरणमस्ति यत् तदेव वर्तते यद् वीरशृङ्गारकरुणादिभिः सञ्जायते । पुनः कथं न भक्ती रस इत्येतेन नाम्ना वक्तुमुचिता ? यो धर्मो यो गुणो यद् वैशिष्ट्यं शृङ्गारादिषु दृश्यते स धर्मोऽसौ गुणस्तद्-वैशिष्ट्यमत्रापि पूर्णतया परिलसति । एतावत्तैव नात्र भक्त्यां, परमियं भक्तिस्तु तान् शृङ्गारादिकानपि अतिक्रम्य विजृम्भते । भक्त्या यद् भक्तभगवतोर्मध्ये एकत्वं किं वा साधारण्यं—साधारणीकरणत्वमुद्भवति तस्मिन्नुदिते सति भक्तो यमानन्दं विन्दति स आनन्दः शृङ्गारादिरसजनितमानन्दं मलिनी-करोति । भक्तिजनितानन्दे यद् वैलक्षण्यं यद् वैशिष्ट्यं यत्सुन्दरत्वं शोभते तत्सर्वथैव शृङ्गारादिजनितवैलक्षण्यवैशिष्ट्यसुन्दरत्वानि विजित्योच्चतमे-आसनेऽधिष्ठित भवति ।

**यदि चिकीर्षसि सौहृदमात्मनः परिजिहीर्षसि यद्यघबन्धनम् ।**
**यदि तितीर्षसि संसृतिसागरं श्रयमयस्करमीश्वरसेवनम् ।।**

**यदि वराक सुकर्मविपाकतः करतले पतितस्तव शेवधिः ।**
**तमखिलापदपाकरणक्षमं नयसि मूढ निरर्थकतां कथम् ।।**

**अमलशीलकुलश्रुतविश्रुतं सदसदर्थविचारविशारदम् ।**
**पुरजिदर्चनसौख्यपराङ्मुखं नयसि मानस मानुषजन्म यत् ।।**

(स्तुतिकुसुमाञ्जलिः, १०/४६, ४७, ४८)

**धारा गिरेरिव तरीव सकर्णधाराधारार्पणी तव दृगूपरवर्षधाता ।**
**धारापुरीव सुखदा दुरितासिधारा धारापरार्तिहरणे हतषड्विधारा ।।**

(स्तु०कु०, ३०/५५)

भक्तस्य विनय-दैन्य-सरलशुद्धवाणी श्रोतारमनन्तसुखसागरे निलीनं करोति, तं सा अमृतमिव पाययति, तं सा सर्वाभ्योऽपि चिन्ताभ्य आकृष्य,

संसारस्य सर्वेभ्योऽपि सम्बन्धेभ्यो दूरीकृत्यानन्दमयं विदधाति—

**कदाहं हे स्वामिञ्जनिमृतिमयं दुःखनिविडं**
**भवं हित्वा सत्ये नवरतसुखे स्वात्मवपुषि ।**
**रमे तस्मिन्नित्यं निखिलमुनयो ब्रह्मरसिका**
**रमन्ते यस्मिंस्ते कृतसकलकृत्या यतिवराः ।।**

**पठन्त्येके शास्त्रं निगममपरे तत्परतया**
**यजन्त्यन्ये त्वा वै ददति च पदार्थास्तव हितान् ।**
**अहं तु स्वामिस्ते शरणमधुना यामि भगवन्**
**भवेत् प्रीतिः शुद्धा मम हि सुदृढा नाथ सततम् ।।**

केचन बुधा वात्सल्यमस्ति सहजभावस्तस्मात् तत्सम्बद्धं काव्यं रसात्मकं मन्तव्यमिति शंसन्ति । एवं रसमुद्दिश्य दृश्यन्तेऽनेके विचाराः ।

मूलरसाः के इत्येषोऽत्र प्रश्न उत्तिष्ठति । यद्यपि विभिन्नैराचार्यैरष्टत एकादश यावद् रसा मताः परं कियन्त आचार्यास्तु प्रधानताप्रधानतादृष्ट्या पृथक् पृथङ् मूलरसान् विभावयन्ति । स्वयं भरतो मुनिरष्टसु रसेषु शृङ्गार-रौद्र-वीर-बीभत्सरसांश्चतुरः प्रमुखान् मत्वा अवशिष्टानां चतुर्णां रसानामुद्भव उक्तेभ्यश्चतुर्भ्यो भवतीति मन्वानो लिखति—

**शृङ्गाराद्धि भवेद्धास्यो रौद्राच्च करुणो रसः ।**
**वीराच्चैवाद्भुतोत्पत्तिर्बीभत्साच्च भयानकः ।।**

**शृङ्गारानुकृतिर्या तु, सा हास्यस्तु प्रकीर्तितः ।**
**रौद्रस्यैव च यत् कर्म स ज्ञेयः करुणो रसः ।।**

**वीरस्यापि च यत् कर्म सोऽद्भुतः सुप्रकीर्तितः ।**
**बीभत्सदर्शनं यत्र ज्ञेयः स तु भयानकः ।।**

अथ चैतद् व्यतिरिच्य स्वस्वदृष्ट्या कमप्येकमेव रसविशेषं रसत्वेन केचन मन्यन्ते । एतादृशी बहुविधा मान्यता साहित्यशास्त्रे प्राप्ता जायते । अस्मिन् विषये कानिचन मतान्युद्दिश्यन्तेऽत्र—

(१) महाकविर्भवभूतिः करुणरसमेवैकं रसमुद्भावयन् स्वकीये उत्तररामचरिते लिखति—

**एको रसः करुण एव निमित्तभेदाद् भिन्नः पृथक् पृथगिवाश्रयते विवर्तान् ।**
**आवर्तबुद्बुदतरङ्गमयान् विकारान् अम्भो यथा सलिलमेव हि तत्समस्तम् ।।**

भोजराजः स्वकीये शृङ्गारप्रकाशे शृङ्गाररसमेव एकमात्रमूलरसं मन्यते इत्युपरि कथितम् ।

**यो यून एव न रसः स्थविरांश्च पुंसः**
**बालान् किशोरवयसश्च समस्तवामाः ।**
**लोकेऽखिलानसुधरांश्च करोति मत्तान्**
**शृङ्गार एव स रसः प्रमुखोऽस्ति तस्मात् ।।**

नारायणोऽद्भुतमेव किञ्च अभिनवगुप्तः शान्तरसमेव मूलरसत्वेन निर्धारियति । एतत् प्रागपि कथितमेव ।

वस्तुतोऽत्र सर्वत्र स्वकीया रुचिरेव प्राधान्येन विचरति । शृङ्गार एव रस एको वा करुण एव एको रस इत्येतदादीनि वचांसि वक्तुं स्वां रुचिं वा तस्मिंस्तस्मिन् रसे स्वकीयमनुरागमेव प्रकटीकुर्वन्ति न तानि वचांसि सर्वजनमान्यसिद्धान्तत्वेनादृतानि भवितुमर्हन्ति ।

आनन्दो वा रस एव काव्येऽनिवार्य्य तत्त्वं वर्तते इत्येतदादित एव प्रदर्शितमस्ति । भामहः काव्यप्रयोजनानि प्रतिपादयन् प्रीतिमपि तत्र सन्निवेशयति । वस्तुतः प्रीतिरपि मूलत आनन्दानुभूतिसीमायामेवाविशति ।

भामहप्रदत्तमहाकाव्यलक्षणे रसस्योपादेयता स्वीकृतास्त्येकत एकतश्चलोकसाधारणं दृष्ट्यां निधाय सः (भामहः) काव्यात्मिकायाः संकल्पनायाः प्रत्यक्षं स्वरूपमाकलयन् प्रकारान्तरेण साधारणीकरणसम्बन्धिनीमवधारणां च सादरं स्पृशति ।

यद्यपि भामह इव दण्ड्यपि रसस्य स्पष्टतया व्याख्यां कुर्वाणो न प्राप्यते परं महाकाव्यस्य विवेचने स यदुपन्यस्यति तेन तस्य रसाविरोधित्वमेव न, परं रसपक्षपातित्वमपि प्रकटीभवति । दण्डी सहृदयस्य मानसभूमिं पश्यन् वर्णनीयं विषयं व्यवस्थापयति । तत्कृतेन महाकाव्यलक्षणेन सः सामाजिकं सदा स्वदृष्टेः पुरो निदधातीत्येतत् तत्त्वं स्पष्टतयावगतं जायते ।

उद्भटः प्रेयस्वद्रसवदूर्जस्विसमाहितालङ्काराणां विवेचने रसे स्वकीयामास्थां व्यक्तीकुर्वन् दृश्यते ।

अभिव्यञ्जनावैशिष्ट्यस्यापादेयतां सम्यग् दृष्टौ निदधदुद्भटो रसानुभूतिं विवृणोतीत्येतदपि वर्ततेऽत्र ज्ञेयम् ।

रसस्यापकर्षो दोष इति कथ्यते । मुख्यार्थभूतं रसं वाच्यार्थो हि संश्रयत्यतो वाच्यार्थोऽपि मुख्यार्थो मतः । अस्मादेव कारणात् रसेन सह

चमत्कारिणो वाच्यस्यापकर्षकारकोऽपि दोष इत्युच्यते। अयं हि अर्थदोष इत्युच्यते। शब्दो हि रसस्य वाच्यस्य च बोधने उपकारको भवति अतस्तत्रापि दोषस्थितिर्भवति। अयंञ्च पददोष इति निगद्यते। आचार्यमम्मटविश्वनाथ-प्रभृतयो दोषे पर्याप्तं विचारं कुर्वन्तो दृश्यन्ते। रसविरोधस्य (रसभङ्गस्य) कारणान्यनेकानि भवन्ति। तत्रान्यतममस्ति विरोधिरसविषयकविभावादिकस्यो-पादानम्। रसादिषु यैर्विरोधो भवति तेषां यत्नपूर्वकं परिहारः करणीयः। रसविरोधीनि कारणानि आचार्य आनन्दवर्धनाचार्यो निर्दिशति—

**विरोधिरससम्बन्धिविभावादिपरिग्रहः।**
**विस्तरेणान्वितस्यापि वस्तुनोऽन्यस्य वर्णनम्॥**
**अकाण्ड एव विच्छित्तिरकाण्डे च प्रकाशनम्।**
**परिपोषं गतस्यापि पौनःपुन्येन दीपनम्।**
**रसस्य स्याद् विरोधाय वृत्त्यनौचित्यमेव च॥**

(ध्वन्यालोकः, ३/१८-१९)

रसशब्देनेह स्थायिभावश्चोपलक्ष्यते। काव्यप्रकाशकारो रसदोषानित्थं निरूपयति—

**व्यभिचारिरसस्थायिभावानां शब्दवाच्यता।**
**कष्टकल्पनया व्यक्तिरनुभावविभावयोः॥**
**प्रतिकूलविभावादिग्रहो दीप्तिः पुनः पुनः।**
**अकाण्डे प्रथनच्छेदौ अङ्गस्याप्यतिविस्तृतिः॥**
**अङ्गिनोऽनुसन्धानं प्रकृतीनां विपर्ययः।**
**अनङ्गस्याभिधानञ्च रसे दोषाः स्युरीदृशाः॥** (७/६०-६२)

परस्परं मित्राणीव रसा एते—

(१) शृङ्गारहास्यौ, (२) शृङ्गाराद्भुतौ, (३) करुणशान्तौ, (४) करुणो भयानको बीभत्सश्च। एतेषु त्रयाणां वा द्वयोर्युगपद् वर्णनेन न भवति कोऽपि व्याघातः। भावोऽयं काव्यास्वादप्राप्तौ न कीदृश्यपि बाधा पतति। परस्परमित्रभूतेषु रसेषु कोऽप्येको रसो भवत्यङ्गी, अन्ये चाङ्गत्वेन मता भवन्ति।

आनन्दवर्द्धनो वदति यत् परस्परशत्रुरसानां विभावानुभावसञ्चारिभावानां ग्रहणं दोषोऽस्ति। तथाहि—

**'प्रसादे वर्तस्व प्रकटय मुदं संत्यज रसम्।**
**न मुग्धे प्रत्येतु प्रभवति गतः कालहरिणः॥'**

किञ्च—**'मानं मा कुरु तन्वङ्गि ज्ञात्वा यौवनमस्थिरम् ।।'**

अनेनैव प्रकारेण प्रणयमानेन प्रियायां न प्रसन्नायां सत्यां कोपावेशेन नायकस्य क्रोधानुभववर्णनं रसं भनक्ति।

रसानां परस्परविरोधस्त्रिधा सम्भवः—

(१) शृङ्गारवीरयोरालम्बनं यदा भवत्यभिन्नं तदा तौ परस्परं विरुद्धौ भवतः। तयोर्विरुद्धत्वं दोषं जनयति।

यदालम्बनाधारे शृङ्गार उत्पद्यते चेत्, तत्रैव वीरोऽपि जायत उद्भूतः (वीरो वा वर्ण्यते) तदा स दोषो मतः। एवमेत्र हास्यरौद्रबीभत्सरसैः सह सम्भोगस्य शृङ्गारस्य सत्यालम्बनैक्ये, किञ्च वीरकरुणरौद्रभयानकादिभिः सह विप्रलम्भशृङ्गारस्यालम्बनैक्ये विरोधो भवति।

(२) एकस्मिन्नेवाश्रये वीरभयानकरसयोः समाविष्टत्वेन रसविरोधः सञ्जायते। युगपदेव नायकस्य वीरत्वेन भीतत्वेन च वर्णनं स्पष्ट एव दोषः।

(३) निरन्तरतातो विभावैकतातश्च दोषः।

शान्तशृङ्गारयोर्विना व्यवधानं हि वर्णनम्।

**'विवक्षिते रसे लब्धप्रतिष्ठे तु विरोधिनाम्।**
**बाध्यानामङ्गभावं वा प्राप्तानामुक्तिरच्छला।।'**

इत्येतदानन्दवर्धनः स्वकीये ध्वन्यालोके (३/२०) ब्रवीति। दोषरहितताया मेतस्यामुक्तायामपि सत्यां सोऽग्रे स्वग्रन्थे प्राह—

'अङ्गभावं प्राप्तानां च तेषां विरोधित्वमेव निवर्तते। अङ्गभावप्राप्तिर्हि स्वाभाविकी समारोपकृता वा। तत्र येषां नैसर्गिकी, तेषां तावदुक्तावविरोध एव। यथा विप्रलम्भशृङ्गारे तदङ्गानां व्याध्यादीनाम्। तेषाञ्च तदङ्गानामेवादोषो नातदङ्गानाम्।

तदङ्गत्वे च सम्भवत्यपि मरणोपन्यासो न ज्यायान्। आश्रयविच्छेदे रसस्यात्यन्तविच्छेदावाप्तेः। विप्रलम्भशृङ्गारे व्याधिस्तु सह्यः।

विरोधिरसदोषं परिहर्तुम् आनन्दवर्धनाचार्यो द्वावुपायौ प्रतिपादयति—

(१) यदा विरोधिरसा अङ्गिरसस्य बाध्यरूपतया वर्णिताः स्युः।

(२) यदा विरोधिरसा अङ्गिरसस्याङ्गभावं प्राप्ताः स्युः।

इयमङ्गरूपता त्रिषु रूपेषु सम्भवा—

(क) स्वाभाविकी अङ्गरूपता।

(ख) समारोपिता अङ्गरूपता।

(ग) प्रधानं रसम्प्रति द्वयोर्विरोधिनोः रसयोर्वा भावयोः अङ्गरूपता।

आनन्दवर्धनस्यैतस्मात् कथनाद् वा तत्सम्बद्धाभ्योऽन्याभ्यो धारणाभ्यः प्रेरणां प्राप्य आचार्यमम्मटः प्रसङ्गमिममधःस्थितविधायां प्रस्तुतीकरोति—

प्रकृतस्य रसस्य विरोधिनो रसा यदि बाध्यरूपेण वर्णिताः स्युस्तदा ते दोषत्वेन न भूत्वा गुणत्वे परिणमन्ते।

काव्यप्रकाशे प्रोक्तमिदमित्थम्—

**'सञ्चार्यादेर्विरुद्धस्य बाध्यस्योक्तिर्गुणावहा।'**

उक्ता स्थितिरुपाययोर्द्वयोः सम्भवा—

(१) आलम्बनैकतायां सत्यां रसस्य विरोधित्वे सति रसो भिन्नालम्बनगतः कार्यः। यथा वीरभयानकयोः एकस्मिन् आलम्बने परस्परविरोधो वर्तते अतो भयानकरसः प्रतिनायके वर्णितो जायते यदा, दोषस्तदा परिहृतो भवति।

(२) शान्तश्रृङ्गारयोर्निरन्तरं युगपद्वर्णनं यदि जायते तदास्ति दोषः, परं तयोरुभयोर्मध्ये रसान्तरस्य वर्णनं यदि विधीयते तदा दोषो दूरीभवति। यथा नागानन्दे 'अहो गीतम् अहो वादित्रम्' इत्येतत् पद्यमद्भुतरसमभिव्यनक्ति। यत्र जीमूतवाहनस्य शान्तरसपरकभावनैकत आलिखिता, एकतश्च मलयवती-निष्ठानुरागश्चित्रितः। इयं स्थितिः शान्तश्रृङ्गारसयोर्विरोधं हिनस्ति।

एतौ द्वावुपायौ व्यतिरिच्य आचार्यो मम्मटस्त्रीनुपायान् निर्दिशति। तेषां संश्रयणेन विरोधिरसानामुपादानं दोषान् गुणेषु परिणमयति—

(क) यदि विरोधिनो रसाः स्मर्यमाणत्वेन वर्ण्यन्ते।

(ख) यदि विरोधिनो रसस्य प्रकृतरससाम्यपूर्वकं वर्णनमिष्टम्।

(ग) विरोधिरसोऽङ्गिनो रसस्याङ्गत्वेन चेद् वर्णितः स्यात्।

संस्कृतसाहित्यशास्त्रे रसानां परस्परमित्रत्वामित्रत्वयोर्जागरूकं चिन्तन-मुदारा च दृष्टिर्दृश्यते। तन्मानवस्य मनसोऽतलगम्भीरतां काव्यद्वारेण प्रस्तवीति। मनोविज्ञाने तदीयं नैपुण्यं यादृशं समीचीनं वर्तते तादृशं समीचीनत्वं तत्र नान्यत् किमपि निदधाति। अस्मादेव हेतोः काव्येषु जनसामान्यस्य नितरां प्रगाढः सान्द्रानुरागोऽस्ति परमश्रद्धामयः। जनता काव्यान्मनोविनोदमश्नुते, सा ततः स्वगन्तव्यमध्वानं जानाति, श्रेष्ठमादर्शञ्च जीवनं तत एव वेत्तुं सा प्रवर्तते। एतद्विधं वन्दनीयं वैशिष्ट्यं पातुं वर्धयितुञ्च संस्कृतकवयः संस्कृत-साहित्यशास्त्रिणोऽनिशं प्रयतमाना एव सम्प्रेक्ष्यन्ते।

आचार्य आनन्दवर्धनो ध्वनिं काव्यस्यानिवार्यतत्त्वत्वेन स्वीकुर्वाणो न केवलं तमात्मत्वेनोपपादयाम्बभूव; अपितु रसं हि तस्य (ध्वनेः) अन्यतमभेद त्वेनापि प्रास्तावीत्। स तमसंलक्ष्यक्रमव्यंङ्ग्यत्वेन मन्यते किं वा रसस्यापरं नाम अस्ति 'असंलक्ष्यक्रमव्यङ्ग्यम्' इति।

साहित्यशास्त्राचार्याः, विशेषेण आनन्दवर्धनाचार्यः, परिवर्तिन आचार्याः अपि रस इत्यत्र भाव-भावाभास-रसाभास-भावोदय-भावशान्ति-भावशबलता-भाव-सन्ध्याद्यष्टानामपि सन्निवेशं कुर्वन्ति। काव्यप्रकाशे प्रोक्तम्—

**'रसभावतदाभासभावशान्त्यादिरक्रमः ।**
**भिन्नो रसाद्यलङ्कारादलङ्कार्यतया स्थितः ।।'** (४/२६)

रसादिकं ध्वनेर्भेदत्वेन मत्वा आनन्दवर्धनो रसादेः सर्वेष्वप्युदाहरणेषु व्यंग्यार्थोऽनिवार्यतया विराजते इत्यभिव्यनक्ति। स मन्यते यद् वाच्यार्थस्य प्रतीतेरनन्तरं सहृदयो रसमास्वादयितुं नैव शक्नुते। ध्वन्यालोकेऽत्र कारिकेयं वर्तते—

**'रसभावतदाभासतत्प्रशान्त्यादिरक्रमः ।**
**ध्वनेरात्माङ्गिभावेन भासमानो व्यवस्थितः ।।'** (२/३)

रसादिरर्थो हि सहैव वाच्येनावभासते। स चाङ्गित्वेनावभासमानो ध्वनेरात्मा।'

रस्यते आस्वाद्यते इति रस इत्येतद्व्युत्पत्त्यनुसारेण रसो, भावो रसाभासो भावभासो भावशान्त्यादिकाः सर्वेऽप्येते रसश्रेण्यामायान्ति।

प्राधान्येन प्रतीयमाना रसादिका ध्वनेरात्मत्वेन मता इत्येतदाशयकं यद् वाक्यमुक्तं तेनेदमपि प्रतीयते यद् रसादिकानां प्रतीतिः क्वचित् क्वचित् अङ्गत्वेन-अप्रधानत्वेन-च समुपस्थिता भवति। यत्र रसादिका अङ्गरूपे प्रतीयन्ते तत्र रसादिका ध्वनिरूपा न भूत्वा रसवदाद्यलङ्काररूपा भवन्ति।

रसवदलङ्कारश्चतुर्विधः। रसोऽन्यस्य रसादेरङ्गत्वं याति यदा, भवति तदा रसवदलङ्कारः। भावस्य अन्याङ्गत्वेन प्रतीतत्वे प्रेयः, भावाभासस्य रसाभासस्य वाङ्गत्वेन ऊर्जस्वी, भावशान्त्यादेश्च अङ्गतायां समाहितोऽलङ्कारो भवति।

ध्वनेर्विषयो रसवदाद्यलङ्कारेभ्यः पृथक्—इत्येतद् ज्ञापयितुं ध्वन्यालोककारो ब्रूते···

**'वाच्यवाचकचारुत्वहेतूनां विविधात्मनाम् ।**
**रसादिपरता यत्र स ध्वनेर्विषयो मतः ।।** (२/४)

**प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गन्तु रसादयः ।**
**काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः ।। (२/५)**

दण्डी रसवदलङ्कारं काव्यादर्शे (२/३७७) प्रस्तवीति—

**रसवद् रसपेशलम्**

उद्भटः काव्यालङ्कारसारसंग्रहे (४/३) अत्रेदं वदति—

**रसवद्दर्शितस्पष्टशृङ्गारादिरसादयम् ।**
**स्वशब्दस्थायिसञ्चारिविभावाभिनयास्पदम् ।।**

प्रेयस्वदलङ्कारः क इत्यत्रोद्भट एव तत्रैव (४/३)

**'रत्यादिकानां भावानामनुभावादिसूचकैः ।**
**यत्काव्यं कथ्यते सद्भिस्तत् प्रेयस्वदुदाहृतम् ।।'**

इति कथयति ।

अयमेवोद्भटस्तस्मिन्नेव स्वकीये ग्रन्थे ऊर्जस्विनमलङ्कारं प्रस्तौति—

**अनौचित्यप्रवृत्तानां कामक्रोधादिकारणात् ।**
**भावानाञ्च रसानाञ्च बन्ध ऊर्जस्वि कथ्यते ।।** (४/५)

अथ सम्प्रति तदुक्तः समाहितोऽलङ्कार इह निधीयते—

**रसभावतदाभासवृत्तेः प्रशमबन्धनम् ।**
**अनन्याभावनिश्शून्यरूपं यत् तत् समाहितम् ।।** (४/५)

अस्मिन् सन्दर्भे उद्भटेन प्रस्तुतीकृतस्योदात्तालङ्कारस्यैको भेदोऽप्यवेक्षणीयोऽस्ति । तत्र तद्ग्रन्थव्याख्यात्रा प्रतिहारेन्दुराजेन अङ्गभूतरसादिर्द्वितीयोदात्तालङ्कारान्तर्गतो विहितः । तदीयं तत्कथनमलङ्कारसर्वस्वकारेणापि रुय्यकेन सम्पोषितम् ।

अलङ्कारसिद्धान्तस्य भामहदण्ड्युद्भटेषु त्रिष्वाचार्येषु सर्वप्रमुख आचार्योऽस्ति भामहः । दण्डी भामहमुद्भटश्च दण्डिभामहावनुचक्रतुः । एते त्रयोऽप्याचार्या रसस्य महत्तां स्वीकुर्वाणा अपि तं (रसम्) स्वतन्त्रस्थानाधिष्ठितं न विधाय अलङ्कार एव तस्यान्तर्भावं विधातुं प्रायतिषत ।

भामहो दण्डी उद्भटश्च रसं भावं रसाभासं भावाभासं च यथाक्रमं रसवत्प्रेयः उर्जस्विनमलङ्कारनाम्नाभिदधति । उद्भटः समाहितं नाम अलङ्कारं भावशान्तेः पर्यायत्वेन मन्यते । भामहो दण्डी च समाहितालङ्कारं निरूपयन्तौ प्राप्येत । परं समाहितेन सह रसस्य सम्बन्धो दुश्शक एव ।

साहित्यदर्पणकारः प्राह—

रसभावौ तदाभासौ भावस्य प्रशमस्तथा।
गुणीभूतत्वमायान्ति यदालङ्कृतयस्तदा॥
रसवत्प्रेय ऊर्जस्वि समाहितमिति क्रमात्।

(दशमपरिच्छेदे, पृ० ७८०)

अप्पय्यदीक्षितश्च ब्रूतेऽत्र—

रसभावतदाभासभावशान्तिनिबन्धनाः।
चत्वारो रसवत्प्रेय ऊर्जस्वि च समाहितम्॥
भावस्य चोदयः सन्धिः शबलत्वमिति त्रयः।

भावोऽयम् रसः, भावः, रसाभासः, भावाभासः क्रमेण रसवत्प्रेय-ऊर्जस्विसमाहिताख्याश्चत्वारोऽलङ्कारा भवन्ति। तद्व्यतिरिच्य भावोदय-भावसन्धि-भावशबलता इत्येते त्रयोऽलंकारा अपि भवन्ति। एते च सर्वे सङ्कलनेन सप्त भवन्ति। अतः सोऽग्रे वक्ति—

अष्टौ प्रमाणालङ्काराः प्रत्यक्षप्रमुखक्रमात्।
पञ्चदशानन्यानप्यलङ्कारान् विदुर्बुधाः॥

(कुवलयानन्दे, पृ० २६८, ३६९)

केषाञ्चनालङ्कारवादिनामित्येतच्च कथनमत्र—

अङ्गिन एते रसभावरसाभासभावाभासशान्तयः क्रमेण रसवत्प्रेय-ऊर्जस्वि-समाहितालङ्कारेषु गण्यन्ते। किञ्च अङ्गभूता रसादिका द्वितीयोदात्तालङ्कारेऽन्तर्भवन्ति।

रसगङ्गाधरकारो रसवदाद्यलङ्कारान् न निर्दिशति। सः अनुचितविभावालम्बनत्वं रसाभासत्वम् इत्येतदादिकमुक्त्वा भावशबलत्वं यावल्लक्षणानि तेषां सर्वेषामुपस्थापयति केवलम्।

काव्यप्रकाशकारमम्मटेनापि रसवदाद्यलङ्काराणां न पर्याप्ता चर्चा वा विशेषोल्लेखश्च कृतः। सर्वेषामप्येषामुदाहरणानि लक्षणनिर्देशं च सामान्यतोऽसौ चकार।

अलङ्कारवादिनामाचार्याणां विचारो रसध्वनिवादिनामाचार्याणां विचाराद् भिन्न एव दृश्यते।

रसादेरङ्गित्वं रसवदाद्यलङ्काराणामङ्गत्वञ्च प्रतिपाद्य। 'रसादेरङ्गित्वे

रसवदाद्यलङ्कारः, अङ्गत्वे च सति उदात्तालङ्कारो भवती' त्येतत्कथनं न रसवादिनः स्वीकुर्वन्ति ।

रसादेरलङ्कार्यत्वमुपमादेश्चालङ्कारत्वं यद् ध्वनिकारेणोक्तं तस्य तत्कथनं मम्मट आचार्यः सादरं परिपुष्णाति ।

रसवादिनां ध्वनिवादिनाञ्च विवेचनस्यायं सारः—

(१) येषु स्थलेषु रसभावाद्यष्टावप्यङ्गित्वेन निरूप्यन्ते तत्र ते क्रमेण रसभावादिनाम्नोच्यन्ते ।

२) (परं) येषु स्थलेषु रसभावाद्यष्टावप्यङ्गत्वेन निरूप्यन्ते तत्र तेऽलङ्कारा इति कथ्यन्ते । तदेवम्—

(क) अङ्गभूतो रसो रसवदलङ्कारः ।

(ख) अङ्गभूतो भावः 'प्रेयः' अलङ्कारः ।

(ग) अङ्गभूतो रसाभासो भावाभासश्च 'ऊर्जस्वी' अलङ्कारः ।

(घ) अङ्गभूतो भावशान्तिः 'समाहितो' ऽलङ्कारः ।

(ङ) अङ्गभूतभावोदय-भावसन्धि-भावशबलताश्च क्रमशो भावोदयादिका अलङ्काराः कथ्यन्ते ।

शृङ्गाररसस्याङ्गित्वेन रसवदलङ्कारो भवति सः (शृङ्गारः) इति केचन अलङ्कारवादिनो वदन्ति, परं ध्वनिवादिनो रसवादिनश्च शृङ्गार रस इत्येव मन्यन्ते ।

अङ्गभूतवीरवात्सल्यादिरसान् अलङ्कारवादिन उदात्तालङ्कार इति नाम्ना व्यपदिशन्ति । परं रसध्वनिवादिनस्तान् (अद्भुतवीरवात्सल्यादिरसान्) रसवदलङ्कारनाम्ना व्यवहरन्ति ।

**'रसादिरिति मे मतिः'** इत्युक्त्वा आचार्येण आनन्दवर्धनेन मतभेदस्य सूचना प्रदत्तास्ति ।

वृत्तिकारेणापि **'रसवदलङ्कारस्यान्यैर्दर्शितो विषयः'** इत्युल्लिख्य मतभेदो निर्दिष्टः ।

केचिद् बुधा वदन्ति—

अलङ्काराः कटककुण्डलादिरिव, ते साक्षात् वाच्यवाचकयोरुपकारकाः, परम्परया रसस्योपकारका अपि भवन्ति । यथा कटककुण्डलादिकाः साक्षाच्छरीरस्योपकारकाः, शरीरद्वारेण च आत्मन उपकारकत्वात् अलङ्काराः इति कथ्यन्ते तथैव उपमाद्यलङ्काराः शब्दार्थौ प्रत्यक्षतयोपकुर्वन्ति तद् (शब्दार्थं)

द्वारेण रसमुपकुर्वन्ति। परं रसवदाद्यलङ्कारा वाच्यवाचकयोः (अर्थस्य, शब्दस्य) उपकारका न भूत्वा साक्षाद्रसादिकानामुपकारका भवन्ति। अतस्तत्र नालङ्कारस्य लक्षणं घटते। अतो न रसवदादिकाः अलङ्काराः। एतादृश्यां स्थित्यां यत्र रसादिका अन्यस्याङ्गभूताः सन्ति, तत्र रसवदादिकानामलङ्कारत्वेन व्यवहरणं नोचितम्, अपि तु गुणीभूतव्यङ्ग्यत्वमिति कथनं युक्तमिति।

रसवदलङ्कारमधिकृत्योत्थापितामिमामापत्तिमपनेतुं केचन चिरन्तनव्यवहारानुरोधाद् रसोपकारकत्वं तेषां (गुणीभूतरसानाम्) विमृश्य, तत्र भाक्तमलङ्कारव्यवहारं मत्वा कथञ्चित् तेषां रसवदादीनामलङ्कारत्वमुपपादयन्ति।

अपरे तु तां समस्यां समाधातुम् अलङ्कारलक्षणे शब्दार्थयोः समावेशं व्यर्थं प्रतिपाद्य रसोपकारकत्वमेवालङ्कारस्य मुख्यलक्षणत्वेन मत्वा गुणीभूतरसानामुपकारकत्वात् तत्र रसवदलङ्कारत्वमुपपादयन्ति। एतेषां सोऽलङ्कारव्यवहारो भाक्तो न, मुख्य एवास्ति। एतेऽलङ्कारलक्षणमित्थं परिष्कुर्वन्ति—

**'समवायसम्बन्धावच्छिन्नचमत्कृतित्वावच्छिन्नजन्यतानिरूपितसमवायसम्बन्धावच्छिन्नज्ञानत्वावच्छिन्नजनकतानिरूपितविषयत्वसम्बन्धावच्छिन्न शब्दार्थान्यतरनिष्ठावच्छेदकतानिरूपितावच्छेदकतावत्त्वमलङ्कारत्वम्।'**

रसवदलङ्कारविचारे सति गुणीभूतव्यङ्ग्यस्यापि विचार उपस्थितो भवति। अलङ्काराः साक्षात् शब्दार्थयोरेवोपकारका भवन्ति, गुणीभूतरसास्तु शब्दार्थोपकारका न भूत्वा साक्षाद् रसान्तरस्योपकारका भवन्ति। अतस्तत्र अलङ्कारस्य सामान्यलक्षणं न घटते। तेन ते (गुणीभूतरसाः) रसवदलङ्कारा न, अपितु गुणीभूतव्यङ्ग्याः रसाः) ते इति। इमं हि विचारं केचन व्यक्तीकुर्वन्ति। एतद्वादिनां मते ध्वनिः, गुणीभूतव्यङ्ग्यमित्येते द्वे स्तः। न च ताभ्यां भिन्नं रसवदलङ्काराभिधं किमपि तृतीयं वस्तु।

परं ध्वनिकारो रसवदाद्यलङ्कारानपि मन्यते किञ्च गुणीभूतव्यङ्ग्यमपि मन्यते। एतस्य मतेन रसादिध्वनेरपराङ्गत्वे सति रसवदाद्यलङ्काराः, वस्तुध्वनेर्वा अलङ्कारध्वनेश्चापराङ्गत्वे सति गुणीभूतव्यङ्ग्यं भवतीति मन्तव्यम्।

रसवदलङ्कारमधिकृत्य कारिकातो द्वितीयः सङ्केतोऽयमुपलभ्यते। तस्य स्वरूपमिदम् (केषाञ्चन मतेन)—

(१) चेतनस्य वाक्यार्थीभूतत्वे रसवदाद्यलङ्काराः।

(२) अचेतनस्य वाक्यार्थीभूतत्वे उपमाद्यलङ्कारा भवन्ति। एतेषां मतस्यायं भाव:—

अचेतनस्य वाक्यार्थीभूतत्वात् तत्र चित्तवृत्तिरूपरसादेरसम्भवात्। तद्वर्णने रसवदलङ्कारस्य सम्भावना नास्ति। एतद्धेतोस्तेषामुपमाद्यलङ्कारविषयत्वमेतस्य च वाक्यार्थीभावे रसवदलङ्कारस्य विषयत्वं मन्तव्यम्। आलोककारेण 'इति मे मति' रित्येतल्लिखित्वा एतस्यैव मतस्य विरोधे स्वसम्मतिः प्रदर्शितास्ति। तदीयकथनस्याभिप्रायोऽयम्—

(१) यत्र रसादेः प्रतीतिः प्रधानतया भवति तत्र रसध्वनेः विषयोऽवगन्तव्यः।

(२) यत्र मुख्यो रसोऽलङ्कार्योऽस्ति, कश्चिदपरोऽपि रसोऽङ्गभूतो न, तत्रोपमाद्यलङ्कारस्य क्षेत्रं ज्ञेयम्।

(३) यत्र रसादिरङ्गरूपत्वेन वर्तते तत्र रसवदलङ्कारो भवति। इत्थ ध्वनेः, उपमाद्यलङ्काराणां, रसवदलङ्काराणाञ्च विषयभेदः सम्भवति, स्थानस्वरूपयोर्निर्धारणं तस्य तस्य हि भवतीत्याशयः। अथ च चेतनाधारे भेदान् ये कुर्वन्ति तेषां मतेन विभागोऽयं न सम्भवति।

ध्वन्यालोककार एतद्विधान् विचारान् प्रकटीकुर्वन् 'तरङ्गभ्रूभङ्गा क्षुभितविहगश्रेणिरशना' इत्येतदाद्युदाहरणद्वारेण अचेतनवस्तूनां वाक्यार्थीभावत्वेऽपि (प्रधानत्वेऽपि) विभावादिद्वारेण कथञ्चिच्चेतनवस्तूनां व्यवहारस्य योजना भवत्येव, यत्र च चेतनवस्तुवृत्तान्तस्य योजनास्ति तत्र रसवदाद्यलङ्कारो मतो भवति इति विवेचनाञ्च निधत्ते। एवं स्थिते हि, उपमाद्याङ्काराः सर्वथा निर्विषयतां गमिष्यन्ति अथवा तदीयान्युदाहरणानि नितरां न्यूनानि प्राप्तानि भविष्यन्ति। यतो हि एतादृशः कोऽपि अचेतनवृत्तान्तो न प्राप्तः स्याद् यत्र चेतनवस्तुवृत्तान्तस्य सम्बन्धोऽन्ततो गत्वा विभागरूपेणैव न संगतः सिद्ध्येत्। अतः, रसादेः अङ्गत्वे सति रसवदलङ्कारा भवन्ति, यश्च अङ्गी रसो वा भावः सर्वथैवास्त्यलङ्कार्यः स ध्वनेः (आत्मनः) स्वरूपमस्ति।

तदेवं चेतनवस्तुनो वाक्यार्थीभावत्वे रसवदलङ्काराः, अचेतनवस्तुनो वाक्यार्थीभावत्वे, उपमाद्यलङ्कारा भवन्ति इत्येतत् परमतं युक्तं न, अचेतनवस्तुना सार्धं चेतनवृत्तान्तस्य सम्बन्धो भवत्येव, तथात्वे सर्वत्र रसवदाद्यलङ्काराः स्युः उपमाद्यलङ्कारास्तु निर्विषयतां गच्छेयुः किं वा अचेतनपरकं काव्यं नीरसं सिद्ध्येदित्येतदात्मकं विवरणं प्रस्तौति।

वक्रोक्तिजीवितकारः कुन्तकः कृत्स्नतया रसवादिनां मतं परिपुष्णाति। अत्र तद्विचारस्य स्वल्पोंऽशः प्रस्तूयते। स भामहदण्डयुद्भटाचार्याणामलङ्कार-वादिनां मतं प्रतिवदन् रसवादिन इव रसादिकमलङ्कारं न मन्यते। सः कथयति—

**शरीरं चेदलङ्कारः किमलङ्कुरुते परम्।**
**आत्मैव नात्मनः स्कन्धं क्वचिदप्यधिरोहति॥**

(वक्रोक्तिजीवितम्, १/१३)

अस्मिन्नेव सन्दर्भे सः प्राह—

"रसो विद्यते यस्येति मतुपि कृते सति, रसवतोऽलङ्कारो रसवदलङ्कार इति षष्ठीसमासः क्रियते वा रसवांश्चासावलङ्कारश्चेति विशेषणसमासः— इत्येतदादिकमाभाष्य उभाभ्यामपि विग्रहाभ्यामलङ्कार्यस्यालङ्कारत्वं न सङ्गच्छते" इति स कथयित्वा

**अलङ्कारो न रसवत् परस्याप्रतिभासनात्।**
**स्वरूपादतिरिक्तायाः शब्दार्थासङ्गतेरपि॥** (व० जी० ३/१०)

आचार्यः कुन्तकोऽलङ्कारवादिनां मतमेव न निरस्यन् दृश्यते, स रसवद-लङ्कारस्वरूपविषये रसवादिनामपि मतं नानुमन्यते। अङ्गभूतो रसोऽल-ङ्कारत्वेन प्रोक्तः स्यादिति न सः स्वीकुरुते। परम्परां विरुन्धानोऽसौ नितान्तमौलिकं विचारमुपन्यस्यति—

**रसेन वर्तते तुल्यं रसत्वविधानतः।**
**योऽलङ्कारः स रसवत् तद्विदाह्लादनिर्मिते॥**

(वक्रोक्तिजीवितम्, ३/१५)

वृत्त्यां स लिखति—

**'तथा स रसवन्नाम यथा···पूर्वप्रत्याख्यातवृत्तिरलङ्कारो रसवदभिधानः। काव्यैकसारतां याति काव्यैकसर्वस्वतां प्रतिपद्यते, सर्वालङ्कारजीवितं सर्वेषा-मलङ्काराणामुपमादीनां जीवितं स्फुटीभूतं सम्पद्यते······।'**

इत्थं रसवदलङ्कारं विवृण्वानोऽसावुदाहरति—

**उपोढरागेण विलोलतारकं तथा गृहीतं शशिना निशामुखम्।**
**यथा समस्तं तिमिरांशुकं तया पुरोऽपि रागाद् गलितं न लक्षितम्॥**

व्याख्यातीत्थं वृत्तिकारः—

**अत्र स्वावसरसमुचितसुकुमारस्वरूपयोर्निशाशशिनोर्वर्णनायां······रूपका-लङ्कारः समारोपितकान्तवृत्तान्तः कविनोपनिबद्धः। स च श्लेषच्छायामनोज्ञ-**

**विशेषणवक्रभावाद् विशिष्टलिङ्गसामर्थ्याच्च···काव्यस्य सरसतामुल्लासयंस्तद्विदाह्लादमादधानः स्वयमेव रसवदलङ्कारतां समासादितवान् ।**

आचार्यविश्वनाथो ब्रूते—

**रसस्य रसान्तरेण पुष्टीकरणाद् रसयोगाद्—रसवद् अलङ्कारो भवति । यथा—'अयं स रसनोत्कर्षी'···इत्यत्र शृङ्गारः करुणस्याङ्गम् ।** (१०/७८१)

भावस्येतराङ्गत्वे प्रेयो भवति । यथा—

**'आमीलितालसविवर्तिततारकाक्षी मत्कण्ठबन्धनदरश्लथबाहुवल्लीम् ।**
**प्रस्वेदवारिकणिकाचितगण्डबिम्बां संस्मृत्य तामनिशमेति न शान्तिमन्तः ॥'**

अत्र सम्भोगशृङ्गारः स्मरणाख्यभावस्य अङ्गम्, स च विप्रलम्भस्य ।
१०/७८१ पृ०

ऊर्जस्वि—(ऊर्जो बलम्, अनौचित्यप्रवृत्तौ तदत्रास्तीति ऊर्जस्वि) रसभावयोराभासस्य इतराङ्गत्वे ऊर्जस्वि भवति । यथा—

**'वनेऽखिलकलासक्ता, परिहृत्य निजस्त्रियः ।**
**त्वद्वैरिवनितावृन्दे पुलिन्दाः कुर्वते रतिम्'।** १०/७८२ पृ० ।

अत्र शृङ्गाराभासो राजविषयरतिभावस्याङ्गम् । समाहितम्—भावप्रशमस्य इतराङ्गत्वे समाहितम् । यथा—

**'अविरलकरवालकम्पनैर्भ्रुकुटीतर्जनगर्जनैर्मुहुः ।**
**ददृशे तव वैरिणां मदः स गतः क्वापि तवेक्षणे क्षणात् ॥**

अत्र मदाख्यभावस्य प्रशमो राजविषयरतिभावस्याङ्गम् । (१०/७८३)

अत्रायं दर्पणकारः परेषामपि मतानि समुल्लिखन् दृश्यते—

(१) 'इह केचिदाहुः—**वाच्यवाचकरूपालङ्कारमुखेन रसाद्युपकारका एवालङ्काराः । रसादयस्तु वाच्यवाचकाभ्यामुपकार्या एवेति न तेषामलङ्कारता भवितुं युक्ता'** इति ।

(२) अन्ये तु, **रसाद्युपकारकमात्रेणेह अलङ्कृतिव्यपदेशो भाक्तः, चिरन्तनप्रसिद्ध्या अङ्गीकार्य एव इत्येतद्** वदन्ति ।

(३) 'अपरे च—**रसाद्युपकारकमात्रेणालङ्कारत्वं मुख्यतो रूपकादौ तु वाच्याद्युपधानम् अजागलस्तनन्यायेन'** इति शंसन्ति ।

अभियुक्तास्तु **'स्वव्यञ्जकवाच्यवाचकाद्युपकृतेरङ्गभूतैः रसादिभिरङ्गिनो रसादेर्वाच्यवाचकोपस्कारद्वारेणोपकुर्वद्भिरलङ्कृतिव्यपदेशो लभ्यते ।**

**समासोक्तौ तु नायिकादिव्यवहारमात्रस्यैवालङ्कृतिता, न तु आस्वादस्य, तस्योक्तरीतिविरहात्** इति मन्यन्ते। अत एव ध्वनिकारेण **'प्रधानं रसादिरिति मे मति'** रित्युक्तम्। यदि च रसाद्युपकारकमात्रेणालङ्कृतित्वम्, तदा वाचकादिष्वपि तथा प्रसज्येत। एवञ्च यत् कैश्चिदुक्तम्—

**'रसादीनामङ्गित्वे रसवदाद्यलङ्कारः, अङ्गत्वेतु द्वितीयोदात्तालङ्कारः' तदपि परास्तम्।**

रसवदादीनामलङ्कारत्वे विकल्पाश्चत्वार उत्तिष्ठन्ति—

(क) रसादिकाः अलङ्काराः न।

(ख) रसवदादिकाः गौणत्वेन अलङ्कारा मता भवितुमर्हन्ति।

(ग) रसवदादिकाः प्रधानतया अलङ्कारा वक्तव्याः।

(घ) रसवदादिका उपमादिका इव अलङ्काराः सन्ति।

एते ते विकल्पाः सन्ति यान् आचार्यविश्वनाथ 'इह केचिदाहु' रित्येतदादिपदपङ्क्तिषु उल्लिखन् प्राप्यते। स न रसवदादिकमलङ्कारत्वेन स्वीकुरुते, न स गौणतया च तान् (रसवदादिकान्) अलङ्कारान् मन्यते, न च स रसवदादिका अलङ्कारा एवेत्यत्र मतिं निबध्नाति।

अलङ्कारस्यालङ्कारत्वं रसोपकारकत्वान्न, रसोपकारस्तु वाचकादिभिः पदपदांशवाक्यार्थादिकैश्च क्रियते परं न तेऽलङ्कारा इति कथ्यन्ते। शब्दार्थोपकारपूर्वकरसोपकारत्वादलङ्कारत्वं मतं भवति।

अलङ्कारा शब्दमर्थञ्चोपकुर्वन्तो रसमुपकुर्वन्ति। एषोऽलङ्कारत्वधर्मो यथोपमाद्यलङ्कारेषु घटते तथैव रसवदाद्यलङ्कारेष्वपि चारितार्थ्यं याति। अङ्गभूतरसादिकाः स्वव्यञ्जकशब्दार्थाभ्यां स्वयमुपकृता भवन्तः प्रधानरसाभिव्यञ्जकशब्दार्थावुपकुर्वन्तः प्रधानं (अङ्गिनम्) रसमुपकुर्वन्ति, न च शब्दार्थोपकारमन्तरेण।

**अयं स रशनोत्कर्षी पीनस्तनविमर्दनः।**
**नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः॥** (महाभारतम्)

इत्यत्र अङ्गभूतः शृङ्गारो रसः स्वव्यञ्जकशब्दार्थाभ्यां ह्युपक्रियमाणोऽङ्गीभूत (प्रधान) करुणरसव्यञ्जकशब्दार्थोपकारद्वारेण तं (प्रधानम्) करुणं रसमुपकुरुते, न च स माधुर्यादिगुण इव रसस्य साक्षादुपकर्तास्ति। अतोऽत्र रसवदलङ्कारः।

सन्ति रसवदाद्यलङ्कारा गुणीभूतव्यङ्ग्यकाव्यस्यैव विषया इति आचार्य-मम्मटो विश्वनाथ आचार्यश्च मन्येते ।

रसवदाद्यलङ्कारानधिकृत्य ध्वनिकारस्य विचारा यद्यप्युपरि निहिताः सन्ति परमिह तदीयांस्तद्विषयकविचारान् पुनर्विशदीकुर्मः—

**'यद्यपि रसवदलङ्कारस्यान्यैर्दर्शितो विषयस्तथापि यस्मिन् काव्ये प्रधान-तयान्यवाक्यार्थीभूतस्तस्य तस्य चाङ्गभूता ये रसादयस्ते रसवदादिकस्य विषया इति मामकीनः पक्षः । स च रसवदादिकः शुद्धसङ्कीर्णभेदेन द्विविधः । यत्र रसः कश्चिदङ्गभूतो भवति तत्र शुद्धो रसवदादिकः ।** यथा—

**'किं हास्येन न मे प्रयास्यसि पुनः प्राप्तश्चिराद्दर्शनम् ।'**

**इत्येतस्मिन्नुदाहरणे करुणरसो, यो रसान्तरेण वा अलङ्कारान्तरेण असङ्कीर्णः, राजविषयकरतेरङ्गमस्ति तस्माद्धेतोः स्पष्ट एव रसवदलङ्कारो-ऽस्ति, स च शुद्धोऽस्ति ।**

**'क्षिप्तो हस्तावलग्नः प्रसभमभिहतोऽप्याददानोंऽशुकान्तम् ।'**

**इत्येतस्मिन्नुदाहरणे त्रिपुरारेः प्रभावातिशयो वाक्यार्थः (मुख्यः) श्लेष सहित ईर्ष्याविप्रलम्भ इह योऽस्ति तस्य अङ्गं करुणो रसः । अलङ्कारान्तरेण सङ्कीर्णत्वात् स रसवदलङ्कारः सङ्कीर्णोऽस्ति ।**

शुद्ध सङ्कीर्णञ्च रसवदलङ्कारं सोदाहरणं प्रदर्श्य ध्वनिरसाद्यलङ्का-रयोः स्थानं निर्दिशति ध्वनिकारोऽधःस्थितासु पंक्तिषु—

**'तस्माद् यत्र रसादयो वाक्यार्थीभूताः स सर्वो न रसादेरलङ्कारस्य विषयः, स ध्वनेः प्रभेदः । तस्योपमादयोऽलङ्काराः । यत्र तु प्राधान्येन अर्थान्तरस्य वाक्यार्थीभावे रसादिभिश्चारुत्वनिष्पत्तिः क्रियते स रसादेरलङ्कारताया विषयः । (२/पृ० ८८)'**

रसभावादिकस्य प्रधानत्वं मत्वा तदङ्गरूपेण स्थितानामलङ्काराणां स्थितिरेव सर्वेषामप्यलङ्काराणामलङ्कारत्वं साधयति । ध्वनिकारोऽत इदं तत्त्वं बोधयितुमिमं श्लोकं (कारिकामिमाम्) प्रस्तवीति—

**'रसभावादितात्पर्यमाश्रित्य विनिवेशनम् ।**
**अलङ्कृतीनां सर्वासामलङ्कारत्वसाधनम् ॥'**

ध्वन्यालोककारो ध्वनिसिद्धान्तस्यास्ति प्रवर्तकः । तदीयं तं ध्वनिसिद्धांत-माचार्यो मम्मट आचार्यो विश्वनाथः पण्डितराजो जगन्नाथश्च सम्यङ्

निरूपयाम्बभूवुः। हेमचन्द्रविद्याधरविद्यानाथा अपि ध्वनिं निरूपयाञ्चक्रुः परमेतेषां निरूपणे हृद्यतायाः श्लथत्वमीक्ष्यते।

ध्वनेर्बहुलेषु भेदोपभेदेषु असंलक्ष्यक्रमव्यङ्ग्योऽस्ति ध्वनेरन्यतमो भेदः। अस्त्ययं भेदः परमहृद्यस्तत्र रसादिध्वनिस्थितेः सद्भावात्।

आनन्दवर्धनो ध्वनेः रसभावरसाभासादिभेदेषु नान्तर्भावं सहते। अत्र तत्कथनस्याशयोऽयम्—

रसाद्यनुभूतिर्व्यञ्जनावृत्त्या भवति न चाभिधावृत्त्या। अतः रसादिका व्यङ्ग्याः सन्ति। कस्यामपि कृत्यां विभावाद्यपरिपक्वायाः सामग्र्याः सद्भावे रसादिनामोल्लेखमात्रेण न रसाद्यनुभूतिः सम्भवा—इत्येतदत्र प्रमाणं ज्वलज्जागर्ति।

रसाद्युल्लेखेन न काव्यत्वं सिद्ध्यति। अत्र ध्वनिकारस्य वाक्यानि निधीयन्ते—

**"न हि केवलं शृङ्गारादिशब्दमात्रभाजि विभावादिप्रतिपादनरहिते काव्ये मनागपि रसवत्त्वप्रतीतिरस्ति।"**

(१/पृ० १८)

व्यङ्ग्यं (ध्वनिं) वाच्यार्थाद् भिन्नं किमप्यन्यदेव वर्तते। तत् प्रसि भ्योऽलङ्कारेभ्यो वा प्रतीतेभ्योऽवयवेभ्यो भिन्नं सहृदयैकवेद्यं विद्यते। अ ध्वनिकार आह—

**"प्रतीयमानं पुनरन्यदेव, वस्त्वस्ति वाणीषु महाकवीनाम्।**
**यत् तत् प्रसिद्धावयवातिरिक्तं, विभाति लावण्यमिवाङ्गनासु॥**

(१/४)

दृश्यतां तावत्—

१. **तामुद्वीक्ष्य कुरङ्गाक्षीं रसो: नः कोऽप्यजायत।**

२, **चन्द्रमण्डलमालोक्य शृङ्गारे मग्नमन्तरम्।**

३. **अजायत रतिस्तस्यास्त्वयि लोचनगोचरे।**

४. **जाता लज्जावती मुग्धा प्रियस्य परिचुम्बने।**

इत्येतेषु वाक्येषु रसशृङ्गाररतिलज्जाशब्दाः सन्ति, परं तु अलौकिकचमत्कारजनकरसादिप्रतीतेरभावात् न निर्दिष्टाः पङ्क्तयः काव्यत्वेन ग्रहीतुं शक्या भवन्ति ।

विभावादिसंयुक्तसामग्र्याः (व्यञ्जना - ध्वनि - प्रकाश्यमानः) व्यङ्ग्यार्थं एव रसानुभूतिं जनयितुं क्षमते न च अभिधाबोध्यमानो वाच्योऽर्थः । तथा हि 'शून्यं वासगृहं विलोक्य...' इत्येतदादौ शृङ्गारयुक्तस्थले विभावादिसामग्री-संयोगस्य वाच्यार्थता नास्ति चारुत्वोत्पादिका, अपि तु नायक-नायिकोल्लासावेगस्निग्धप्रणयप्रतीतिरूपव्यंग्यार्थं एव चमत्कारस्य कारणम् । वाच्योऽर्थोऽत्र साधनमवश्यं परं तत्साध्यन्तु व्यङ्ग्यार्थं एव ।

रसध्वनिरस्ति ध्वनेरुत्कृष्टतमो भेदः । ध्वनिवादिनां मतेन ध्वनेः प्रमुखौ द्वौ भेदो स्तः—

१. लक्षणामूलध्वनिः (अविवक्षितवाच्यः)

२. अभिधामूलध्वनिः (विवक्षितान्यपरवाच्यः)

लक्षणामूलध्वनेरपि द्वौ भेदो स्तः

१. अर्थान्तरसङ्क्रमितवाच्यः,

२. अत्यन्ततिरस्कृतवाच्यः ।

अभिधामूलध्वनिश्च द्विविधः (१) असंलक्ष्यक्रमव्यङ्ग्यः, (२) संलक्ष्यक्रमव्यङ्ग्यः ।

असंलक्ष्यक्रमव्यङ्ग्यो रसभावरसाभासभावाभासभावोदयभावशान्तिभावसन्धिभावशबलताभेदेनाष्टविधः ।

संलक्ष्यक्रमव्यङ्ग्यस्य मुख्या भेदास्त्रयः—
(१) शब्दशक्त्युत्थः (२) अर्थशक्त्युत्थः (३) उभयशक्त्युत्थः ।

एतेषु शब्दशक्त्युत्थस्य भेदौ द्वौ, अर्थशक्त्युत्थस्य द्वादशभेदाः, उभयशक्त्युत्थस्यैक एव भेदः । तदेवं पञ्चदशभेदाः संलक्ष्यक्रमव्यङ्ग्यस्य सन्ति ।

## संलक्ष्यक्रमव्यङ्ग्यभेदचक्रम्

संलक्ष्यक्रमव्यङ्ग्यः

- शब्दशक्त्युत्थः
  - वस्तुध्वनिः, अलङ्कारध्वनिः
- अर्थशक्त्युत्थः
  - स्वतसम्भवी,
  - कविप्रौढोक्तिसिद्धः,
  - कविनिबद्धवक्तृ-प्रौढोक्तिसिद्धः
- उभयशक्त्युत्थः
  - एक एव

| | स्वतसम्भवी, | कविप्रौढोक्तिसिद्धः, | कविनिबद्धवक्तृ-प्रौढोक्तिसिद्धः |
|---|---|---|---|
| १. | वस्तुना वस्तु व्यङ्ग्य | वस्तुना वस्तु व्यङ्ग्यम् | वस्तुना वस्तु व्यङ्ग्यम् |
| २. | वस्तुना अलङ्कारो व्यङ्ग्यः | वस्तुना अलङ्कारो व्यङ्ग्यम् | वस्तुना अलङ्कारो व्यङ्ग्यम् |
| ३. | अलङ्कारेण वस्तु व्यङ्ग्यम् | अलङ्कारेण वस्तु व्यङ्ग्यम् | अलङ्कारेण वस्तु व्यङ्ग्यम् |
| ४. | अलङ्कारेण अलङ्कारो व्यङ्ग्यः | अलङ्कारेण अलङ्कारो व्यङ्ग्यः | अलङ्कारेण अलङ्कारो व्यङ्ग्यः |

तदित्थं हि अभिधामूलः संलक्ष्मक्रमव्यङ्ग्यः १५ विधः
लक्षणामूलः संलक्ष्यक्रमव्यङ्ग्यः २ विधः
उभयशक्त्युत्थः संलक्ष्यक्रमव्यङ्ग्यः १ विधः

योगः— १८ (अष्टादश)

असंलक्ष्यक्रमव्यङ्ग्यस्त्वेक एव ।

अभिधामूलध्वनिं (विवक्षितान्यपरवाच्यम्) किञ्च लक्षणामूलध्वनिम् (अविवक्षिवाच्यम्) अधिकृत्य आचार्य मम्मटः प्राह—

**१. विवक्षितं चान्यपरं वाचयम्, यत्रापरस्तु सः । असंलक्ष्यक्रम-व्यङ्ग्य-संसक्ष्यक्रमव्यङ्ग्यभेदेन द्विविधोऽयम् अभिधामूलध्वनिः—विवक्षितान्य-परवाच्यः ।** (का० प्र०, ४/पृ०९३)

**अविवक्षितवाच्यो यस्तत्र वाच्यं भवेद्ध्वनौ ।**
**अर्थान्तरसङ्क्रमितमत्यन्तं वा तिरस्कृतम् ॥**

ध्वनिषु रसादिध्वनिरेवेदृग् यत्र सहृदयो व्यङ्ग्यार्थप्रतीतिनिमित्तेन न कामपि बाधामधिगच्छति। तत्क्षण एव स तदास्वादं कर्तुं प्रभवति। तथा हि अर्थान्तरसङ्क्रमितवाच्यध्वनेः

**स्निग्धश्यामलकान्तिलिप्तवियतो वेल्लद्बलाका घनाः**
**वाताः शीकरिणः पयोदसुहृदामानन्दकेकाः कलाः।**
**कामं सन्तु दृढं कठोरहृदयो रामोऽस्मि सर्वं सहे**
**वैदेही तु कथं भविष्यति हहा हा देवि धीरा भव॥**

अत्र लिप्तमित्येतत् पदमत्यन्ततिरस्कृतं भूत्वा व्याप्तार्थं बोधयति। यतो हि कान्तिर्न लेपनकार्यं साधयति। किञ्च चेतनधर्मोऽचेतनमेघे न सम्भवः। सोऽपि अत्यन्ततिरस्कृतो भूत्वा सुखदार्थमभिव्यनक्ति। अतः अत्यन्ततिरस्कृत-वाच्यध्वनेर्निरपेक्षत्वादुभयोरपि स्थलयोः, तयोः संसृष्टिरस्ति। 'रामोऽस्मि' इत्यत्र राम इति पदमत्यन्तदुःखसहिष्णुत्वपेरूऽर्थान्तरे संक्रमते। तस्य च अत्यन्ततिरस्कृतवाच्यध्वनिभेदैः सह अङ्गाङ्गिभावसङ्करो वर्तते, किञ्च तस्य अर्थान्तरसंक्रमितवाच्यध्वनेः रसध्वनिना सह एकाश्रयानुप्रवेशरूपसङ्करो हि समुपस्थितो भवति।

वस्तुध्वनेः (संलक्ष्यक्रमव्यङ्ग्यस्य)

**'पथिक नात्र स्रस्तरमस्ति मनाक् प्रस्तरस्थले ग्रामे।**
**उन्नतपयोधरं प्रेक्ष्य यदि वससि तद्वस॥'**

इत्येतस्मिन्नुदाहरणे स्रस्तरादिपदानां वाच्यार्थोऽयम्—अत्र स्रस्तरं न अतः ग्रामोऽयं न निवासयोग्यः परं मेघान् उद्गतान् प्रेक्ष्य यदि वासेच्छा स्यात् तदा वस। परं व्यङ्ग्याऽर्थोयम्—पाषाणसदृशानां मूर्खपुरुषाणां ग्रामोऽयम्, परस्त्रीसम्भोगनिषेधं कोऽत्र कर्तुं धियं प्रवर्तयितुमर्हति चेद् उन्नत पयोधरं—स्तनम्—अवलोक्य वासेच्छा तदा वस। उत्थितं यौवनमुपभोक्तुं क्षमतां यदि निदधासि, तदा तिष्ठ इत्येव वस्तुध्वनिः व्यङ्ग्यार्थः।

अलङ्कारध्वनेः (संलक्ष्यक्रमव्यङ्ग्यस्य)—

**धन्यासि या कथयसि प्रियसङ्गमेऽपि**
**विस्रब्धचाटुकशतानि रतान्तरेषु।**
**नीवीं प्रति प्रणिहिते तु करे प्रियेण**
**सख्यः शपामि यदि किञ्चिदपि स्मरामि॥**

इत्येतदाद्युदाहरणे त्वम् अधन्या अहं धन्या इति व्यतिरेक-मूलक-व्यंग्यार्थः शोभते। एते वा एतादृशा व्यङ्ग्यार्था वाच्यार्थप्रतीतेरनन्तरं तत्काल एव

न प्रतीयन्ते। व्यङ्ग्यार्थप्रतीतिनिमित्तेन समयो वा कस्याप्याक्षेपोऽपेक्ष्यते। परं 'शून्यं वासगृहम्......' इत्येतदाद्युदाहरणेषु प्रणयातिशयरूपव्यंग्यार्थः सत्वरमेव विनाऽऽक्षेपं विना समयप्रतीक्षां प्रतीतिपथमुपैति। अत एव रस-ध्वनिरुत्कृष्टतमो ध्वनिः। रसशब्दस्य भावरसाभासादिकेषु च विनियोगो वर्ततेऽतः 'रसादि'रित्येतत्कथनव्यवहारोऽस्ति। तेषु कस्याप्यन्यतमस्योपरि दृष्टि निधाय उदाहरणं समुपस्थापयितुं शक्यमस्ति। तथा हि—

**एवंवादिनि देवर्षौ पार्श्वे पितुरधोमुखी।**
**लीलाकमलपत्राणि गणयामास पार्वती ॥**[1]

अत्र अर्थः स्वसामर्थ्यादर्थान्तरमभिव्यनक्ति शब्दव्यापारमन्तरेणैव। अतोऽर्थशक्त्युदभवः संलक्ष्यक्रमव्यङ्ग्यो लज्जाख्यं वा अवहित्थाख्यं हि व्यभि-चारिभावरूपमर्थान्तरमभिव्यक्तं करोति। द्वितीयस्यार्थान्तरस्य प्रतीतिरिह क्षणान्तरेण सञ्जायते।

अन्येषामपि ध्वनीनामेवमेवोदाहरणानि दातुं शक्यानि सन्ति। तथा हि—भावविषयकमुदाहरणम् (देवादिविषयकरतेः)।

**कण्ठकोणविनिविष्टमीशते कालकूटमपि मे महामृतम्।**
**अप्युपात्तममृतं भवद्वपुः भेदवृत्ति यदि मे न रोचते॥**

इत्यत्र महादेव आलम्बनविभावः, 'ईश' इत्येतेन पदेन वाच्यमव्याहत-मैश्वर्यम् उद्दीपनविभावः, स्तवोऽनुभावः, धृति माहात्म्यस्मरणादिका व्यभि-चारिभावाः सन्ति। एतैः प्रार्थयितू रतिम् अनुमातुं क्षमाः सामाजिकाः भाव-रूपरतिमास्वदन्ते। तस्याः (रतेः) पूर्णतया अपरिपुष्टत्वात् सा (रतिर्भावः) रसत्वं नाप्नुते। अतः सा (रतिः) भाव इत्येतेन पदेन वाच्या भवति।

व्यङ्ग्यव्यभिचारिभावपरकमुदाहरणम्—

**जाने कोपपराङ्मुखी प्रियतमा स्वप्नेऽद्य दृष्टा मया**
**मा मां संस्पृश पाणिनेति रुदती गन्तुं प्रवृत्ता पुरः।**
**नो तावत् परिरभ्य चाटुकशतैराश्वासयामि प्रियां**
**भ्रातस्तावदहं शठेन विधिना निद्रादरिद्रीकृतः॥**

अत्र विधातरि 'असूया' रूपव्यभिचारिभावो व्यङ्ग्यः। अत इदमञ्जित-व्यभिचारण उदाहरणम्।

---

१. नात्र असंलक्ष्यक्रमव्यङ्ग्यो ध्वनिर्यतो तत्र साक्षाच्छब्दनिवेदितेभ्यो विभावानुभाव-व्यभिचारिभ्यो रसादीनां प्रतीतिः स तस्य मार्गः।

स्तुमः कं वामाक्षि ! क्षणमपि विना य न रमसे
विलेभे कः प्राणान् रणमखमुखे यं मृगयसे ।
सुलग्ने को जातः शशिमुखि ! यमालिङ्गसि बलात्
तपःश्री कस्यैषा मदननगरि ! ध्यायसि तु यम् ।।

इत्यत्र स्तुम इत्याद्यनुगतानेकव्यापाराणां वर्णनं परकीयायाः (परकीयाया नायिकाया वा वेश्यायाः) अनेककामुकविषयकाभिलाषं व्यनक्ति ; अत इदं रसाभासविषयकमुदाहरणम् ।

भावभाससम्बन्ध्युदाहरणम्—

राकासुधाकरमुखी तरलायताक्षी
सा स्मेरयौवनतरङ्गितविभ्रमाङ्गी ।
तत् किं करोमि विदधे कथमत्र मैत्रीं
तत्स्वीकृतिव्यतिकरे क इवाभ्युपायः ।।

अत्र परकीयायां चिन्ता अनौचित्यपूर्वकं प्रवृत्तास्ति; अतो भावाभासः[1] ।

भावशान्तिः, भावोदयः, भावसन्धिः, भावशबलता इत्येतच्चतुष्टयमपि भावान्तर्गतम् ।

भावशान्तेरुदाहरणम्—

तस्याः सान्द्रविलेपनस्तनतटप्रश्लेषमुद्राङ्कितम् ।
किं वक्षश्चरणाऽऽनतिव्यतिकरव्याजेन गोपाय्यते ।
इत्युक्ते क्व तदित्युदीर्य्य सहसा तत्सम्प्रमार्ष्टुं मया ।
साऽऽश्लिष्टा रभसेन तत्सुखवशात् तन्व्या च तद्विस्मृतम् ।।

इत्यत्र कोपरूपभावस्य शान्तिः प्रदर्शितास्ति ।

भावोदयस्योदाहरणम्—

एकस्मिञ्च्छयने विपक्षरमणीनामग्रहे मुग्धया
सद्यो मानपरिग्रहग्लपितया चाटूनि कुर्वन्नपि ।
आवेगादवधीरितः प्रियतमस्तूष्णीं स्थितस्तत्क्षणम्
मा भूत् सुप्त इवेत्यमन्दवलितग्रीवं पुनर्वीक्षितः ।।

इत्येतदत्र सुरतविषयकौत्सुक्यस्योदितस्य वर्णनम् अस्ति ।

भावसन्धिपरकमुदाहरणम्—

उत्सिक्तस्य तपः पराक्रमनिधेः रम्यागमादेकतः
सत्सङ्गाप्रियता च वीररभसोत्फालश्च मां कर्षतः ।

---

१. तदाभासा अनौचित्यप्रवर्तिताः । (काव्यप्रकाशे, ४/का ४९)

**वैदेही परिरभ्य एव च मुहुश्चैतन्यमामीलयन्**
**आनन्दी हरिचन्दनेन्दुशिशिरः स्निग्धो रुणद्ध्यन्यतः ॥**

इत्यत्रावेगहर्षयोः सन्धिरस्ति।

भावशबलता—

**क्वाकार्यं शशलक्ष्मणः क्व च कुलं भूयोऽपि दृश्येत सा**
**दोषाणां प्रशमाय नः श्रुतमहो कोपेऽपि कान्तं मुखम्।**
**किं वक्ष्यन्त्यपकल्मषाः कृतधियः स्वप्नेऽपि सा दुर्लभा**
**चेतः स्वास्थ्यमुपैहि कः खलु युवा धन्योऽधरं धास्यति ॥**

इत्यत्र वितर्कौत्सुक्यमतिस्मरणशङ्कादैन्यधृतिचिन्तानां शबलता।

शब्दशक्त्युद्भवध्वनिभेदमधिकृत्य "ननु शब्दशक्त्या यत्रार्थान्तरं प्रकाशते स यदि ध्वनेः प्रकार उच्यते तदा श्लेषस्य विषय एवापहृतः स्यादि"त्येषा या शङ्का क्रियते सा नोचितास्ति यतो हि यत्र वाच्यरूपे वस्तुद्वयस्य शब्द शक्त्या प्रतीतिर्भवति तत्र श्लेषोऽलङ्कारो भवति। शब्दशक्त्युद्भवध्वनेस्तु विषयोऽन्य एव।

ध्वनिकारोऽधःस्थितायां कारिकायां शब्दशक्त्युद्भवं ध्वनिं दर्शयति—

**आक्षिप्त एवालङ्कारः शब्दशक्त्या प्रकाशते।**
**यस्मिन्ननुक्तः शब्देन शब्दशक्त्युद्भवो हि सः ॥** (२, पृ० ११९)

अभिप्रायोऽयम् अलङ्कारो न केवलं वस्तु, यत्र शब्दशक्त्या आक्षिप्तो भूत्वा प्रकाशते तत्र शब्दशक्त्युद्भवो ध्वनिर्भवति। अत एव

**"येन ध्वस्तमनोभवेन बलिजित्कायः पुरा स्त्रीकृतः ॥**

इत्यादौ न शब्दशक्त्युद्भवध्वनिः। तत्र शब्दशक्त्या वाच्यरूपेण शिव-विष्णुरूपवस्तुद्वयस्य प्रकाश्यमानत्वात्।

भट्टोद्भटेन न केवलं वस्तुद्वयस्य प्रतीत्यामपि तु अलङ्कारान्तरस्य प्रतीत्यां सत्यामपि श्लेषव्यवहारो दर्शितोऽतः शब्दशक्तिमूलध्वनिः पुनरपि निरवकाशश्चेत्, तन्न, कारिकायाम् आक्षिप्त इति कथितत्वात्। भावोऽयम्—

यत्र शब्दशक्त्या साक्षाद् वाच्यरूपेयमलङ्कारान्तरस्य प्रतीतिर्जायते सः सर्वोऽपि श्लेषस्य विषयः; परं यत्र शब्दशक्त्या आक्षिप्तं वाच्यव्यतिरिक्तं व्यङ्ग्यमेवालङ्कारान्तरं प्रकाशते सः शब्दशक्त्युद्भवध्वनेर्विषयः।

**'एवंवादिनि देवर्षौ······'** इत्यत्र अर्थशक्त्युद्भवध्वनिः (संलक्ष्यक्रम-

व्यङ्ग्य:) उपपादितो यदा, तदा अर्थशक्त्युद्भवध्वनि: क्व भवतीति कथितम् ध्वनिकारस्तस्य लक्षणं स्वग्रन्थे प्रस्तवीति—

**अर्थशक्त्युद्भवस्त्वन्यो यत्रार्थः स प्रकाशते ।**
**यस्तात्पर्येण वस्त्वन्यद्व्यनक्त्युक्तिं विना स्वतः ।।**

(२, पृ० १३१)

यत्र साक्षाच्छब्दनिवेदितेभ्यो विभावनुभावव्यभिचारिभ्यो रसादीनां प्रतीतिर्भवति सोऽसंलक्ष्यक्रमव्यङ्ग्यध्वनेर्विषयो यत्र च शब्दव्यापारं विनैव अर्थान्तरस्य प्रतीति: स: संलक्ष्यक्रमव्यङ्ग्यस्य ध्वनेर्विषय: । इममेव विषयं ध्वनिकार वितनोतीत्थम्—

**"यथा कुमारसम्भवे मधुप्रसङ्गे वसन्तपुष्पाभरणं वहन्त्या देव्याः आगमनादिवर्णनं मनोभवशरसन्धानपर्यन्तंशम्भोश्च परिवृत्तधैर्य्यस्य चेष्टाविशेषवर्णनादिकं साक्षाच्छब्दनिवेदितम् ।"**

"**एवं वादिभि**"इत्यादौ तु सामर्थ्याक्षिप्तव्यभिचारिमुखेन रसप्रतीति: ; तस्मात् तत्र तु अर्थशक्त्युद्भवसंलक्ष्यक्रमव्यङ्ग्रूपध्वनि: । तत्र च शब्दव्यापारसहायोऽर्थोऽर्थान्तिरस्य व्यञ्जकत्वेनोपादीयते स: अर्थशक्त्युद्भवसंलक्ष्यक्रमध्वनेर्न विषय: । स तु गुणीभूतव्यङ्ग्यस्य विषय: । यथा-

**सङ्केतकालमनसं विटं ज्ञात्वा विदग्धया ।**
**हसन्नेत्रार्पिताकूतं लीला पद्म निमीलितम् ।।**

अत्र लीलाकमलनिमीलनद्वारेण सङ्केतकालस्य व्यञ्जकता 'नेत्रार्पिताकूतम्' इत्येतेन पदेन सूचितमत: अर्थान्तरशक्त्युद्भवध्वनिर्न, अपि तु गुणीभूतव्यङ्ग्यमस्ति ।

ध्वनेर्यत्रार्थ: स्वं वा शब्द: स्वकीयमर्थं गुणीभूतं विधाय प्रतीयमानमर्थमभिव्यङ्क्त: । अलङ्कारेष्वन्तर्भावो न भवितुं शक्य: ; ध्वनेर्व्यङ्ग्यव्यञ्जकभावसम्बन्धमूलकत्वात्, तस्य (ध्वने:) वाच्यवाचकचारुत्वहेतुभूतालङ्कारादिषु नान्तर्भावो भवितुमर्हतीति बोध्यम् । ध्वनिकार: स्वकीये ध्वन्यालोकेऽस्मिन्नेव विषये परिकरश्लोकमिमं प्रस्तौति—

**'व्यङ्ग्यव्यञ्जकसम्बन्धनिबन्धनतया ध्वनेः ।**
**वाच्यवाचकचारुत्वहेत्वन्तःपातिता कुतः ।।**

ध्वनौ व्यङ्ग्यार्थस्य प्राधान्यं भवति, समासोक्त्यादौ न तस्य (व्यङ्ग्यार्थस्य) प्रधानतास्ति ।

यस्य व्यङ्ग्यार्थस्य ध्वनौ प्रधानता प्रेक्ष्यते तस्य व्यङ्ग्यार्थस्याभिव्यक्त्यां शब्दार्थावुभावपि कारणत्वेनावतिष्ठेते। परं तत्रैकः कारणमन्यश्च सहकारी। एतस्मादेव कारणात् व्यञ्जनाया 'शाब्दी', 'आर्थी' चेति द्वौ भेदौ भवतः। साहित्यदर्पणकार इममेव विषयं स्वकीयायामधःस्थितायां कारिकायां प्रकटीकुरुते—

**शब्दबोध्यो व्यनक्त्यर्थः, शब्दोऽप्यर्थान्तराश्रयः।**
**एकस्य व्यञ्जकत्वे, तदन्यस्य सहकारिता॥** (२/१८)

अस्तु, समासोक्तौ[1] ध्वनेरन्तर्भावः स्यात् तत्र नायकनायिकाव्यवहारस्य व्यङ्ग्यत्वान्न च वाच्यत्वात्। निर्दिष्टाद्धेतोर्ध्वनेरन्तर्गतत्वं समासोक्त्यलङ्कारे भवितुमर्हतीति ये वदन्ति, तेषां तत्कथनं न युक्तम्। '**उपोढरागेण विलोलतारक**मि'त्यादौ व्यङ्ग्यस्य प्राधान्याभावात् ध्वनिर्न इत्येतदुपरि कथितमेव। उक्तकारणवशादेव समासोक्तौ ध्वनेरन्तर्भावो न भवितुं शक्यः।

आक्षेपालङ्कारेऽपि ध्वनेर्नान्तर्भावो हि भवितुमर्हति—

**अहं त्वां यदि नेक्षेय क्षणमप्युत्सुका ततः।**
**इयदेवास्त्वतोऽन्येन किमुक्तेनाप्रियेण ते॥** (भामहः, २/६९)

इत्यत्र 'म्रिये' इत्येतद्व्यङ्ग्यमस्त्यत आक्षेपालङ्कारस्य[2] व्यङ्ग्यवत्त्वाद्, ध्वनेरन्तर्भावे आक्षेपालङ्कारे कर्तुं शक्य इति यदुच्येत तदपि न युक्तं, व्यङ्ग्ये सति प्रधाने, ध्वनिर्भवति। अत्र व्यङ्ग्यन्तु वर्तते परं न च तस्य प्राधान्यमास्ते। ईदृश्यां स्थित्यां तस्य (ध्वनेः) तत्र (आक्षेपे) अन्तर्भावो भवतीति कथनं न सङ्गतम्।

आचार्यवामनं 'उपमानाक्षेप' इत्येतदाक्षेपस्य लक्षणं कुरुते। (यत्रोपमानस्याभिधानं निष्फलं क्रियते तत्र आक्षेपो भवति) नवानामाचार्याणां मतेनैतस्यां स्थित्यां प्रतीपालङ्कारो भवति। साहित्यदर्पणकार आचार्यविश्वनाथः प्रतीपस्य लक्षणमिदं निर्दिशति—

**'प्रसिद्धस्योपमानस्योपमेयत्वप्रकल्पनम्।**
**निष्फलत्वाभिधानं वा प्रतीपमिति कथ्यते॥** (१०/८७)

---

१. यत्रोक्तौ गम्यतेऽन्योऽर्थस्तत्समानैर्विशेषणैः।
सा समासोक्तिरुदिता संक्षिप्तार्थतया बुधैः॥ (भामहः, २/७९)

२. प्रतिषेध इवेष्टस्य यो विशेषाभिधित्सया।
वक्ष्यमाणोक्तविषयः स आक्षेपो द्विधा मतः॥ (भामहः, २/६८)

तदेवं हि आक्षेपालङ्कारोऽपि व्यङ्ग्यस्य दर्शनाद् ध्वनौ आक्षेपस्यान्तर्भावो भवितुमर्हति' इत्येतत्कथनं नोचितं वाच्यस्यैव तत्र (आक्षेपे) प्राधान्यात्। तत्र आक्षेप वचनबलादेव प्रधानतया वाक्यार्थस्य प्रतीतिर्भवति। तत्र (आक्षेपे) विशेषबोधनेच्छया शब्दोपात्तस्य प्रतिषेधरूपस्य य आक्षेपो विधीयते स एव व्यङ्ग्यविशेषमाक्षिपत्यतो मुख्यता तस्यैव विद्यते न च व्यङ्ग्यस्य। एतादृश्यां स्थित्यां त्वाक्षेपस्यान्तर्भावो ध्वनौ भवत्येषः प्रश्न एव नोत्तिष्ठति।

चारुत्वोत्कर्षस्यैव प्राधान्येन नियामकत्वाद् **अनुरागवती सन्ध्या दिवसस्तत्पुरस्सरः। अहो दैवगतिश्चित्रा तथापि न समागमः।** इत्यत्र व्यङ्ग्यप्रतीतौ सत्यामपि, वाच्यमेवोत्कृष्टचारुत्वचारु; तस्माद्धेतोः आक्षेपालङ्कारो वा समासोक्त्यलङ्कार एव प्रधानो भवन् प्रेङ्खते निर्दिष्टोदाहरणे।

यथाथ दीपके, अपह्नुतौ च उपमायां सत्यामपि व्यङ्ग्यायां, न तत्र तत्र (दीपके, अपह्नुतौ च) उपमायाः प्राधान्यम् अपि तु दीपकस्य अपह्नुतेश्च प्राधान्यं, तेन **मणिः शाणोल्लीढः**—इत्येतदाद्युदाहरणं दीपकालङ्कारस्य, किञ्च **नेयं विरौति भृङ्गाली**······इत्याद्युदाहरणमपह्नुत्यलङ्कारस्यैवोदाहरणं मतं भवति न चोपमायास्तथैव यत्र व्यङ्ग्यार्थ एव प्रधानो भूत्वा विद्योतते तत्र ध्वनिरेव मतो भवति। तद् ध्वनिकाव्यमिति व्यपदिश्यते।

दीपके[1] प्रकृताप्रकृतयोरुपमानोपमेयभावो व्यङ्ग्यो भवति। अपह्नुताव[2]पि उपमानोमेयभावो भवति व्यङ्ग्यः। इदमेव सर्वं पर्यालोच्य ध्वनिकार इदं ब्रवीति—

**"यथा च दीपकापह्नुत्यादौ व्यङ्ग्यत्वेनोपमायाः प्रतीतावपि प्राधान्येनाविवक्षितत्वान्न तया व्यपदेश तद्वदत्रापि द्रष्टव्यम्।"**

**'आहूतोऽपि सहायैः ओमित्युक्त्वा विमुक्तनिद्रोऽपि।**
**गन्तुमना अपि पथिकः सङ्कोचं नैव शिथिलयति॥'**

इत्यत्र प्रकरणवशात् प्रतीयमाने व्यङ्ग्ये न किमपि सौन्दर्यम् अतस्तस्याप्रधानत्वात् न तद्व्यपदेशः वरं विशेषोक्त्यलङ्कार[3]स्यैव चमत्कारजनकत्वात्

---

१. सकृद्वृत्तिस्तु धर्मस्य प्रकृताप्रकृतात्मनाम्।
सैव क्रियासु बह्वीषु कारकस्येति दीपकम्॥ (काव्यप्रकाशे १०/४८७)

२. अपह्नुतिरभीष्टस्य किञ्चिदन्तर्गतोपमा॥ (भामहः, ३/२१)

३. सति हेतौ फलाभावे विशेषोक्तिः। (साहित्यदर्पणे, १०/६७)

तस्या एव व्यपदेशः क्रियते। विशेषोक्त्याञ्च ध्वनेरन्तरर्भावो न भवति- इत्येतेन विमर्शेणत्येतत् सिद्ध्यति।

पर्यायोक्ता[1]लङ्कारे व्यङ्ग्यस्य प्राधान्यं भवति; अतस्तस्य (पर्यायोक्तस्य) ध्वनावन्तर्भावो भवितुमवकाशोऽस्त्यवश्यं परं ध्वनेस्तत्र (पर्यायोक्ते) अन्तर्भावो न भवति; ध्वनेर्महाविषयत्वादङ्गित्वाच्च।

**'शत्रुच्छेददृढस्य मुनेरुत्पथगामिनः।**
**रामस्यानेन धनुषा देशिता धर्मदेशना॥'**

इत्यत्र भीष्मः परशुरामं पराजितं विदधात्वित्येष व्यङ्ग्योऽर्थोऽस्ति। स एव 'देशिता धर्मदेशनां' इत्येताभ्यां शब्दाभ्यामभिधयाभिहितः। अत्रोपरि- कथितस्य व्यङ्ग्यार्थस्य प्रधानता नास्ति परं प्रतीतिस्तस्यास्ति। सा च प्रतीतिर्वाच्यमेवालङ्कुरुते। अतस्तत्र ध्वनिर्न।

**"गृहेष्वध्वसु वा नान्नं भुञ्ज्महे यदधीतिनः।**
**विप्रा न भुञ्जते तच्च रसदाननिवृत्तये॥"**

इत्येतस्मिन् भामहप्रदत्ते पर्यायोक्तालङ्कारोदाहरणे तु व्यङ्ग्यस्य प्राधान्यमेव नास्ति तस्मात् तत्र ध्वनेरवसर एव न। पर्यायोक्तालङ्कारस्य तान्युदाहरणानि **'शत्रुच्छेददृढस्य'**......, **'भ्रम धार्मिक'**......इत्यादीनि प्राप्तुं शक्यानि सन्ति यत्र व्यङ्ग्यं प्रधानं भवति। तान्युदाहरणानि अलङ्कारध्वनेरु- दाहरणानि मतानि भवन्ति। परमेतेन ध्वनेरलङ्कारेष्वन्तर्भावो जायते इत्येतन्न सिद्ध्यति। वस्तुतोऽलङ्कारस्य ध्वनावन्तर्भावस्तु वक्तुं सुशकः परमलङ्कारे ध्वनिरिति न। ध्वनेर्महाविषयव्यापकत्वात्। पर्यायोक्तस्य व्यङ्ग्यप्रधानो- दाहरणानि व्यतिरिच्य अन्यत्रापि ध्वनेः सद्भावः प्राप्यते। अतस्तस्य (ध्वनेः) महाविषयव्यापकत्वाद्ध्वनेरन्तभावोऽलङ्कारे न स्वीकरणीयो भवति।

अङ्गाङ्गिभावसंकरः, एकाश्रयानुप्रवेशसङ्करः, सन्देहसङ्कर इत्येते त्रयो भेदाः सङ्करालङ्कारस्य नवीनैरालङ्कारिकैर्मताः। भामहादिकाः

---

काव्यप्रकाशकारस्तु तस्या लक्षणमिदं प्रस्तवीति—
'विशेषोक्तिरखण्डेषु कारणेषु फलावचः।' (मम्मटः १०/४६८)

१. "पर्यायोक्तं यदन्येन प्रकारेणाभिधीयते।
वाच्यवाचकवृत्तिभ्यां शून्येनावगमात्मना॥" (भामहः, ३/८)
"पर्यायोक्तं यदा भङ्ग्या गम्यमेवाभिधीयते॥ (विश्वनाथः, १०/६०)
"पर्यायोक्तं विना वाच्यवाचकत्वेन यद्वचः॥" (मम्मटः, १०/५१८)

प्राञ्च एकाश्रयानुप्रवेशस्य द्वयोर्भागयोर्विभागं विदधति। ताविमौ एकाश्रयानुवर्तनम्, एकवाक्यांशसमावेशश्च स्तः। तदेवं सङ्करालङ्कारश्चतुर्विधो भवति। भामहेन तल्लक्षणं किञ्च तदुदाहरणानि भट्टोद्भटेनानेन प्रकारेण प्रदत्तानि—

**विरुद्धालङ्क्रियोल्लेखे समं तद्वृत्त्यसम्भवे।**
**एकस्य च ग्रहो न्यायदोषाभावे च सङ्करः॥**

लोचनकारेण तस्योदाहरणमिदं समुपस्थापितम्—

**शशिवदनासितसरसिजनयना सितकुसुमदशनपङ्क्तिरियम्।**
**गगनजलस्थलसम्भवहृद्याकाराकृता विधिना॥**

इत्येतस्मिञ्श्लोके 'शशिवदना (शशी एव वदनं यस्याः सा, शशिवद् वदनं यस्याः सा) गगनसम्भवत्वम्, असितसरसिजनयना जलजनकत्वम्, सितकुसुमदशनपङ्क्तिः स्थलजत्वं बोधयन्ति। तेन विधाता नायिकां गगनजलस्थलैरसृजत् इत्येष गूढोऽर्थो व्यज्यते श्लोकस्थतत्तत्पदेन। अत्र 'शशिवदना' इत्येतेन पदेन उपमा रूपकञ्च सिद्ध्यतः। तयोर्मध्ये कोऽलङ्कारो मन्तव्यः स्यादित्येतस्य निर्णायकः कोऽपि विनिगमको हेतुर्न वर्ततेऽतस्तन्मूलकसन्देहसङ्करस्तत्र विद्यते। श्लोकस्य तद्विधालङ्कारवर्तित्वात् किं वाच्यं किञ्च व्यङ्ग्यमित्येतन्न निर्णीतं भवितुमर्हति। एतस्यां दशायां कस्य प्रधानत्वं कस्य अप्रधानत्वमित्येषः प्रश्नो नोत्तिष्ठति।

सङ्करस्य द्वितीयो भेद एकाश्रयानुप्रवेशसङ्करोऽस्ति। भट्टोद्भटस्तम् एकवाक्यानुप्रवेशैकवाक्यांशानुप्रवेशाख्यभेदाभ्यां हि विभक्तीकृतवान्। भामह एतयोर्भेदयोर्लक्षणस्य च निर्देशमित्थमनुतिष्ठति—

**'शब्दार्थवर्त्यलङ्कारा वाक्य एकत्र वर्तिनः।**
**सङ्करश्चैकवाक्यांशप्रवेशाद्वाभिधीयते॥'**

द्वयोश्च भेदयोरुदाहरणमेतत्—

**'स्मर स्मरमिव प्रियं रमयसे यमालिङ्गनात्।'**

अत्र स्मरस्मरपदयोः सद्भावाद् यमकालङ्कारः। स्मरमिवेत्यत्र चोपमालङ्कारो वर्ततेऽत एव 'एकाश्रयानुप्रवेशरूपसङ्करोऽस्ति। अत्र प्रतीयमानस्य शङ्काया अवसर एव न, तन्निर्णयस्तु पुनः केन प्रकारेण गुणे प्रधाने च स्यात्? द्वितीयञ्चोदाहरणमिदम्—

**'तुल्योदयावसानत्वाद् गतेऽस्तं प्रति भास्वति।**
**वासाय वासरः क्लान्तो विशतीव तमोगुहाम्॥'**

सूर्यस्य वासरस्य च उदयास्तते युगपदेव घटेते। अतो यदा सूर्यास्तता भवितुमारेभे तदा खिन्नो भूत्वा वासरोऽपि, मन्ये, तमोगुहां प्रविष्टः— भावोऽयमेतस्य श्लोकस्य। 'विशतीवेत्यत्रोत्प्रेक्षास्ति। 'तमोगुहाम्' इत्यत्र च एकदेशवर्तिरूपकम् अस्ति। इत्थं रूपकस्योत्प्रेक्षायाश्चय समानरूपेण वाच्यत्वान्न तत्र गुणप्रधानभावो विद्यते।

सङ्करस्य तुरीयो भेदोऽङ्गाङ्गिभावसङ्करोऽस्ति। तल्लक्षणं सोदाहरणमधो निधीयते—

**परस्परोपकारेण यत्रालङ्कृतयः स्थिताः।**
**स्वातन्त्र्येणात्मलाभं नो लभन्ते सोऽपि सङ्करः॥**

यत्रानेकेऽलङ्काराः परस्परोपकारकभावेन स्थिताः स्युः, स्वातन्त्र्येण न, सोऽपि अङ्गाङ्गिभावसङ्करो भवति। उदाहरणम्—

**प्रवातनीलोत्पलनिर्विशेषम् अधीरविप्रेक्षितमायताक्ष्या।**
**तया गृहीतं नु मृगाङ्गनाभ्यस्ततो गृहीतं नु मृगाङ्गनाभिः॥**

इत्यत्रोपमालङ्कारो व्यङ्ग्यः, सन्देहालङ्कारश्च वाच्यः। व्यङ्ग्योपमा वाच्यभूतं सन्देहालङ्कारम्प्रति चारुत्वोत्कर्षं प्रदाय अनुगृह्णाति। तत्पर्यवसानं सन्देहस्य पुष्ट्यामेव भवति। अतः सा गुणीभूतास्ति। उपमाजनितचमत्कृत्यां सन्देहः साहाय्यकृद्भवति, अतः द्वयोरप्यङ्गाङ्गिभावोऽस्ति।

इत्थं सङ्करस्य चतुर्ष्वपि भेदेषु द्वितीयस्मिस्तृतीयस्मिश्च व्यङ्ग्यस्य सम्भावनैव न, चतुर्थे (अङ्गाङ्गिभावसङ्करे) प्रथमे च (सन्देहसङ्करे) व्यङ्ग्यं सम्भाव्यं, परं तत्रापि व्यङ्ग्यस्य प्राधान्यं न निश्चितं तेन ध्वनिव्यवहारो न भवितुमर्हति। एतद्विधसर्वं निगद्य ध्वनिकारः सङ्करालङ्कारेऽपि ध्वनेरन्तर्भावं निरस्यति।

भामहोऽप्रस्तुतप्रशंसायाः सामान्यतविशेषभावमूलकः, कार्यकारणभावमूलकः सादृश्यमूलक इत्येतान् भेदांस्त्रीन् कुरुते। एतेषु त्रिषु आद्ययोर्द्वयोर्भेदयोः प्रस्तुतस्याप्रस्तुतस्य च समप्राधान्यं दृश्यतेऽतस्तत्र ध्वनेरवसर एव नास्ति, तस्मात् कारणात् तदन्तर्भावविषयकविचार एव नोत्तिष्ठति। तृतीये सादृश्यमूलके भेदे यदि अभिधीयमानस्याप्रस्तुतस्याप्राधान्यं प्रतीयमानस्य च प्रस्तुतस्य प्राधान्यं विवक्षितं स्यात् तदा ध्वनौ अलङ्कारस्यान्तर्भावो भवेत् अन्यथा अप्रस्तुतस्य अभिधीयमानस्य प्राधान्ये विवक्षिते सति, अप्रस्तुतप्रशंसालङ्कारः स्यात्।

अप्रस्तुतप्रशंसायाः साहित्यशास्त्रे सप्त भेदाः प्रदर्शिताः सन्ति—

अप्रस्तुतप्रशंसा

- सामान्यविशेषभावमूला
  - (१) सामान्येन अप्रस्तुतेन प्रस्तुतसामान्यस्याक्षेपः
  - (२) अप्रस्तुतविशेषेण प्रस्तुतसामान्यस्याक्षेपः
- कार्यकारणभावमूला
  - (३) अप्रस्तुतेन कारणेन प्रस्तुतकार्यस्याक्षेपः
  - (४) अप्रस्तुतेन कार्येण प्रस्तुतस्य कारणस्याक्षेपः
- सादृश्यमूला
  - (५) श्लेषनिमित्तिका
  - (६) समासोक्तिनिमित्तिका
  - (७) सादृश्यमात्रमित्तिका

प्रथमे द्वितीये तृतीये चतुर्थे च भेदोऽभिधीयमानस्य प्रतीयमानस्य च समप्रधानत्वाद् ध्वनेरवसर एव न। सादृश्यमूलके भेदे प्रतीयमानस्य प्राधान्यमस्ति अतस्तत्र अन्योक्तिरूपभेदे अप्रस्तुतप्रशंसालङ्कार एव न, अपितु वस्तुध्वनिर्वर्तते। एतेन विवेचनेन ध्वनेरन्तर्भावोऽप्रस्तुतप्रशंसायामपि न भवितुं शक्य इति सिद्ध्यति।

पुनश्चावधारणार्थं लिख्यतेऽत्र- सादृश्यमूलायामप्रस्तुतप्रशंसायां, यत्र वर्णितेन अप्रस्तुतेन आक्षिप्यमाणः प्रस्तुतो ज्यायांसं चमत्कारं बिभर्ति तत्र वस्तुध्वनिर्ज्ञेयः। न तद् अप्रस्तुतप्रशंसाया उदाहरणं मन्तव्यम्। अप्रस्तुतप्रशंसालङ्कारस्तत्रैव भवेद् यत्र व्यङ्ग्यम् अभिधीयमानात् नाधिकं चमत्कारि। अधःस्थिते श्लोके वस्तुध्वनिर्वर्तते न च अप्रस्तुतप्रशंसालङ्कारः—

**भावव्रातहठाज्जनस्य हृदयान्याक्रम्य यन्नर्तयन्**
**भङ्गीभिर्विविधाभिरात्महृदयं प्रच्छाद्य संक्रीडसे।**
**स त्वामाह जडं ततः सहृदयम्मन्यत्वदुःशिक्षितो**
**मन्येऽमुष्य जडात्मतास्तुतिपदं, त्वत्साम्यसम्भावनात्॥**

तदेवं ध्वनेरलङ्कारेष्वन्तर्भावः प्रत्याख्यातः। समासेनाभिहितस्य सर्वस्यैष भावः —

(क) यत्र व्यङ्ग्यस्य वाच्यानुगामित्वात् अप्राधान्यं तत्र समासोक्त्यादि-वाच्यालङ्काराः स्पष्टा एव। (यत्र व्यङ्ग्यस्य अप्राधान्यं वाच्यानुगामित्वात् तत्र ध्वनेः स्थलं न, अपितु अलङ्कारस्यैव स्थलमस्ति)।

(ख) यत्र व्यङ्ग्यस्य प्रतीतिरेव भवति अथवा तद् (व्यङ्ग्यम्) वाच्य-मनुगच्छति अथवा तस्य (व्यङ्ग्यस्य) स्पष्टतया प्राधान्यं नास्ति तत्रापि ध्वनिर्नास्ति।

(ग) यत्र शब्दार्थौ व्यङ्ग्यबोधनपरौ स एव सङ्कररहितध्वनेर्विषयोऽव-गन्तव्यः।

ध्वन्यालोककारेण आचार्येण आनन्दवर्धनेनात्र केचन परिकरश्लोका निहिताः सन्ति—

**१. व्यङ्ग्यस्य यत्राप्राधान्यं वाच्यमात्रानुयायिनः।**
**समासोक्त्यादयस्तत्र वाच्यालङ्कृतयः स्फुटाः॥**
**२. व्यङ्ग्यस्य प्रतिभामात्रे वाच्यार्थानुगमेऽपि वा।**
**न ध्वनिर्यत्र वा तस्य प्राधान्यं न प्रतीयते॥**
**३. तत्परावेव शब्दार्थौ यत्र व्यङ्ग्यं प्रति स्थितौ।**
**ध्वनेः स एव विषयो मन्तव्यः सङ्करोज्झितः॥**

**गुणाः, अलङ्काराश्च**

गुणालङ्कारभेदमधिकृत्य पूर्ववर्तिनाम् आचार्याणां द्विविधं मतमाप्यते। भट्ट उद्भटो भामहविवरणे तत्परकभेदमुपेक्षमाणो दृश्यते। तन्मतेन गुणा-लङ्कारयोः कोऽपि भेदो नास्ति। लौकिकेषु गुणालङ्कारेषु तु भेदो भवितु-मर्हति। कटककुण्डलादीनामलङ्काराणां शरीरेण साकं संयोगसम्बन्धोऽस्ति, शौर्यौदार्यादिकानां गुणानां चात्मना सार्धं समवायसम्बन्धोऽस्ति, अतो लौकिकयोर्गुणालङ्कारयोर्भेदः स्वीकर्तुं शक्यः परं काव्ये तु माधुर्यादिका गुणाः, अनुप्रासोपमादिकाः अलङ्काराश्च न संयोगसमवाययोर्मध्ये कमपि सम्बन्धं निदधति। एतस्माद्धेतोः काव्ये तद्भेदोपपादनं न कर्तुं सुशकम्। आचार्य भट्टोद्भटस्यैवास्मिन् सम्बन्धे विचारास्तदीयेषु शब्देषु प्रस्तूयन्ते—

**'समवायवृत्त्या शौर्यादयः संयोगवृत्त्या तु हारादय इत्येतद्विधो गुणा-लङ्काराणां भेदो भवतु नाम; माधुर्यौजः प्रभृतीनामनुप्रासोपमादीनाञ्चोभयेषा-**

**मपि समवायवृत्त्या स्थितिर्गड्डलिकाप्रवाहेणैवैषां भेदाः ।'**
एतेन गुणालङ्कारयोर्मध्ये भट्टोद्भटस्य मतेन कोऽपि भेदो नेति सिद्ध्यति ।

**द्वितीयं मतं काव्यालङ्काररचयितुर्वामनस्यास्ति । स वक्ति—काव्य-शोभायाः कर्तारो धर्मा गुणास्तदतिशयहेतवस्त्वलङ्काराः ।**
(३/१/१-२)

**ये खलु शब्दार्थयोर्धर्माः काव्यशोभाकारिणो गुणास्ते सन्ति ओजः प्रसादादयः । न यमकोपमादयः । न इमेऽलङ्काराः काव्ये शोभां जनयन्ति । ओजः प्रसादादिका गुणा एव तत्र (काव्ये) शोभामुत्पादयन्ति । तदतिशयहेतवस्त्वलङ्काराः ।** (३/१/२)

वामनाचार्यस्य मतं वर्तते भेदवादि यदा दि भट्टोद्भटस्य अभेदवादि ।

गुणालङ्कारयोभिन्नत्वमेतेनापि ज्ञायते यद् गुणाः सन्ति नित्याः वा अपरिहार्य्याः । परमलङ्कारास्तादृशा न, ते परिहार्याः अपि सन्ति । काव्ये विनालङ्कारं निर्वाहः सम्भवः परं गुणाभावे तु काव्यव्यवहार एव न भवितुमर्हति ।

तदेवं गुणालङ्कारयोरन्तराले द्विप्रकारकोऽन्तरः —

१. काव्यशोभाया उत्पादका धर्मा गुणाः कथ्यन्ते । गुणोत्पादितायास्तस्याः काव्यशोभाया वर्धयितारो धर्माः 'गुणा' इति कथ्यन्ते । गुणाः काव्ये शोभामादधति । अलङ्कारास्तु सन्ति उत्कर्षाधायकाः वा उपादेयतातारतम्येन प्रयोजकधर्माः सन्ति ।

२. गुणानां काव्ये स्थितिरनिवार्य्यत्वेन वाञ्छनीयास्ति, तेषां परिहारो न कदापीष्टः । परमलङ्काराणां स्थितिर्न अनिवार्यतया अपेक्ष्यते । तेषां स्थितिस्तु परिहार्यापि भवितुमर्हति ।

आचार्य आनन्दवर्धन एतयोर्मतयो निर्देशं कुर्वाणो लिखति—

**'तमर्थमवलम्बते येऽङ्गिनं ते गुणाः स्मृताः ।**
**अङ्गाश्रितास्त्वलङ्काराः मन्तव्याः कटकादिवत् ।।'** (२/६)

भावोऽयम्—काव्यस्यात्मभूतरसादिध्वनिश्रिता धर्माः गुणाः कथ्यन्ते । ये च काव्यस्याङ्गभूतयोः शब्दार्थयोर्धर्मास्तेऽलङ्कारा उच्यन्ते ।

तदेवं ध्वनिकारो गुणान् रसाश्रितान् अलङ्कारांश्च शब्दार्थाश्रितधर्मान् मन्यमानस्तद्भेदानुपपादयति ।

आचार्यमम्मटो भट्टोद्भटस्य अभेदवादिमतं प्रत्याख्याति । स वामनस्य गुणानां शोभाजनकत्वम्, अलङ्काराणाञ्च शोभाजनकत्वमित्येतत्कथनं न

स्वीकुरुते। स (मम्मटः) गुणाः सन्ति उत्कर्षहेतव इति आमनति। स वामनोक्तानां गुणानामपरिहार्यतां गृह्णाति, आनन्दवर्धनमतां गुणानां रसधर्मतामलङ्काराणाञ्च शब्दार्थधर्मतामप्युपाददाति। तदेवं स उभयोरपि सम्मिश्रणं विधाय गुणालङ्कारभेदान प्रतिपादयति। स आह गुणलक्षणमिदम्—

ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः।
उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः॥

अलङ्कारस्य च स्वरूपमपि स एवमाह—

'उपकुर्वन्ति तं सन्तं येऽङ्गाद्वारेण जातुचित्।
हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः॥'

भावोऽयम्—ये काव्ये विद्यमानं रसमङ्गिनं शब्दरूपाङ्गद्वारेण नियमतो वा अनियमेन (यदा तदा) उपकुर्वन्ति, तेऽनुप्रासोपमादिशब्दार्थालङ्काराः शरीरं (शब्दार्थरूपम्) प्रति, रसरूपमात्मानञ्च प्रति परम्परया शोभाधायकास्ते कटककुण्डलादिभूषणानीव काव्यस्य भूषणानि (अलङ्काराः) सन्ति।

अत्र दार्शनिकानां मतमिदं द्रष्टव्यमस्ति—

**'अपि चात्मनो निर्गुणत्वस्य सर्वप्रमाणमौलिभूतवेदान्तप्रतिपादितम् आत्मभूतरसगुणत्वं माधुर्यादीनां कथमिव नोपहासास्पदम्।'**

साहित्यदर्पणकारो विश्वनाथो गुणस्वरूपमित्थं निबध्नाति—रसस्याङ्गित्वं प्राप्तस्य धर्माः शौर्यादयो यथा गुणाः। अलङ्कारं च स एवेत्थं लक्षयति—

'शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः।
रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत्॥'

(सा०द०, १०/५५७)

तदेवं गुणानामलङ्काराणाञ्च काव्यसर्वस्वत्वमेते प्राचीना आचार्यमूर्धन्या निरस्यन्तो "रसो=रसादिध्वनिः काव्यस्य सर्वस्वम्=आत्मे"ति दृढयुक्तिभिः प्रमाणैश्च समुपपादयन्ति।

**'रीतिरात्मा काव्यस्य'** इत्यभिधाय वामनेन रीतेः काव्यस्यात्मत्वं यदुक्तं तद् रीतिं लक्षयन् विश्वनाथो हेलयैव खण्डयति—

'पदसङ्घटना रीतिरङ्गसंस्थाविशेषवत्।
उपकर्त्री रसादीनाम्॥ (साहित्यदर्पणे, ९/५५०)

अभिप्रायोऽयम्—शब्दार्थशरीरस्य काव्यस्य आत्मभूतरस-रसाभासभावादीनां परम्परया परिपोषिका रीतिर्भवति । एतेन रसाद्यभावस्थले रीतीनामप्यभाव इति सूचयित्वा तासामनित्यत्वं ज्ञापितम् । तथा च रसाद्युपकारकः पदविन्यासो रीतिरिति फलितम् ।

ध्वनौ कोऽलङ्कारत्वेन मान्योऽस्त्यस्मिन् विषये ध्वनिकारः कियत् साधु वदति—

**'रसाक्षिप्ततया यस्य बन्धः शक्यक्रियो भवेत् ।**
**अपृथग्यत्ननिर्वर्त्यः सोऽलङ्कारो ध्वनौ मतः ॥'**

(ध्वन्यालोके, २/१६)

भरतो रसं नाटकस्यानिवार्यधर्मत्वेन[1] मन्यमानः कतिपयानां काव्यतत्त्वानां (अलङ्कारगुणदोषाणाम्) रससंश्रयत्वेऽपि प्रकाशं क्षिपन् दृश्यते ।[2] अलङ्कारवादिन आचार्या भामह दण्डि-उद्भटा रसभावादिकं रसवदाद्यलङ्कारत्वेनाभिदधुः परं तेऽपि रसं समुचिततयाद्रियन्ते इत्येतदुपर्यपि निगदितम् । भामहो दण्डी च तं (रसम्) काव्यार्थमावश्यकत्वेन मेनाते ।[3] भामहस्य हि विचारेण तु कटुवौषधमिव कापि शास्त्रचर्चापि रससंयोगेन मधुवज्जायते । दण्डिनो माधुर्यगुणो रसवत्त्वाय कल्पते । तन्माधुर्यगुणस्यान्यतमभेदो वस्तुगतमाधुर्यमिति कथ्यते । अपरं नाम तस्यास्त्यग्राम्यता ।[4] दण्डिनः शब्देषु सैव अग्राम्यता काव्ये रससेचनाय सर्वाधिकशक्तिमानलङ्कारः ।

रुद्रट एकतोऽलङ्कारसिद्धान्तेनैकतश्च ध्वनिसिद्धान्तेनाकृष्टोऽस्ति । सोऽपि मुक्तकण्ठतया रसं स्वीकुरुते । भामहो दण्डी च रसं काव्यार्थमावश्यकतत्त्वत्वे-

---

१. (क) एतद्रसेषु भावेषु सर्वकर्मक्रियासु च ।
सर्वोपदेशजननं नाट्यमेतद् भविष्यति ॥ (ना० शा०, १/११०)

(ख) बहुरसकृतमार्गं सन्धिसन्धानयुक्तम् ।
भवति जगति योग्यं नाटकं प्रेक्षकाणाम् ॥ (ना० शा०, १७/१२३)

२. (क) युक्तं लोकस्वभावेन रसैश्च सकलैः पृथक् ॥ (का० आ० १/२१)

(ख) अलङ्कृतमसङ्क्षिप्तं रसभावनिरन्तरम् ॥ (का० आ० १/१८)

३. (क) स्वादुकाव्यरसोन्मिश्रं शास्त्रमप्युपविन्दते ।
प्रथमालीढमधवः पिबन्ति कटुभेषजम् ॥ (का० आ० ५/३)

(ख) मधुरं रसवद् वाचि वस्तुन्यपि रसस्थितिः ।
येन माद्यन्ति धीमन्तो मधुनेव मधुव्रताः ॥ (का० आ० १/५१)

४. कामं सर्वोऽप्यलङ्कारो रसमर्थे निषिञ्चतु ।
तथाप्यग्राम्यतैवैनं भारं वहति भूयसा ॥ (का० आ० १/६२)

नावगच्छत:[1] । प्रथमं स एव मधुरताललिततादिप्रयोजनेन वैदर्भीपाञ्चाल्यादि-रीतीनां रसानुकूलत्वात् प्रयोगं निर्दिदेश ।[2] रसेषु सः शृङ्गारं प्रधानं मनुते। रस एव स: य: काव्यं शास्त्राद् व्यावर्तयति, अतस्तदर्थं (रसार्थम्) काव्ये कवि: प्रयतेत,[3] अन्यथा न तत्र काव्यत्वं सम्भवमिति स आमनति । स रसस्यौचित्य-युक्तप्रयोगेऽभिनिविशते । प्रसंगापेक्षिणो रसस्य स्थाने रसान्तरस्यानुचित: प्रयोग: किंवा प्रसंगानुकूलस्यापि रसस्य निरन्तरप्रयोगो विरसतां जनयतीति स[4] मन्यते । एतेन तस्य (रुद्रटस्य) रसवादिता स्पष्टतयैव सिद्ध्यति ।

रीतिवादिनो वामनस्य ग्रन्थे रसविवेचनं दृष्टं भवति । तत्प्रस्तुतार्थगत-कान्तिनामा गुणो रस एव स्थितोऽस्ति ।

आचार्य आनन्दवर्धनो ध्वनिं काव्यस्यात्मत्वेन रसञ्च ध्वनेरन्यतमभेदत्वेन (असंलक्ष्यक्रमव्यङ्ग्यध्वनित्वेन) स्वीकुर्वन्नपि रसं ध्वनेरुत्कृष्टतमं रूपं मन्यते । तस्य कथनमेतत्—

**१. रसो हि ध्वनेरुत्कृष्टतमं रूपं, वाच्यार्थानां बहुविधा: रचना: रसमवलम्ब्यैव शोभन्ते ।**

**२ व्यङ्ग्यार्थानां (ध्वने:) सन्त्यनेके भेदा:, परं रसभावादिकास्तद्भेदा: प्रधानतरा भवन्ति ।**

**३. रसस्य सम्पर्कात् प्रचलिता अर्था: वसन्ते द्रुमा इव दीप्यन्ते ।**

**४. वाच्यवाचकयोरौचित्यपूर्वकं रसादिसम्बद्धैव योजना महाकवे: प्रमुखं कर्म ।**

**५. व्यङ्ग्यव्यञ्जकभावविषयकेषु सत्स्वनेकभेदेषु कविना केवलं रसादिमय-ध्वनिकाव्ये एव अवधानमपेक्ष्यते ।**

रसे कवि: स्यादवधानवान् इत्येतद् ब्रूते ध्वनिकार:—

**व्यङ्ग्यव्यञ्जकभावेऽस्मिन् विविधे सम्भवत्यपि ।**
**रसादिमय एकस्मिन् कवि: स्यादवधानवान् ।।**

(ध्वन्यालोके, ४/६)

---

१. काव्यालङ्कार: (१६, १, ५), (१४/३७), (१४/३८)

२. तस्मात् तत्कर्त्तव्यं यत्नेन महीयसा रसैर्युक्तम् ।
उद्वेजनमेतेषां शास्त्रवदेवान्यथा हि स्यात् ।। (का० आ० १२/२)

३. काव्यालङ्कार: (११/१२/१४)

४. का० सू० वृ० ३/२/१५

५. चतुर्वर्गफलास्वादमप्यतिक्रम्य तद्विदाम् ।
काव्यामृतरसेनान्तश्चमत्कारो वितन्यते ।। (व० जी० १/५)

वाच्यानां वाचकानाञ्च औचित्येन योजनं कुर्वाणो रसादिकं सम्बध्नंश्च कविः स्वकर्म प्रकाशयेत्। विनैतद्विधतया कदापि कवेः कर्म न पूर्ति प्रयाति—

'वाच्यानां वाचकानां च यदौचित्येन योजनम्।
रसादिविषयेणैतत् कर्म मुख्यं महाकवेः॥'

(ध्वन्यालोके, ३/३२)

रस एव काव्यस्योच्चतमप्रयोजकत्वेन ध्वनिकारः काव्यप्रकाशकारश्चो-भाववगच्छतः।

वक्रोक्तिजीवितकारः कुन्तको वक्रोक्तिं काव्यस्य जीवितत्वेन मन्यमानोऽपि रसः काव्यामृतम् (आभ्यन्तरं चमत्कारं) वितनुते इति वदन् सः प्रकारान्तरेण रसं काव्यस्य सर्वप्रमुखप्रयोजकत्वेन निगदति, पदवक्रतां स वाक्यजीवितमिव च निगदति।

प्रकरणवक्रतायाः प्रबन्धवक्रतायाश्च कृते रसस्यानिवार्यता तेनानेकविधतया निर्दिष्टास्ति। रसस्योत्कृष्टता मुक्तकण्ठतया तेनाङ्गीकृतास्ति। यद्यप्यसौ रसवदलङ्कारस्य सर्वालङ्कारजीवितत्वं वदति परं प्रकारान्तरेण तस्योत्कर्षधियं बध्नाति।

अग्निपुराणकारेण काव्ये रसस्यानिवार्यतायाः सङ्केतं विदधता रसमन्तरेण वाणी न शोभते इत्युक्तम्। अग्निपुराणकारानेहसि वा तत्समयस्याभ्यर्णे विद्वांसो रसस्य महत्त्वे भृशमावर्जितमानसा बभूवुः। रस एव काव्यस्यात्मेत्यत्र तेषां विचाराः स्थिरतामगुः।

'वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम्'

इत्येष निश्चयः साहित्यसेविभिरक्रियत।

महिमभट्टः—काव्यस्यात्मनि संगिनि—रसादिरूपे न कस्यचिद् विमति' रित्येतदुक्त्वा 'काव्यस्यात्मा रस' इत्येतन्निर्दिदेश।

संस्कृतकाव्यशास्त्रिभिर्यद्यपि शृङ्गाररसो 'रसराजो' वा 'रसपति'रित्येतेनो-पाधिना न सम्मानितः परं तैरन्येभ्यो रसेभ्यः स उत्कृष्टतमोऽमानि। भरत-रुद्रटप्रभृतयो रसस्योत्कृष्टतमतां स्वीकुर्वन्तो यदावलोक्यन्ते, तदाग्निपुराण-कारो भोजराजश्च शृङ्गारे तादृशीमेव धियं दधानौ प्राप्येते। रामचन्द्रगुण-चन्द्रावप्येतां मान्यतां पर्यपूपुषतामिति कथितमुपर्यपि शृङ्गाररससन्दर्भे।

---

१. रसादिद्योतनं यस्यामुपसर्गनिपातयोः।
वाक्यैकजीवितत्वेन सापरा पदवक्रता॥ (वक्रोक्तिजीविते, २/३३)

भरतः स्वकीये नाट्यशास्त्रे रूपकाणां निरूपणं विदधद् 'रसो रूपकाद् रूपकञ्च रसात् न पृथगवस्थातुं शक्नोति। रूपकमनिवार्यतया रसमपेक्षते। रसादेव रूपके रूपकत्वं सञ्चरते। तत्सद्भावादेव रूपकं रूपकतां प्रपद्यते' इदं हि विशदतयोपपादयन् रसस्य स्वरूपं तदीयां महनीयताञ्च प्रदर्शयन्नवाप्यते। नाट्यशास्त्रे रसविकल्पभावव्यञ्जकाख्यषष्ठसप्तमाध्याययोः रसे भावे च कृत्स्नतया प्रकाशो भरतेन क्षिप्तोऽस्ति। तयोः (रसभावयोः) पारस्परिकः सम्बन्धश्च तेन निर्दिष्टोऽस्ति।

यथाम्लपदार्थसंयोगेन पयो दध्नि परिणमते तथैव स्थायिभावोऽपि विभावानुभावसञ्चारिसंयोगाद् व्यक्तो भूत्वा रस इति नाम्ना व्यवह्रियते। इदमित्थमपि वक्तुं सुकरं यथा वासनात्वेन स्थिता रत्यादिकास्तावदेव स्थायिभावा यावत्ते विभावादिभिश्चर्व्यमाणा न भवन्ति। चर्व्यमाणा भूत्वा तु ते रसा जायन्ते। स्थायिभावानां रसरूपेणाभिव्यक्तिस्तथा न भवति यथा ध्वान्तस्थस्य घटस्य। सः प्रकाशमपेक्षते। परमन्धकारस्थोऽनन्धकारस्थश्च घटो न भिन्नः। एक एव। परं वासनात्मकतया स्थितः स्थायिभावश्चर्व्यमाणात् स्थायिभावाद् भिन्नः। प्रथमः स्थायिभाव इति कथ्यते, द्वितीयश्च रस इत्युच्यते।

लोके ये पदार्था सामाजिकस्य मानसे वासनात्वेन स्थितानां रत्युत्साहशोकादिभावानामुद्बोधककारणत्वेन मता भवन्ति, ते काव्ये नाटकादिषु च वर्णिता यदा भवन्ति तदा 'विभाव' इत्येतया संज्ञया प्रोच्यन्ते। साहित्यदर्पणकार आह—

**'रत्याद्युद्बोधका लोके विभावाः काव्यनाट्ययोः'** (३/२८)

विभावस्यार्थोऽस्ति कारणम्। विभावाः सामाजिकस्य हृदये स्थितान् रत्यादिस्थायिभावानुद्बोधयन्ति, ते तान् विभावयन्ति, तान् आस्वादार्हतां नयन्ति।

**अनुभावाः**

अनुभाव उत्पन्नरत्यादिस्थायिभावान् अनुभावयति। लोके यत् कार्यमिति कथ्यते, काव्ये तत् 'अनुभाव' इत्युच्यते। आचार्य विश्वनाथः प्राह—

**उद्बुद्धं कारणैः स्वैः स्वैर्बहिर्भावं प्रकाशयन्।**
**लोके यः कार्यरूपः सोऽनुभावः काव्यनाट्ययोः॥**

(३/१३२)

एतासु कारिकास्वष्टावनुभावा व्याख्यापूर्वकं निर्दिष्टाः —

**स्तम्भश्चेष्टाप्रतीघातो भयहर्षामयादिभिः ।**
**वपुर्जलोद्गमः स्वेदो रतिघर्मश्रमादिभिः ।।**
**हर्षाद्भुतभयादिभ्यो रोमाञ्चो रोमविक्रिया ।**
**मदसम्मदपीडाद्यैर्वैस्वर्य्यं गद्गदं विदुः ।।**
**रागद्वेषश्रमादिभ्यः कम्पो गात्रस्य वेपथुः ।**
**विषादमदरोषाद्यैर्वर्णान्यत्वं विवर्णता ।।**
**अश्रुनेत्रोद्भवं वारि क्रोधदुःखप्रहर्षजम् ।**
**प्रलयः सुखदुःखाभ्यां चेष्टाज्ञाननिराकृतिः ।।**

(साहित्यदर्पणे, ३ पृ० १५३)

**सञ्चारिभावाः**

चित्तवृत्तयः सन्ति सञ्चारिभावाः । सञ्चारिभावाः सन्ति स्थायिभावानां सहकारिकारणानि । एते सन्ति त्रयस्त्रिशत् । दर्पणे विश्वनाथ आह—

**विशेषादाभिमुख्येन चरन्तो व्यभिचारिणः ।**
**स्थायिन्युन्मग्ननिर्मग्नास्त्रयस्त्रिशच्च तद्भिदा ।।**

(३/१४१)

इमे नान्तं यावत् स्थिताः दृश्यन्ते । कदाप्युद्बुद्धाः कदापि च विलीना भवन्त्येते ।

स्थायिभावाः कस्याञ्चन स्थित्यामुत्पन्ना भूत्वा निमग्ना जायन्ते चेत् तदा तेऽपि सञ्चारिण उच्यन्ते । अशक्तविभावेभ्यो यदोत्पद्यन्ते तदा ते (स्थायिभावाः) सञ्चारिभावाः इति कथ्यन्ते । उक्तञ्च संगीतरत्नाकरे—

**रत्यादयः स्थायिभावाः स्युर्भूयिष्ठविभावजाः ।**
**स्तोकैर्विभावैरुत्पन्नास्त एव व्यभिचारिणः ।।**

अनियतरसेषु प्रयुक्तत्वात् स्थायिभावानाम् सत्सु च तेषु इतररससहायकेषु सा आस्वाद्यता नावशिष्यते या नियतेषु रसेषु विद्यमानत्वात् तेषां, तेष्वास्वाद्यतानुभूयते ।

काव्ये वर्णितानां रामादीनां तत्तच्चरित्रमाकर्ण्याधीत्य वा किञ्च रूपकेषु दृश्यमानानां पात्राणां तं तं व्यापारं प्रेक्ष्य श्रोतुर्वा द्रष्टुः सम्बन्धः साधारण्यं प्रतिपद्यते, कृत्स्नतया सर्वविधोऽपि भेदभावो विलुप्तः सञ्जायते, अध्येता वा द्रष्टा द्वावपि अहममुकः स चामुक इत्येतत्, सर्वमपि विस्मरतः, एतत्सर्वमपि

तस्य ध्यानपथात् स्रंसते।[1] काव्ये सीतारामादीनां तत्तच्चरित्राण्यधीयानः किं वा नाटके दुष्यन्तशकुन्तलादीनां येषामभिनयं नटः कुरुते, दर्शनकाले द्रष्टा 'अहं काव्याध्येता वा नाटकस्य द्रष्टास्मि, अयं रामः अयं नटः, अयं नटो दुष्यन्तस्याभिनयं करोती'त्यादिकं सर्वं विस्मृत्य लोकोत्तरैक्यविषयकानन्दे निलीयते। एतस्यां स्थित्यां केवलानिर्वचनीयानन्दवर्षिणा रसेनानुगृह्यते सः। इदं हि दिव्यमैक्यं साहित्यशास्त्रे साधारणीकरणमिति परिभाष्यते।

साधारणीकरणेन समुपस्थाप्यमानाभ्यो विभावादिसामग्रीभ्य उद्बुद्धा भवन्ति सर्वे च वासनारूपेण स्थिता रत्यादिस्थायिभावाः। ततश्च ते तन्मयीभावा ब्रह्मास्वाद इव आनन्दाधायका भवन्ति। सामाजिकास्तदुपभोगावसरे नितान्तमेव वेद्यान्तरसम्पर्कशून्याः सञ्जायन्ते। एतस्य रसस्यानुभूतिस्तावदेव भवति, यावद् विभावादीनां त्रयाणामपि भवति प्रतीतिः। विभावादीनां रसस्य च प्रतीत्यां कारणकार्यरूपपूर्वापरसम्बन्धो नास्ति, अपि तु द्वयोरपि प्रतीत्योरेकत्र युगपदवस्थानं जायते। अतः साहित्यशास्त्रस्य भाषायां रसः समूहालम्बनात्मको मतो भवति। साहित्यदर्पणकार इह वदति—**'यस्मादेष विभावादिसमूहालम्बनात्मकस्तस्मान्न कार्यः'** (३/२१)

रसास्वादप्रक्रियायां यद्यपि विभावोऽनुभावो व्यभिचारिभावश्च खण्डशः (एकैकशः) प्रतीतिपथमुपसरन्ति परमेषां खण्डशः प्रतीतिस्त्वरितगतित्वाल्लक्षिता न भवति। रसप्रतीत्यां ते त्रयोऽपि अखण्डाः परस्परसंश्लिष्टाश्च भवन्तः स्वां स्थितिं निदधति। एतस्मादेव कारणात् रसोऽखण्डो मतोऽस्ति। अस्मादेव कारणाच्च रसचर्वणायां विभावादीनां मध्ये कस्यचनैकस्य सर्वाधिकत्वेन सर्वातिशयाच्छादकत्वेन च प्रतीतिर्न मतास्ति। रसास्वादे प्रपाणकरसन्यायेन तेषां त्रयाणामपि संश्लिष्टा विचित्रा अवर्णनीया च प्रतीतिरुद्भवति। अत्राचार्यो विश्वनाथः साहित्यदर्पणे तृतीयपरिच्छेदे ब्रूते—

**'ततः सम्वलितः सर्वो विभावादिः सचेतसाम्।**
**प्रपाणकरसन्यायाच्चर्व्यमाणो रसो भवेत्॥'**

विभावादीनां यथासंख्यं कारणकार्यसहकारित्वेऽपि त्रयाणामपि रसोद्बोधे कारणत्वमित्यत्राप्युल्लेखः कृतोऽस्ति। अधःस्थिता कारिका तेषां कारणत्वं निर्दिशति—

---

१ साधारण्येन रत्यादिरपि तद्वत् प्रतीयते॥
परस्य न परस्येति ............॥ (दर्पणे, ३ परि०)

**कारणकार्यसञ्चारिरूपा अपि हि लोकतः ।**
**रसोद्‌बोधे विभावाद्याः कारणत्वेन ते मताः ॥**

(साहित्यदर्पणे, तृतीयपरिच्छेदे)

कस्याञ्चिद् रचनायां विभावादिष्वेकतमस्यैव वर्णने सत्यपि अवशिष्टौ द्वौ भावावाक्षिप्येते । तथाविधत्वेऽपि रसचर्वणा सम्भाव्यते । तद्‌विधता न दोषत्वेन गण्यते; अत एव दर्पणे प्रोक्तम्—

सद्‌भावश्चेद् विभावादेर्द्वयोरेकस्य वा भवेत् ।
झटित्यन्यसमाक्षेपे तदा दोषो न विद्यते ॥

काव्यप्रकाशेऽपि वृत्यामुक्तम्—

**'यद्यपि विभावानामनुभावानां ''व्यभिचारिणां केवलानामत्र स्थितिः, तथाप्येतेषामसाधारणत्वमित्यन्यतमद्वयाक्षेपकत्वे सति नानैकान्तिकत्वमिति ।'**

रसस्य (काव्यानन्दस्य) प्रतीतिं सचेतसः सर्वे समानभावेन कुर्वन्ति न वा इत्येतस्मिन् विषये व्यावहारिकीं भुवं संस्पृश्य चेद् विचारो विधीयते तदा प्रतीयते यत् काव्यस्य पठने श्रवणे वा किं च नाटकस्य दर्शने एकैकः सहृदयो रसं न समानभावेनास्वदते, प्रत्येकस्य सहृदयस्य मनःस्थितेर्भिन्नत्वात् । प्रतिसहृदयस्य जनुर्जाताः संस्काराः न तुल्या भवन्ति, किञ्च वातावरणजन्यास्वपि परिस्थितिषु तारतम्यं दृष्टं भवति । अत एव न प्रतिसहृदयः समानभावेन काव्यानन्दमुपभुनक्ति ।

काव्यनाटकगता विभावादिकाः समाना एव सर्वेषां पुरो यद्यपि प्रस्तुता भवन्ति, परं तथात्वेऽपि रसानन्दप्रतीतयां भेदः प्राप्यते । अतोऽत्र भरतस्य सूत्रे विभावादिकानां तात्पर्यं काव्यनाटकगतविभावादिषु न, अपि तु तेषु विभावादिषु तदीयं तात्पर्यं ये (विभावादिकाः) काव्यनाटकगतविभावादिभ्यः सहृदयहृदयनिमित्ते प्रतिबिम्बितं रूपं परिगृह्णन्ति । एतस्मात् प्रतिबिम्बितविभावादिकारणात् प्रत्येकः सहृदयोऽभिन्नमेव काव्यानन्दमाप्नोति ।

रसस्यास्वादत्वे आस्वाद्यत्वे च भरतस्य वाक्यानां सारं इह निधीयते यो हि द्रष्टव्योऽस्ति—

**यथा हि नानाव्यञ्जनौषधादिद्रव्यसंयोगाद् रसो निष्पद्यते तथैव नानाभावोपगतत्वात् स्थायिभावानां, तेभ्यो रस उत्पद्यते वा ते रसत्वे परिणता जायन्ते ।**

**यथा नानाव्यञ्जनसंस्कृतमन्नं भुञ्जाना रसानास्वदन्ते, हर्षादिकं चा-**

**नुभवन्ति तथैव भावाभिनयाभिव्यक्तीकृतान् वागङ्गसत्त्वोपेतान् स्थायिभावान् सहृदया आस्वदन्ते, प्रीत्यादिकञ्चानुविन्दन्ति ।**

अभिनवमतेन काव्यगतविषया असम्भवा इत्येतन्मन्यमानो जनो न कदापि रसमास्वादयितुं क्षमः । लोकसामान्यविषययोजनायां प्रायेण व्यक्तिहृदयसंवादः संघटते; अतस्ते रसमनुभवितुं प्रभवन्ति ।

भरतोऽपि हृदयसंवादिनोऽर्थस्य रसजनकतां प्रतिपादयति—

**योऽर्थो हृदयसंवादी तस्य भावो रसोद्भवः ।**
**शरीरं व्याप्यते तेन शुष्कं काष्ठमिवाग्निना ॥**

कियद्भिरेव पुण्यात्मभिर्ज्ञातृभिर्जनैस्तादृशमधुरकाव्यश्रवणाध्ययनवशेन आविर्भूताद् विभावादिसमूहालम्बनात्मकत्वादेक एवात्मत्वेनैव प्रकाशते । न तु स ज्ञानान्तरप्रकाश्यः । अस्ति स आमोदरूपं ज्ञानम् । तदानन्दानुभूतिकालेऽन्यस्य ज्ञेयपदार्थस्य न सम्पर्को भवति स्तोकमपि । आनन्दमयत्वात् स ब्रह्मानन्दसहोदरत्वाय कल्पते । अस्ति स लोकोत्तरचमत्कारचारुः । स निजशरीरमिवैकत्वेनानुभूयते । यथा देहात्मानौ वस्तुतो भिन्नावपि 'अहं यामि'— इत्यभिन्नत्वेन प्रतीयेते, तथा नायकादीनां नायिकादिगतरत्यादितः स्वस्वरत्यादिराश्रयादिभेदेन भिन्नोऽपि तथाविधवाग्भङ्ग्यादिव्यापारसामर्थ्यादभिन्नत्वेन सामाजिकैः प्रतीयते ।

काव्यानन्दस्य (रसस्य) स्थितिरेकतो लौकिकभावनागता वर्तते, एकतश्चाध्यात्मिकक्षेत्रगता । लौकिकभावना मानवे सुखं दुःखञ्चोत्पादयति । परमितो रसो यद्यपि लौकिकसाधनसमुद्भूतः परं सः सुखस्वरूपः सुखात्मको भवति । इदं तु सुखं न भवति सामान्यम् । भवति तदसामान्यमेव । अत एव तल्लोकोत्तरमित्युच्यते । आध्यात्मिकक्षेत्रगत आनन्द उभाभ्यामपि (लोकानन्दात, काव्यानन्दाच्च) आनन्दाभ्यां विलक्षणो भवति । वस्तुत इदमेव सुखमलौकिकं भवति । तदेवमानन्दस्त्रिषु भेदेषु विभक्तः कर्तुं शक्यः —

(१) लौकिकानन्दः (इन्द्रियानन्दः)

(२) काव्यानन्दः

(३) ब्रह्मानन्दः ।

प्रथम आनन्दः सांसारिकपदार्थपरको वर्तते । द्वितीय आनन्दः काव्याध्ययनश्रवणाभ्यां नाटकस्य च दर्शनात् प्राप्तो भवति, एष एव काव्यानन्द

इति कथ्यते। तृतीयश्चानन्दो ब्रह्मनिष्ठो भवति, योगिभिः स उपलभ्यते। एष परमार्थतो, ब्रह्मानन्द आनन्दो भवति न स लौकिकमानन्दं मनागपि स्पृशति। यथा लौकिक आनन्दो वृत्तिगतो भवति तथा ब्रह्मानन्दो वृत्तिगतो न भवति। तत्प्रतीतिस्तु वृत्तिशून्यावगन्तव्या। काव्यानन्दो लौकिकानन्द-ब्रह्मानन्दोभयमध्यस्थितो भवति। परमुन्मुखता तु तस्याधिक्येन ब्रह्मानन्दम्प्रति दृश्यते।

ब्रह्मानन्दमधिकृत्य परमपरिमितशब्दैः कथनमिहोपयुक्तं स्यात्। ब्रह्मानन्द आत्मनः स्वरूपमस्ति। तदभिव्यक्तिस्तुरीयावस्थायां भवति। तदवस्थायां विषयी विषयश्च एक एव, न भिन्नः। द्रष्टा दृश्यमानः पदार्थश्चैकस्मिन् सम्पूर्णे ब्रह्मणि समवेततां प्राप्नुतोऽतस्तावेकाकारतां प्रपद्येते। एतद्विधत्वादेव तत्प्रतीतिर्वृत्तिशून्यत्वमाम्नातम्। तत्प्रतीतेरर्थोऽस्ति ज्ञान-प्रेम-सौन्दर्याणां जीवितं समष्टिरूपमैक्यम् तस्यानुभूतिरेव 'आनन्द' इति गीयते। तदनुभवानेहसि 'कोऽहम् किमपि च तत्, कोऽयमत्र प्रपञ्चः' इत्येतदादिकं सर्वमपि विलीयते। एतस्यानन्दस्यैतद्विधत्वादेव न तत्समः कोऽप्यानन्द इति।[1]

**(क) यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह। आनन्दं ब्रह्मणो विद्वान् न बिभेति कदाचनेति।**

**(ख) स एष रसानां रसतमः परमः परार्ध्योऽष्टमो यदुद्गीथः।**

लोकस्थपदार्थानवलम्बितत्वात्, कविप्रतिभाजन्यकल्पनामयपदार्थाश्रितत्वाच्च काव्यानन्दो विषयानन्दात् (लौकिकानन्दात्) एकान्ततोऽतिशयदूरे आस्ते। काव्यानन्दस्य वैशिष्ट्यमिदम्—तत्र लोकतत्त्वानि साधारणं रूपं परिगृह्णन्ति। तत्तद्विधगुणसम्पन्नत्वात् सोऽस्ति सार्वभौमोदात्ततमोत्तुङ्गतमभावभूस्थितः। काव्यानन्दोऽयं ब्रह्मानन्दाद् विलक्षणः। एकतस्तु स ब्रह्मानन्दस्य विशिष्टांश इव। एकतश्च स रतिशोकोत्साहादिविभिन्नोपाधिषु विभक्तो भवितुमर्हति।

त्रिविधानामप्यानन्दानां पारस्परिकवैषम्यविशिष्टत्वे हेतुरयम्—

लौकिकानन्दे मानवस्य रजोगुणस्तमोगुणश्च सम्पृक्तोऽस्ति। तत्र सत्त्वगुणोऽभिभूतः सन् अवतिष्ठते। 'रस' इत्येतेन नाम्ना प्रथिते आनन्दे तु

---

१. तैत्तिरीय उप० १/५

२. छान्दोग्योपनिषत्, ३/१३/७

रजस्तमश्चाभिभूते भूत्वा सन्तिष्ठेते, सत्त्वगुणस्तु भवति समुद्दीप्तः ।

द्वयोरप्येतयोर्लौकिकानन्दकाव्यानन्दयोः सर्वेऽपि सत्त्वादिगुणा न्यूनाधिका भवन्तः समुज्जृम्भन्ते परमाध्यात्मिके आनन्दे (ब्रह्मानन्दे) केवलं सत्त्वगुणश्चकास्ति दीप्यते च । द्वावपि रजस्तमोगुणौ तत्र स्वस्थितिं निधातुमीशाते । अतोऽयमलौकिको ब्रह्मानन्दो द्वावप्यानन्दौ अतिशयाते, तौ द्वावप्यानन्दौ पराभूय स ब्रह्मानन्दो विद्योतते ।[1] रजस्तमोगुणौ तद्दिशि पदमप्येकं निधातुं न क्षमेते । अतोऽयं ब्रह्मानन्दो द्वाभ्यामपि ताभ्यामानन्दाभ्यां गरिष्ठः ।

रसो न कार्यो न च ज्ञाप्यः । न च स निर्विकल्पकं ज्ञानं, न च सविकल्पकं ज्ञानम् । अस्मिन्नेव प्रसङ्गे काव्यप्रकाशकार आह—

**'स च न कार्यः, विभावादिविनाशेऽपि तत्सम्भवप्रसङ्गात् । नापि ज्ञाप्यः सिद्धस्य तस्यासम्भवात् । अपि तु विभावादिभिः व्यञ्जितश्चर्वणीयः:**

(चतुर्थोल्लासे)

रसस्याकार्यत्वेऽज्ञाप्यत्वे सति नान्यः कोऽपि हेतुस्तत्र सम्भवः । हेतू द्वावेव भवतः कारकहेतुः, ज्ञापकहेतुश्च । तस्य तद्विधत्वाद् उक्तावेतौ द्वावपि हेतू न तत्र संगच्छेते । अत्र काव्यप्रकाशकारो ब्रूते—

**'कारकज्ञापकाभ्यामन्यत् क्व दृष्टमिति चेत् न, क्वचिद् दृष्टिमित्यलौकिकत्वे सिद्धे भूषणमेतन्न दूषणम् ।**

आशयोऽयम्, रसस्य व्यञ्जका भवन्ति विभावादयः । न कारकज्ञापकहेतू तस्य व्यञ्जकौ भूत्वा प्रवृत्तौ भवितुमर्हतः । एतद्विशिष्टतावशादेव रसोऽलौकिक इति कथ्यते । लोके कारकज्ञापकाख्यौ यौ द्वौ हेतू प्राप्येते ताभ्यां द्वाभ्यामपि विभावादिहेतुर्विलक्षणोऽत एव तस्यालौकिकत्वं सिद्ध्यति ।

निर्विकल्पसविकल्पकज्ञाने न तस्य (रसस्य) ग्राहके इत्येतस्मिन् विषये मम्मटाचार्यः स्वकाव्यप्रकाशे चतुर्थोल्लासे शंसति—

**तद् ग्राहकं न निर्विकल्पकं विभावादिपरामर्शप्रधानत्वात् । नापि सविकल्पकं चर्व्यमाणस्यालौकिकानन्दमयस्य स्वसंवेदनसिद्धत्वात् । उभयाभावरूपस्य ह्युभयात्मकत्वमपि पूर्ववल्लोकोत्तरतामेव गमयति; न तु विरोधमिति श्रीमदभिनवगुप्तपादाः ।'**

---

१. (क) बृहदारण्यकम्, ५/५/२

(ख) मुण्डकोपनिषत्, २/१/१०

'नामजात्यादियोजनासहितं ज्ञानं सविकल्पकम्। यथा घटपटादिपदार्थानां ज्ञाने तत्स्वरूपेण सह वस्तुनो नामजात्यादिकस्यापि भानं भवति, अतो घटापटादिकानां ज्ञानं सविकल्पकज्ञानमिति कथ्यते। भवति च तच्छब्दव्यवहारगोचरम्। परं रसानुभूतिस्तु स्वसंवेदनमात्ररूपा, न शब्दव्यवहारस्य विषयो भवति। अतस्तत्र नामजात्यादिकानां कृतेऽवसर एव न। रसस्यैतद्विधविशिष्टत्वात् सा सविकल्पकज्ञानेन न ग्राह्या।

सविकल्पकज्ञानाद् भिन्नं निर्विकल्पकं ज्ञानं भवति। नामजातिविशेषणविशेष्यभावादिरहितकेवलवस्तुमात्रावगाहि ज्ञानं निर्विकल्पकं ज्ञानमिति कथ्यते। अत्रोक्तिरियं प्रसिद्धा '**बालमूकविज्ञानसदृशं निर्विकल्पकं**।' विषयोऽयमुदाहरणद्वारेण विशदतया स्फारीक्रियते—

घटिका गृह्यताम्। बालो न वेत्ति सः कः पदार्थः ? कश्च तस्य प्रयोगः ? किं तदीयं नाम ? एतावदेव न, स तदाकारमपि न ततः प्राक् पश्यति स्म, अतः स तदाकारेऽप्यनभिज्ञः। घटिकाविषये तदीयं तादृशं ज्ञानं निर्विकल्पकं ज्ञानमस्ति। यश्च जनो बालाज्ज्येष्ठो घटिकाया नामोपयोगादिकं जानाति तस्य तद्विधं ज्ञानमेव सविकल्पकज्ञानमस्ति। प्रथमं वस्तुनि निर्विकल्पकं ज्ञानमेव भवति ततश्च (यदा वस्तुनो नामादिकं विदितं जायते) तस्मिन् सविकल्पकं ज्ञानं जायते। रसस्य प्रतीत्यामपि विभावादिकाः प्रतीयन्तेऽतः समूहालम्बनात्मकत्वात् निर्विकल्पकं ज्ञानं न तद्ग्राहकं भवितुं शक्नोति। रसस्य स्वसंवेदनत्वात् शब्दव्यवहारागोचरः सः। अत एव सः सविकल्पकस्यापि ज्ञानस्य विषयो न भवति। रसस्यैतद्विधत्वं तस्यालौकिकत्वं विनिगमयति।

आंग्लभाषायां रसानुभूतिः 'Aesthetic experience or Poetic pleasure' इति कथ्यते। तत्स्वरूपमधिकृत्य प्रतीच्यानां प्रख्यां मन्तव्यानीदृशानि :—

प्लेटो रसस्यानुभूतिरिन्द्रियलभ्येति मनुते। स बुद्धिम् आत्मानञ्च भिन्नं मन्यते। न तद्विचारेण तयोरैक्यम्। अतः स द्विविधामनुभूतिं स्वीकुरुते। ते स्त इमे—(१) आध्यात्मिकी अनुभूतिः (२) इन्द्रियगोचरानुभूतिः। तन्मतेन आध्यात्मिकी अनुभूतिर्वा सौन्दर्यानुभूतिस्त्वात्मानुभव एव। परं काव्यानुभूतिरिन्द्रियानुभवो वर्तते सः काव्यानुभूतिं सौन्दर्यानुभूतेर्गरीयसीमगच्छति। अस्ति सा अनृता, अस्वास्थ्यकरी च।

अरस्तुर्दार्शनिको हि काव्यानन्दमाध्यात्मिकं न मत्वा ऐन्द्रियमेवावगच्छति। न तन्मतेन सोऽश्रेष्ठ इत्येतद्धेतोस्तं न सोऽवजानाति। स मनीषी काव्यानन्दं प्रत्यक्षेन्द्रियज्ञानात् सूक्ष्मतरं ज्ञानं मन्यते।

'काव्यानन्द आध्यात्मिक' इत्येतस्या मान्यताया: प्रवर्तयितास्ति प्लोटिनसः। कला प्रकृतिमनुसरतीत्येतं प्लेटोसम्मतं निर्णयं नायं प्लेटोनिस आद्रियते। प्रकृतिर्ज्ञानस्य (आत्मनः) अनुकृतिरस्ति। कला (काव्यकला) चेदनुकृतेरप्यनुकृतित्वेन मता स्यात् तदा सा (कला) अनृता अस्पृहणीया चोक्ता स्यात्। वस्तुत: कलाया: (काव्यस्य) प्रकृतेश्च द्वयोरप्युद्भवो ज्ञानाज्जायते, अत एव कलाजनितानन्दोऽप्याध्यात्मिको वर्तते।

भारतीये काव्यशास्त्रे रसो ब्रह्मानन्दसहोदरत्वेन मतो न च ब्रह्मानन्दः। परं तादृश: सन्नपि सोऽलौकिको मतः। लौकिकविषयपरिधिगतो न रसस्तस्मात् तत्रालौकिकत्वमेवापादचूडं स्वस्थं सत् सन्तिष्ठते।

लौकिका: पदार्था: वर्तमानभूतभविष्यत्कालगता: सन्ति। परं रसस्तु य आनन्दमय: प्रकाशमयश्च, न कस्मिंश्चित्कालविशेषे स्वां स्थितिं निदधात्यपि तु स: सर्वकालगतः। रसस्य कार्यत्वाद् ज्ञाप्यत्वाच्च तस्य वर्तमानकालगता, न स: कार्यो न च ज्ञाप्योऽतस्तस्यावर्तमानगतत्वमपि सिद्ध्यति। रसो नित्योऽपि न, विभावादिज्ञानात् प्राक् तस्य सत्ताया एवासम्भवात्।

रसो लौकिकविषय इव न परोक्षज्ञानं नापरोक्षज्ञानम्। साक्षादानन्दविषयत्वात् स न परोक्षो भवितुं सुशकः शब्दविषयत्वाच्च न सोऽपरोक्ष एव वर्तते।

एतामेव मान्यतां काण्टः, शिलरः, हीगेलोऽन्ये च कतिपये तद्विषये निदधते। क्रोचे काव्यानन्दमिमं रहस्यवादिसौन्दर्यत्वेन जानाति।

एतस्याध्यात्मवादिसौन्दर्यदर्शनस्य, गच्छता कालेन, प्रबलतया विरोध उत्थितः। मार्क्स: फ्रायडश्च स्वसिद्धान्तं प्रकाशयन्तौ सौन्दर्यानुभूतिं व्याख्यातवन्तौ। मार्क्समतेन कलाया: अनुभूतिरार्थिकहितानुशासितभौतिकानुभूतिरस्ति। परं फ्रायडस्य विचारेण सा कामप्रेरितेन्द्रियास्वाद:। प्रतीच्यानां बुधानां कृतिषु तदनुभूतेर्हि बौद्धिक्यो नैतिक्यो मानोविज्ञानिक्यश्च व्याख्या: बभवु:।

काव्यानन्दः कल्पनापरक आनन्द इत्येतद् एडिसनोऽचकथत्। तन्मतेन केनचन मूलभूतवस्तुना कयाचन च कलयानुगम्यमानयो: रूपयोर्मध्ये प्राप्यमाणस्य साम्यस्य विभावनेन (contemplation) य आनन्द उपलभ्यते

स भवति कल्पनाविषयक आनन्दः। काव्यानन्दः कल्पनानन्द एव। स तमैन्द्रियादाध्यात्मिकाच्चानन्दात् भिन्नमेवावगच्छति।

काव्यानन्दः सहजानुभूतेरानन्दः इति क्रोचे मन्यते। तन्मतेन आत्मनो द्वे क्रिये स्तः — (१) विचारात्मिका, (२) व्यवहारात्मिका च। विचारात्मिकायाः (ज्ञानस्य) अपि द्वे रूपे स्तः —(१) स्वयम्प्रकाशार्हं ज्ञानम्। इदं ज्ञानं कल्पनया प्राप्यते। (२) प्रमेयम् (निश्चितं ज्ञानम्) च। कला स्वयंप्रकाश्यं ज्ञानमुच्यते। कला—काव्यम् वा कल्पनाजनितं ज्ञानमिति बोध्यम्। इदमेव ज्ञानं सहजानुभूतिरिति कथ्यते।

सहजानुभूतिपरक मतं वस्तुतो न स्वतन्त्रं मतम्। एडिसनस्यैव कल्पनानन्दो दार्शनिकरूपत्वेन प्रस्तुतीकृतः।

काव्यानन्दोऽनिर्वचनीयो विलक्षण आनन्दः। सर्वविधेभ्यो लौकिकेभ्य आध्यात्मिकेभ्यश्चानुभवेभ्यः स भिन्नः। एतां प्राच्यपरम्परागतां मान्यतां ब्रेडले, क्लाइवो, बैलश्च (अन्येऽप्यनेके) कलावादिनः स्वीकुर्वन्ति।

इत्थं प्रतीच्यानां विचारकाणां मतेन काव्यानन्दः ऐन्द्रियादाध्यात्मिकाच्चानुभवात् कल्पनाविषयको विलक्षण एव आनन्दः सिद्ध्यति।

प्रतीच्यानामेतेषां मतानामस्ति महत्त्वम्। मनोविज्ञाननिकषे तेषां मतानां शुद्धत्वं प्रमाणीभवति। काव्यानुभूतिमुद्दिश्य विदुषामेतादृशाश्च विचाराः परमसंक्षेपेण निधीयन्ते :—

(क) काव्यानुभूतेरैन्द्रियानुभूतित्वेन स्वीकरणं नोचितम्, तथात्वे, काव्ये वर्णितशोकजुगुप्सादिव्यञ्जनाप्राप्तानुभूतिरपि शोकमयी जुगुप्सामयी च मता स्यात् काव्यानुभूतिस्तु रतिहासशोकजुगुप्सादिस्थितिष्वप्यानन्दमयी दृश्यते।

(ख) इयमस्त्याध्यात्मिक्यनुभूतिरित्यपि वक्तुं शक्या। प्रथमं तु नैतस्मिन् विज्ञानयुगे आत्मनः स्थितिः (सत्ता) सहजमान्या। अपरञ्च काव्यानन्दात् प्राप्तायाश्चञ्चलतायाः सम्भावना आध्यात्मिकानन्दे न कर्तुं शक्या भवति। आत्मनो हि सदैव शुद्धत्वादचञ्चलत्वाच्च। काव्यानुभूत्यामैन्द्रियविकारस्य स्थितिः सहजसम्भवास्ति। परमाध्यात्मिक्यामनुभूत्यां न सा सम्भाव्या।

(ग) काव्यानन्दः कल्पनाविषयकोऽपि नानन्दः। कल्पनायाः मनोबुद्ध्योः

क्रियामात्रत्वात् । नास्ति तदीया स्वतन्त्रसत्ता । अतः कल्पना-जनित आनन्दः ऐन्द्रियाद् बौद्धिकाच्चानन्दात् सर्वथा न भिन्नः ।

(घ) 'काव्यानन्दो विलक्षणोऽनिर्वचनीय आनन्द' इत्येतत् कथनं न समस्यायाः समाधानम् । तत्तु समस्यातः पलायनमेव ।

आलोचकमूर्धन्यस्य आइ० ए० रिचर्ड्स महोदयस्य मतमुल्लेखनीयमस्ति । तद् यथापेक्षं पुष्टतरं मनोविज्ञानशास्त्रानुकूलञ्च वर्तते । तन्मतेन काव्यानन्दोऽनिर्वचनीयो विशिष्टश्चेत्येतत्कथनं न युक्त, यतो हि सानुभूतिरपि साधारणेन्द्रियद्वारेणैव प्राप्यते । तस्माद्धेतोः काव्यानुभूतिरपि ऐन्द्रियानुभूतेर्न पृथगित्येतत् स ब्रूते ।

वस्तुतस्त्वस्यामनुभूत्यां चित्तद्रुतिविस्तारादिकमानसिकसंवेदनास्तु घटन्त एव, एवावदेव न तत्र रोमाञ्चाश्र्वादिशारीरिक्यः संवेदनाः अपि भवन्त्येव । सत्यप्येतादृशे तथ्ये, ज्ञातव्यमिदमस्त्यत्र—लोके प्रियजनस्पर्शेणास्मच्चित्तं द्रुतिमस्मद्वपुश्च रोमाञ्चं गच्छति । तद्द्रुतेः किञ्च रोमाञ्चस्यानुभूतिर्नूनं रङ्गमञ्चाद् वा काव्यपठनात् प्राप्तायाः द्रुतेः किञ्च रोमाञ्चाद् भिन्नविधैव भवति । न तत्र तावत् प्रत्यक्षत्वं भवति न च तीव्रत्वम् । तत्र कस्यापि न्यूनतरन्यूनतमस्यांशस्य भिन्नतावश्यमेव भवति । काव्यानुभवस्य प्रत्यक्ष-घटनाजनितानुभवाभावात् सोऽनुभवस्तु भावितघटनाया अनुभवो भवति । अतः काव्यानुभूतिः साधारणेन्द्रियानुभूतिर्न सा भावितेंद्रियानुभूतिर्वर्तते ।

तदेवं पश्चिमीयानां विचारकाणां विचारानुसारेण एव हि काव्यानन्दो लौकिक एव सिद्ध्यति । परं सर्वेऽपि लौकिका आनन्दा न भवन्ति सामान्याः । तेषां भवन्ति कोटयो बहुलाः । सूर्याराधने य आनन्दः सः स्वकीयं विशिष्टत्वं निदधाति । सुस्वादुभोजनं यमानन्दं बिभर्ति तमेवानन्दं गणित-राजनीतिपरक-प्रश्नानां समाधानं न निधत्ते । एते सर्वेऽपि भौतिका आनन्दाः स्वकीयां स्वकीयामेव विशिष्टतां कोटिञ्च धारयन्ति । काव्यानन्द एतेभ्यः सर्वेभ्य आनन्देभ्यो विशिष्टतम आनन्दः । परमयमाध्यात्मिकानन्दोऽपि न, स तु नैजमेव वैशिष्ट्यमश्नुते । न च स ऐन्द्रियानन्द इव । स तु इन्द्रियगोचरानान्दान् अतिशेते । स तद्विधान् सर्वान् लौकिकनान्दानभिभवति । तद्गत आनन्द-स्तत्तद्गतेभ्य आनन्देभ्योऽन्यविधः । न च स ब्रह्मानन्द एव, अत एव तु स ब्रह्मानन्दसहोदर इति साहित्याचार्या वदन्ति । स तैर्लोकोत्तरत्वेन मतः । परं लोकोत्तरशब्दस्य तात्पर्यमलौकिकं न मन्तव्यमपितु लौकिकानन्दातिशायी आनन्दः स इति ज्ञेयम् ।

भरतकृते 'विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्ति'रित्येतस्मिन् सूत्रे भट्टलोल्लटादिका आचार्या येन प्रकारेण व्याख्यां विदधति सा च व्याख्या ववाप्युपरि यथास्थानं निर्दिष्टास्ति। तत्तदाचार्यकृतासु व्याख्यासु समीक्षका: कांश्चन दोषानपि दर्शयन्ति। अत्र कस्याचार्यस्य व्याख्यायां को दोष इत्येतस्य विषयस्य चर्चा क्रियते। एतेन रसमवगन्तुं साहाय्यमन्यदपि प्राप्तं भवति।

भट्टल्लोलटकृतां भरतसूत्रव्याख्यां समीक्षमाणानां समीक्षकाणां कथनस्यैष: सार: —

तत्र प्रमुखतया अनुकार्ये, गुणीभावेन च नटे रसस्योत्पत्तिरभिव्यक्ति: पुष्टिश्च मता। परं सामाजिक: कथं रसमनुभवत्येतस्या: समस्यायास्तत्र समाधानं न दृश्यते। अथ च रामादिकास्त्विदानीं न सन्ति, अतो वर्तमानसमये क्रियमाणैरभिनयैस्तेषु रसोत्पत्ति: संगच्छत एव न, अतस्तदनुकर्तरि नटे च रसोत्पत्तिर्न भवितुमर्हति।

एतौ स्तो द्वौ दोषौ आचार्यलोल्लटस्य व्याख्यायाम्।

आचार्यशङ्कुकस्यापि व्याख्या न वर्तते निर्दोषा। सामाजिको रसस्य साक्षात्कारं करोतीत्येतन्न सम्यगुपपादितम्। अनुमानेन यज्ज्ञानं भवति तद् भवति परोक्षम्। साक्षात्कारत्वं न तत्र दृश्यते। अत: अनुमितिवादस्यास्त्ययं महान् दोष:। अनुमितिवादाधारे रसास्वादनं न युक्ततयोपपादयितुं शक्यम्।

भट्टनायकस्य च व्याख्यायां दोष: प्राप्यते। भट्टनायकेन भावकत्वभोजकत्वाख्ययोर्द्वयोर्व्यापारयो: कल्पना कृतास्ति। तदीयौ कल्पितौ द्वौ व्यापारौ नानुभवसिद्धौ स्त:।

यस्य च स्थायिभावस्य भोगो निर्दिष्ट: स रामसीतादिगत: स्थायिभावो वा नटगतो वा सामाजिकगत इत्येतस्यापि स्पष्टीकरणं नास्ति। ईदृशो दोषस्तत्र संलक्ष्यते।

आचार्योऽभिनवगुप्त: स्पष्टतया सामाजिकगत: स्थायिभाव एव रसानुभूते निमित्तं भवति इत्येतदुपपादयति। स भट्टलोल्लट-शङ्कुकभट्टनाय्कानां मतानि सम्यगालोच्य स्वकीयमुक्तं सिद्धान्तं प्रतिष्ठापयति स्म।

परवर्तिन आचार्या: रस इत्येतस्मिन् तत्त्वभूते शब्दे रसभावादिकानष्टापि समावेशयन्त्यतो रस: 'रसादि' रिति व्यवह्रियते।

रसादिकं ध्वनेर्भेदत्वेन मत्वा आनन्दवर्धनो रसादेः सर्वेष्वप्युदाहरणेषु व्यंग्यार्थोऽनिवार्यतया विराजते इति वदति। स मन्यते यद् वाच्यार्थस्य प्रतीतेरनन्तरं सहृदयो रसमास्वादयितुं नैव शक्नुते।

रसस्य स्वशब्दोक्तिः (रसदोषः) उक्तायां धारणायां विद्यते। स्वशब्दतामुल्लिखन्नुद्भटः सर्वप्रथमं रसवदलङ्कारस्य लक्षणं प्रस्तुतीकुर्वन् दृश्यते। स ब्रूते—

**रसवद्दर्शितस्पष्टशृङ्गारादिरसादयम् ।**
**स्वशब्दस्थायिसञ्चारिविभावाभिनयास्पदम् ॥**

(का०सा०सं०, ४/३)

उक्तायाः कारिकायास्तात्पर्यमिदम्—रसवदलङ्कारः स, यत्र शृङ्गारादिकाः स्पष्टतया प्रधानत्वेन, अङ्गित्वेन, प्रदर्श्यन्ते। किञ्च स्थायिभावसञ्चारिभावैविभावानुभावसात्त्विकभावानां स्वशब्देन कथनं चापि कृतं स्यात्।

एतस्यालङ्कारस्यैव निमित्तेन स त्रीण्युदाहरणानि निदधत् प्राप्यते—

**इति भावयतस्तस्य समस्तान् पार्वतीगुणान्।**
**सम्भृतानल्पसङ्कल्पः कन्दर्पः प्रबलोऽभवत् ॥**

**स्विद्यतापि सगात्रेण बभार पुलकोत्करम्।**
**कदम्बकलिकाकोशकेसरप्रकरोपमम् ॥**

**क्षणमौत्सुक्यगर्भिण्या चिन्तानिश्चलया क्षणम्।**
**क्षणं प्रमोदालसया दृशास्यास्यमभूष्यत ॥**

(का० सा० सं०, ४/२-४)

उदाहरणमिदं रसवादिनां मतेन रसस्यास्ति, अलङ्कारवादिनां च मतेन रसवदलङ्कारस्य। परमत्र विचारणीयोऽयं विषयः किं कस्याञ्चन रचनायां सरसायां रसादेः स्वशब्दोक्तिरनिवार्यास्ति? उद्भटस्य टीकाकारः प्रतिहारेन्दुराज उक्तेषु पद्येषु विभावादिपञ्चतत्त्वानां स्वशब्देनोक्तिं निर्दिशन् लिखति—

अत्र कन्दर्पः (रतिः) स्थायिभावः, औत्सुक्यचिन्ताप्रमोदाः सञ्चारिभावाः, स्वेदपुलकादिकाः सात्त्विकभावाः इत्येते, पार्वती शिवश्च इत्येतदात्मको विभावोऽपि स्वशब्देन कथिताः सन्ति। इत्थमिह उद्भटसम्मतरसवदलङ्कारस्योक्तं लक्षणं चरितार्थीभवति। उद्भटप्रतिहारेन्दुराजयोरेतेन वक्तव्येन

उद्भटस्य समयं यावत् रसवदलङ्कारस्योदाहरणेषु विभावादेः स्वशब्दोक्तिरनिवार्यतया स्वीकृताऽभवदिति निष्कर्षो निर्गच्छति ।

आचार्य आनन्दवर्धनो यद्यपि कथितं रसदोषं स्पष्टतया नोल्लिलेख, परं **'रसो वाच्याश्रितो न भूत्वा व्यङ्ग्यस्थितो भवति'** इति तदभिमतम् ।

सः प्रकारान्तरेण दोषस्यास्य चर्चामवश्यं कृतवान् । अस्मिन् विषये तन्मतमिदम्—

कस्यामपि रचनायां विभावादिविषयिणी परिपक्वसामग्री चेत् स्वसद्भावं न निदधाति, रसादेर्नामोल्लेखमात्रेण रसानुभूतिर्न भवितुमर्हति । स ध्वन्यालोके लिखति—

**'न केवलं शृङ्गारादिशब्दमात्रभाजि विभावादिप्रतिपादनरहिते काव्ये मनागपि रसवत्त्वप्रतीतिरस्ति ।'**

(ध्वन्यालोके, १/४)

ततश्च कुन्तक उद्भटस्योक्तं कथनमुल्लिखन् तत्प्रत्याचख्यौ । तन्मतस्यायं सारः—

रसादेः स्वशब्दोक्तिद्वारेण चेद् रसचर्वणायाश्चमत्कारः स्वीक्रियते तदा तु घृतपूरा (मिष्टान्ना)दिकस्य नामग्रहणेनैव तदीय आस्वादः प्राप्तव्यः परं तथात्वं न दृश्यते यद्यपि कश्चित्—

**'स्वशब्दस्थायि-सञ्चारिभावाभिनयास्पदम्'** इत्यनेन पूर्वमेव लक्षणं विशिनष्टि ।

**तत्र स्वशब्दास्पदत्वं रसानाम् ।...यत्स्वशब्दैरभिधीयमानाः श्रुतिपथमवतरन्तश्चेतनानां चर्वणचमत्कारं कुर्वन्तीत्यनेन न्यायेन घृतपूरप्रभृतयः पदार्थाः स्वशब्दैरभिधीयमानास्तदास्वादसम्पदं सम्पादयन्ति ।**

**(वक्रोक्तिजीवितम्)**

कुन्तकानन्तरं मम्मटो रसादेः स्वशब्दवाच्यतां रसदोषेष्वजीगणत् । स दोषस्यैतस्य प्रेरणामानन्दवर्धनात् प्राप्तवान् इत्येतत् कुन्तकस्याभिहितात् प्रसङ्गादनुमीयते ।

सोऽस्मिन् विषये नैकान्युदाहरणानि प्रास्तावीत् स्वशब्दोपादानं व्यभिचारिणो यथा—

**सव्रीडा दयितानने सकरुणा मातङ्गचर्माम्बरे**
**सत्रासा भुजगे सविस्मयरसा चन्द्रेऽमृतस्यन्दिनि ।**

सेर्ष्या जह्नुसुतावलोकनविधौ दीना कपालोदरे
पार्वत्या नवसङ्गमप्रणयिनी दृष्टिः शिवायास्तु वः ।।

रसस्य स्वशब्देन शृङ्गारादिशब्देन च वाच्यत्वं यथा—

तामनङ्गजयमङ्गलश्रियं किञ्चिदुच्चभुजमूललोकिताम् ।
नेत्रयोः कृतवतोऽस्य गोचरे कोऽप्यजायत रसो निरन्तरः ।।

शृङ्गारस्य वाच्यता यथा—

आलोक्य कोमलकपोलतलाभिषिक्तव्यक्तानुरागसुभगामभिराममूर्तिम् ।
पश्यैव बाल्यमतिवृत्य विवर्तमानः शृङ्गारसीमनि तरङ्गितमातनोति ।।

स्थायिनो वाच्यता यथा—

सम्प्रहारे प्रहरणैः प्रहाराणां परस्परम् ।
ठणत्कारैः श्रुतिगतैरुत्साहस्तस्य कोऽप्यभूत् ।।

मम्मटमनुसरन् विश्वनाथश्च दोषमिमं वर्णयामास । रामचन्द्रगुणचन्द्रौ मम्मटस्य प्रसङ्गमिमं विलोक्य तत्र स्वकीयामसहमतिं प्रदर्शयन्तौ न तस्मिन् दोषे स्वमतिं निवबध्नतु: । केचित्तु व्यभिचारिरसस्थायिनां स्वशब्दवाच्यत्वं रसदोषमाहुस्तदयुक्तम्, व्यभिचार्यादीनां स्ववाचकप्रयोगेऽपि विभावपुष्टौ । तथाहि—

दूरादुत्सुकमागते......इत्यादिश्लोके उत्साहाख्यस्य सञ्चारिभावस्य स्वशब्दवाच्यरूपे प्रयुक्ते सत्यपि रसोत्पत्तिर्भवत्येव ।

**काव्यस्यात्मा**

'आत्मन्' इत्येतत् पदं वस्तुतो वेदवेदान्तादिशास्त्राणां पदं वर्तते । तत्रैव 'आत्मा' शब्दोऽभिप्रेतं स्वकीयमर्थमभिदधाति । साहित्यशास्त्रे तु तत्प्रयोगो लाक्षणिकरूपत्वेन कृतोऽस्ति । लक्षणं तस्य तत्र तत्र पृथक् पृथगपि दृश्यते । श्रीमद्भगवद्गीता आत्मानमधिकृत्य ब्रूते—

(क) न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः ।
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ।।
(२/२०)

(ख) नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः ।
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः ।। (२/२३)

(ग) नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः ।। (२/२४)

(घ) अशरीरं शरीरेष्वनवस्थेष्ववस्थितम् ।
महान्तं विभुमात्मानं मत्वा धीरो न शोचति ॥
(कठोपनिषत्. २/२२)

(ङ) आत्मानं रथिनं विद्धि (तत्रैव, ३/३)

(च) अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव ।
एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च ॥
(तत्रैव, ५/९)

(छ) सत्येन लभ्यस्तपसा ह्येष आत्मा सम्यग् ज्ञानेन ब्रह्मचर्येण नित्यम् ।
अन्तः शरीरे ज्योतिर्मयो हि शमोऽयम् पश्यन्ति यतयः क्षीणदोषाः ॥
(मुण्डकोपनिषत्, ३/१)

(ज) चैतन्यम् आत्मा ।
(शिवसूत्रम्, ईश्वरप्रत्यभिज्ञादर्शिनी व्याख्या, भास्करी टीका, पृ० २४५)

(झ) ज्ञानाधिकरणमात्मा ।
(न्या० वै०—तर्कसंग्रहे)

(ञ) प्राण एवात्मा ।
(केचिद् वेदान्तिनः)

(ट) चैतन्यविशिष्टशरीरम् आत्मा ।
(चार्वाकाः)

प्राणान् चेतनतां वा साहित्यशास्त्रम् 'आत्मा' इत्येतेन शब्देन व्यवहरति। तदर्थमेव तत् आत्मेति पदं प्रयुनक्ति ।

'काव्यस्यात्मा' इत्येतेन काव्यस्य तत्त्वं वा सार इत्येषोऽर्थोऽभिप्रेतः। आत्मास्ति तत् तत्त्वं येन काव्यं काव्यत्वमाप्नोति । तद्द्वारेण सहृदया वा दर्शकाः वा श्रोतारो वाध्येतारः काव्यस्य प्रमुखप्रयोजनभूतकाव्यानन्दं वा रसमनुभवन्ति । निःसंशयम्, काव्ये आत्मा इत्येषः शब्दो वाचकत्वेन न प्रयुक्तो भवन् लक्षकत्वेन प्रयुक्तोऽस्ति । तस्य वाच्यार्थतास्ति चेतनता वा ज्ञानं, परमिह तल्लक्ष्यार्थः काव्यस्यानिवार्यतत्त्वम् ।

यथा दैनिककार्यकलापप्रयोजनेन चेतनता वा जीवनम् (प्राणाः) अनिवार्यतयापेक्ष्यते तथैव काव्यशरीरप्रसङ्गे 'रसः' अनिवार्यसाधनत्वात् आत्मेति मतः। दैनिककार्यकलापे चेतनतास्ति यथा साध्यभूता वा सिद्धिभूता तथैव रसोऽपि

वर्तते साध्यभूतः सिद्धिभूतो वा। द्वयोरपि साधनमस्त्यात्मा (चेतनता-जीवनम्) शरीरपक्षे चेतनता (ज्ञानम्) यास्ति, काव्यशरीरपक्षे सैव तत्त्वमिति प्रोच्यते। तत्त्वमित्यत्र विमर्शणमपेक्ष्यते।

काव्ये आत्मेति शब्दः काव्यस्यानिवार्यव्यापकाभ्यन्तरसारो वा तत्त्वमिति ज्ञेयम्। तत् तत्त्वं तत्र (काव्ये) साधनत्वेन समुपतिष्ठते।

चेतनता वा ज्ञानं वा आत्मा किञ्च साध्यत्वेन क्रियाकलाप इत्येतावुभावपि मूलत एक एव। अतः आत्मा स्वयंसिद्धत्वेन मतं भवितुमर्हति। परं 'कार्ये कारणोपचारो न सामान्यरीत्याभ्युपगम्यते। अत एव एकत आत्मन एकस्मिंल्लक्षणे स (आत्मा) साधनत्वेन स्वीकृतोऽस्ति—इन्द्रियाधिष्ठातेति कथितः। अतोऽधिष्ठातृत्वेन तस्य कारणत्वमस्ति। इन्द्रियजन्यश्च कार्यकलापः कार्यत्वेन-साध्यत्वेन—मतो भवति।

काव्यशास्त्रे 'आत्मे'त्यस्य प्रयोगः सर्वप्रथमं वामनेन रीतेः काव्यस्यात्मत्व-प्रतिपादने कृतः। **'रीतिरात्मा काव्यस्येति'** स निजगाद।

आनन्दवर्धनो ध्वनिः काव्यस्यात्मत्वेन मेने। स आह—'ध्वनिरात्मा काव्यस्य' इति।

विश्वनाथस्तु रसं काव्यस्यात्मत्वेनामंस्त। स आह—

**'वाक्यं रसात्मकं काव्यम्'** इति।

आचार्यकुन्तको वक्रोक्तिं काव्यस्यात्मेति जगाद।

काव्यपुरुषरूपकप्रसङ्गे राजशेखरो हि (यो नवमे शतके बभूव) सर्व-प्रथमम् आत्मेत्येतच्छब्दं प्रयुयोज। यद्यपि आचार्यवामनकाले आत्मेति शब्दो विशिष्टनवीनार्थे पूर्णतया स्थिरतामगमत् परं काव्ये किमपि न किमपि तत्त्व-मनिवार्यतया स्वतां निदधातीत्येषा धारणा प्रबलतया मान्याभवत्। भामह-दण्ड्युद्भटवामनमतेन तत् तत्त्वम् अलङ्कारोऽस्त्यतोऽलङ्कारे एव मतिर्निबद्धा-भूत्। परमग्रे ध्वनिर्ध्वनिकारमतेन, वक्रोक्तिर्वक्रोक्तिकारमतेन, रसो विश्वनाथमतेन आत्मत्वेन मान्यतामयासिषुः।

अलङ्कारवादिन आचार्याः काव्यस्य सर्वान् शोभाकरान् धर्मान् अलङ्कार इति नाम्ना व्याजह्रुः। तत्र दण्डी कथयति—

**'काव्यशोभाकरान् धर्मान् अलङ्कारान् प्रचक्षते'**

(काव्यादर्श, २/१)

दण्डी अनुप्रासोपमादीनां तु काव्यशोभाकरधर्मत्वात् अलङ्कारत्वेन तान् वदत्येव परं स गुणरसभावरसाभासभावाभासप्रभृतीनपि अलङ्कारत्वेन प्रब्रवीति ।

भामहादिकालङ्कारवादिनामिह का धारणेत्येतस्मिन् विषये प्रकाशक्षेपणं युक्तमत उपस्रियते तद्दिशायाम्—

(१) प्राच्या आचार्याः (भामहादिकाः) अङ्गिभूतरसं भावं रसाभासं भावाभासं भावशान्तिं च, परवर्तिन आचार्याः आनन्दवर्द्धनप्रभृतय इव रस-भावादिनाम्ना नो व्यवाहरन्, परं क्रमेण रसवत् प्रेय ऊर्जस्विसमाहिताख्यया तान् व्यवाहार्षुः[1] ।

उद्भटस्तु अङ्गभूतान् एतान् द्वितीयोदात्तालङ्कारे समावीविशत् ।[2]

गुणानामलङ्कारत्वेन स्पष्टतया न कथनं कृतं परं दण्डिनः

**'काश्चिन्मार्गविभागार्थमुक्ताः प्रागप्यलङ्क्रियाः ।**
**साधारणमलङ्कारजातमन्यत् प्रकाश्यते'**

(का० आ०, २/३)

इत्याद्युक्त्योपमाद्यलङ्काराणां तुलनायामनुप्रासादिकेष्वलङ्कारेषु स्थितेष्वपि माधुर्यादिदशगुणाश्च साधारणालङ्कारत्वेन मन्तुं शक्या इति प्रतर्क्यते ।

वस्तुतो भामहदण्ड्युद्भटाः रूपकोत्प्रेक्षाप्रतिवस्तूपमापर्यायोक्तापह्नुति-दीपकद्वितीयव्यतिरेकार्थान्तरन्याससमासोक्त्याक्षेपानुक्तनिमित्तविशेषोक्तितुल्य-योगितालङ्काराद्यलङ्कारेषु, भूत्वाप्यभिज्ञा ध्वनौ (व्यञ्जनातत्त्वे) तदन्तर्भाव-मचिकीर्षन्नित्येतस्य तथ्यस्य सङ्केतोऽवश्यमेवाप्यते । एतत्प्रयोजनेनैतेषामा-चार्याणामिह एकैका कारिका प्रस्तूयते—

(क) **समानवस्तुन्यासेन प्रतिवस्तूपमोच्यते ।**
**यथैवानभिधानेऽपि गुणसाम्यप्रतीतितः ।।**

(भामहः, २/२४)

(ख) **शब्दोपात्ते प्रतीते वा सादृश्ये वस्तुनोर्द्वयोः ।**
**तत्र यद्भेदकथनं व्यतिरेक स उच्यते ।।**

(काव्यादर्शः, २/१८०)

---

१. काव्यालङ्कारः (भामहस्य), ३/५/७/काव्यादर्शः (दण्डी २/२/५)
२. काव्यलङ्कारसंग्रहः (उद्भटः) ४/२/३/५, ७/४/८

(ग) **पर्यायोक्तं यदन्येन प्रकारेणाभिधीयते ।**
**वाच्यवाचकवृत्तिभ्यां शून्येनावगमात्मना ।।**

(काव्यालङ्कारसारसंग्रहः, ५/६)

एतेषु लक्षणेषु गुणसाम्यप्रतीति-वाच्यवाचकवृत्तिशून्यत्वादिकानां प्रयोगेण ध्वनितत्त्वस्य अलङ्कारेष्वन्तर्भावनं तदिष्टमिति सिद्ध्यति । अस्मादेव कारणात् आनन्दवर्धनाचार्यः स्वकीये ध्वन्यालोके आरम्भ एव ध्वनिविरोधिषु स्वमभिमतत्वं

**काव्यस्यात्मा ध्वनिरिति बुधैर्यः समाम्नातपूर्व -**
**स्तस्याभावं जगदुपरे भाक्तमाहुस्तमन्ये ।**
**केचिद् वाचां स्थितमविषये तत्त्वमूचुस्तदीयं**
**तेन ब्रूमः सहृदयमनःप्रीतये तत्स्वरूपम् ।।**

एतस्मिन्नेव प्रसङ्गे भूयसामलङ्काराणामुदाहरणानि प्रस्तुतीकृत्य आनन्दवर्धनो ध्वनेर्विषये एतेषामलङ्काराणां विषयेभ्योऽतिदूरे वर्तते इति यत् प्रतिपादयति स्म तस्योल्लेख उपरि कृत एवास्ति ।

ध्वनेर्महाविषयत्वात् तत्तदलङ्काराणां ध्वनावेव सन्निवेशो भवतीति स्पष्टं चाचचक्षे ।

दण्डी प्रबन्धकाव्यं भाविकोऽलङ्कार इत्येतेन नाम्ना आनङ्क । यस्मिन् काव्ये कवेर्भावः (अभिप्रायः) समाप्तिं यावद् दृश्येत इत्येषा व्युत्पत्तिर्भाविकपदस्यास्ति । अस्मिन्नेव प्रसङ्गे दण्डिना महाकाव्यगतवस्तुपर्वणाम् (आधिकारिकप्रासङ्गिककथावस्तूनाम्) पारस्परिकोपकारितायाः किञ्च स्थानवर्णनार्हाणाम्—प्रकृतोपयोगिनां विषयाणां—वर्णनमप्यनुष्ठितम् । काव्यादर्शे २/३६४-३६५ स्थले सर्वमप्येतत् प्राप्यते ।

काव्यशास्त्रसम्बद्धान् उपर्युक्तविषयान् व्यतिरिच्य दण्डी नाट्यशास्त्रसम्बद्धान् विषयानपि अलङ्कारत्वेन मेने । सन्धि-सन्ध्यङ्ग-वृत्ति-वृत्त्यङ्गलक्षणादिकानां सोऽलङ्कारान्तर्गततायां मनो निबध्नाति—

**यच्च सन्ध्यङ्गवृत्त्यङ्गलक्षणाद्यागमान्तरे ।**
**व्यावर्णितमिदं चेष्टमलङ्कारतयैव सः ।।**

(काव्यादर्शः, २/३६७)

काव्यादर्शस्य प्रख्यातष्टीकाकारो रङ्गाचार्यो रेड्डी वदति यदेतेषु केषाञ्चनान्तर्भावो दण्डिस्वीकृतस्वभावाख्यानो(स्वभावोक्ति)पमाद्य-

लङ्काराणां मध्ये कर्तुं शक्यः, केषाञ्चन च समावेशो भाविकालङ्कारे. तत्र केषाञ्चन स्वभावाख्यानादावन्तर्भावः, केषाञ्चिद् भाविके इति यथायथ-विषयानुरोधेन भाव्यम् ।' (काव्यादर्शः, २/३६७)

रङ्गाचार्यस्याभिप्रायोऽयमेतावान् षट्त्रिंशल्लक्षणानामन्तर्भाव उपमाद्य-लङ्कारेषु कर्तुं सुशकः किञ्च सन्धीनां सन्ध्यङ्गानां, वृत्तीनां, वृत्त्यङ्गानाञ्च-भाविकालङ्कारे तेषां सर्वेषामपि वस्तुपर्वत्वात् ।

इत्थं गुण-रस-ध्वनि-प्रबन्धकाव्यानि किञ्च नाट्यविषयानपि एते अलङ्कारवादिनो (विशेषतो दण्डी) अलङ्कारनाम्ना व्यवहरन्ति । तस्मात्कारणात् एतेषां मतेन अनुप्रासोपमादिका एव अलङ्कारा अपि तु काव्यस्य तानि सर्वाण्यपि तत्त्वानि वा अङ्गान्यलङ्कारा इत्युच्यन्ते यानि काव्यस्य चमत्कारोपपादकानि वा सौन्दर्यविधायकानि सन्ति ।

अलङ्कारवादिनोऽलङ्कारपदं व्यापकेऽर्थे प्रयुञ्जन्ति । काव्यस्य सर्वेऽपि शोभाकारका धर्माः सन्त्यलङ्काराः इति तेषां विचारः ।

अलङ्कारवादिषु सन्ति प्रमुखाः - भामहः, दण्डी, उद्भटश्च । जयदेवोलङ्कारवादिप्रतिपादितां मान्यतां न प्रस्तुवानः संलक्ष्यते । स तु ध्वनि तदन्तर्गतं रसं स्वतन्त्रतया निरूपयति । ध्वन्यादिकाः अलङ्कारा इत्यत्र न तस्य मती रमते । परं हन्त मम्मटस्य काव्यलक्षणे न सोऽवहिततया दृष्टिं न्यदधात् । आचार्य मम्मटोऽनलङ्कृतीत्येतेन पदेन अलङ्कारस्य स्फुटतया स्थितिः स्यादेव इति नापेक्ष्यते इति वदति । स एवेदं ब्रवीति 'क्वचित्तु स्फुटालङ्कारविरहेऽपि न काव्यत्वहानि'रिति ।

दण्डिभामहोद्भटाः अलङ्कारवादिनोऽलङ्कारालङ्कार्ययोः सम्यग् विवेचनं कुर्वाणाः प्राप्यन्ते । ते तयोर्द्वयोरपि महत्त्वं सम्यगवेदिषुः ।

पक्षद्वयस्य प्रस्तुतीकरणमुचितं भवेत् —

(क) अलङ्कार्यम् इत्येतेन पदेन तात्पर्यमस्ति काव्यस्य वस्तुविशेषः । तस्य सङ्केतः स्वभावोक्तेरलङ्कारत्वेन न स्वीकृत्य कुन्तकेन कृतः । स आह—

**अलङ्कारकृतां येषां स्वभावोक्तिरलङ्कृतिः ।**
**अलङ्कार्यतया तेषां किमन्यदवतिष्ठते ।।**

(वक्रोक्तिजीवितम्, १/११)

लौकिकं विषयवस्तु स तदैव काव्यस्य विषयवस्तुत्वेन अवागच्छत्, यदा तद् वक्रोक्तिसमुद्दीप्तं स्यादन्यथा न । काव्यालङ्कारेऽभिहितम्—

सर्वैवातिशयोक्तिस्तु तर्कयेत् तां यथागतम् ।
सैषा सर्वत्र वक्रोक्तिरनयार्थो विभाव्यते ॥
यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना ॥
(२/८४-८५)

तेषामेतत्कथनं 'तेऽलङ्कार्यस्य महत्तां सर्वथा आद्रियन्ते स्म' इति ज्ञापयति। इदन्त्ववश्यं ते शब्दमेतं न प्रयुञ्जते स्म ।

(ख) चेद् 'अलङ्कार' शब्देन रसो वा ध्वनिरभीष्टस्तदा तु तेषां तत्-तात्पर्यानवगतत्वं सिद्ध्यति । 'अलङ्कार्य' शब्दस्यार्थो न निश्चिततां गतो-ऽतस्ते तद्विधतात्पर्यानवगन्तार आसन् ।

वस्तुतस्तत्समयपर्यन्तम् 'अलङ्कार्य' शब्दस्य प्रयोगेऽपेक्षा नाभूदतः परिवर्तिनो ध्वनिरसवादिनस्तत्राश्लथन्त । ते ऽलङ्कारस्य स्वरूपमपि रसे समतिष्ठिपन् । अलङ्कारेण योऽलङ्क्रियतेऽसावलङ्कार्य इत्यभिहितमभूत् परं स तस्य लक्ष्यार्थः । वाच्यार्थस्तु तस्य विषयवस्तु इत्येव । तत्र त्रयोऽपि कीर्तिता अलङ्कारवादिनः सम्यगासन् परिचिताः अभिज्ञाश्च ।

**रीतिसिद्धान्तः—**

रीतिसिद्धान्तप्रवर्तको वामनाचार्यः । अस्मिन् सिद्धान्ते स एव एकः संलक्ष्यते । तदनन्तरमपि तत्सिद्धान्तानुगामिनो नावाप्यन्त । 'विशिष्टपद-रचना रीति' रिति स व्याजहार । सा तत्र विशिष्टगुणजन्या भवति । उक्तञ्च—'विशेषो गुणात्मे'ति । एतत्सूत्रमालम्ब्यैव रीतिगुणयोर्मध्ये अभेदः स्वीक्रियते । गुणो द्विविधः—(१) शब्दगुणः, (२) अर्थगुणश्च । शब्द-गुणो दशविधोऽर्थगुणश्च दशविधः । एते द्विविधा अपि समाननामानः । नामानि सन्ति इमानि—

ओजः, प्रसादः, श्लेषः समता, समाधिः, माधुर्यम्, सौकुमार्यम्, उदारता अर्थव्यक्तिः, कान्तिश्च । नामभेदाभावेऽपि शब्दगुणा अर्थगुणाश्च स्वरूपतो लक्षणतश्च नितान्तभिन्नाः ।

उक्तगुणविशिष्टरीतिं काव्यस्यात्मत्वेन वामन आमनति । सा त्रिविधा—१. वैदर्भी, २. गौडी, ३. पाञ्चाली च । वैदर्भ्यां सर्वे गुणा राजन्ते, गौड्यां द्वौ गुणौ—ओजः, कान्तिश्च । पाञ्चाल्यामपि द्वौ गुणौ स्तः माधुर्यम्, सौकुमार्यञ्च ।

ज्ञायते यदाचार्यवामनो रीत्यां द्वयोरपि शब्दार्थगुणयोः सद्भावमपैक्षिष्ट ।

स तासु रीतिषु वैदर्भीं श्रेष्ठामवगच्छति। तस्याः सर्वगुणवत्त्वात् तस्याः सर्वश्रेष्ठत्वं मतम्। शुद्धवैदर्भी इत्येषोऽन्योऽपि भेदो वैदर्भ्यास्तेन स्वीकृतः। समग्रगुणपरिपूर्णायां रचनायां समासस्याभावे सति, 'शुद्धवैदर्भी' भवति। उक्तञ्च—

'सापि समासाभावे शुद्धवैदर्भी'

(का० सू० १/२/१६)

वामनः कस्मिन् आधारे रीतिं काव्यस्यात्मत्वेन स्वीकरोतीत्येष एव मुख्यः प्रश्नः। आधारद्वये विचारोऽयं कर्तुं शक्यः। प्रथम आधारः—'काव्यस्योपादानान्तराणां स्वाभीष्टकाव्यतत्त्वेऽन्तर्भूतता।'

आधारो द्वितीयः...'तैरुपादानैरस्य तत्त्वस्य पुष्टिः।'

अलङ्कारवादिषु दण्डी विशेषतः स्पष्टेषु शब्देषु प्रथममाधारमग्रहीत्। परं वामनः स्वयं नास्यां दिशायां कमपि सङ्केतं चकार। तथापि रीतेः स्वतन्त्रकाव्यसिद्धान्तत्वेन स्वीकृततायां 'रीतेरपरपर्यायभूतविंशतिगुणभेदेषु कतिपयान्यशास्त्रीयकाव्योपादानानां कस्मिन्नपि न कस्मिन् रूपेऽन्तर्भावः कर्तुं शक्य इत्येतत् प्रमुखकारणमस्ति।

आचार्यः मम्मट एतेषामेव विंशतिगुणानां प्रतिपादनमनेकधा कृतवान्। स माधुर्यौजःप्रसादेषु केषाञ्चन समावेशं, केषाञ्चन च काव्यस्यान्येषूपादानेषु चकार। तथाहि...

(१) आचार्यवामनसम्मतस्य शब्दगतश्लेषस्य, समाधेः, औदार्यस्य, प्रसादस्य च ओजस्यन्तर्भावो भवितुं शक्यः।

(२) वामनसम्मतौ शब्दगतमाधुर्यार्थव्यक्तिगुणौ मम्मटसम्मतयोर्माधुर्यप्रसादयोः समाविष्टौ भवितुमर्हतः।

(३) वामनाभिमताया अर्थगताया अर्थव्यक्तेः स्वभावोक्त्यलङ्कारे समावेशो भवितुं शक्यः।

(४) अर्थगतकान्तेः रसध्वनिगुणीभूतव्यङ्ग्येषु समावेशो भवितुमर्हति।

चेदेषा स्थितिर्मम्मटस्य न, वामनस्य दृष्ट्या विचार्येत तदा वामनाभिमतरीतिसम्बद्धेषु गुणेषु न केवलं माधुर्यौजःप्रसादाः मिलन्ति, अपितु एकतः स्वभावोक्तिरलङ्कार एकतश्च रसो ध्वनिर्गुणीभूतव्यङ्ग्योऽपि अन्तर्गता जायन्ते; रसस्य समावेशस्त्विह भवत्येव। वामनो रसं स्पष्टशब्देष तत्र समाविष्टं कृतवान्— **'दीप्तरसत्वं कान्ति'** रिति।

अवशिष्टानि सन्ति त्रीण्युपादानानि—ध्वनिः, गुणीभूतव्यङ्ग्यः, स्वभावोक्तिरलङ्कारश्च। अत्र प्रथमौ द्वौ रसेन साकं सम्मेलितत्वात् (सम्बद्धत्वात्) स्वीक्रियेते। अतस्तावपि मान्यौ। स्वभावोक्तेर्मान्यता केन प्रकारेण क्रियेत इत्तेष विचारोऽवश्यमेवोत्तिष्ठति। यतो हि वामनसम्मताया अर्थव्यक्तेः मम्मटसम्मतायाश्च स्वभावोक्तेर्मध्ये परमसमीपसम्बन्धो नास्ति। अस्तु, अयमस्ति प्रथम आधारो यद्बले वामनस्य दृष्ट्या रीतिः काव्यस्यात्मत्वेन मता भवितुं शक्या।

सम्प्रति काव्यस्योपादानान्तरैः स्वकीयकाव्यतत्त्वस्य पुष्टिरित्येतदात्मको द्वितीय आधारो गृह्यताम्। इह ध्यातव्यमिदम्—वैदर्भ्यां सर्वेषामपि गुणानां किञ्च गौड्यां पाञ्चाल्याञ्च द्वयोर्द्वयोर्गुणयोः स्वीकृतत्वात् तात्पर्यमिदमेव ग्रहीतुं शक्यम्—

तेषां गुणानां समवायसमवेतरूपत्वमेव रीतिरित्येतद्धेतोः रीतिः काव्यस्यात्मत्वेन कथं ग्रहीतुं सुशका ?

वामनाभिमताया रीतेः काव्यात्मत्वं वस्तुतोऽलङ्कारस्योभयोरपि स्थित्योः सन्तिष्ठते। वामनेऽलङ्कारवादस्य महान् प्रभावो न्यपप्तत्। अतः स न तं वादं प्रत्याख्यातुमशकत्। न च सोऽनुप्रासाद्यलङ्कारान् रीत्यामन्तर्भूतान् कर्तुं शशाक। न च रीतेः पोषकत्वेनैव तान् स्वीकर्तुं प्रबभूव, काव्यस्य बाह्यं पक्षम्प्रति विशेषतोऽसावाकृष्टो भवन् संलक्ष्यते। स गुणव्यापकस्वरूपाधारे रीतिं काव्यस्यात्मत्वेन मेने।

रीतिसम्प्रदायोऽलङ्कारगुणयोर्भेदं स्पष्टीकृत्य साहित्यं भृशमुपचकार। काव्यशोभाकर्तृधर्माः गुणाः सन्ति, तदतिशयकर्तारश्च सन्त्यलङ्काराः इति- वामनस्य कथनमस्ति। अत्र तदीयं वाक्यमेतत्—

**'काव्यशोभायाः कर्तारो धर्मा गुणाः, तदतिशयहेतवोऽलङ्काराः।'**

यादृशी गम्भीरा तीक्ष्णा चालोचनादृष्टिरस्य सम्प्रदायस्य दृश्यते न तादृशी अलङ्कारसम्प्रदायस्य संलक्ष्यते।

भामहप्रभृतयस्तु रसम् अलङ्कारं मत्वा तं काव्यस्य बहिरङ्गसाधनत्वेन स्वीकुर्वते। परं वामनः कान्तिगुणे रसं विनिवेश्य काव्ये रसस्य महत्तां प्रसभं प्रदर्शयितुमयतत। स वक्रोक्तौ ध्वनिमन्तर्भावयामास। तदेवं रीतिसम्प्रदायस्य विवेचनमिहातितरां व्यापकं हृदयंगमञ्च गण्यते नालङ्कारसम्प्रदाये तद्विधं गुरुतरं विवेचनं दृश्यते।

ध्वनिः

ध्वनिसिद्धान्तप्रवर्तक आचार्य आनन्दवर्धनो ध्वनिं स्पष्टतया काव्यस्यात्मत्वेनोद्घोषयाञ्चकार। कोऽसौ ध्वनिरित्येतद् वक्तुं सः 'काव्यस्यात्मा ध्वनिरिति बुधैः समाम्नातपूर्वः' (ध्व० १/१) इत्येतं श्लोकं प्रस्तावनात्वेन निधाय ध्वनिं बोधयितुं कारिकामिमामवतारयामास—

**यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।**
**व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः॥**

(१/१३)

अलङ्कारवादिभिरलङ्कारस्य प्रधानत्वे किंवा प्रतिवस्तूपमापर्यायोक्त्याद्यलङ्कारेषु सत्सु न ध्वनेः स्वीकरणस्यावकाशः कोऽप्यवशिष्यत् इति यदुक्तं तत्र स ध्वनिकारः प्राह—

**अलङ्कारान्तरस्यापि प्रतीतौ यत्र भासते।**
**तत्परत्वं न वाच्यस्य नासौ मार्गो ध्वनेर्मतः॥**

(२/२६)

(यत्र वाच्यस्य व्यङ्ग्यप्रतिपादनोन्मुख्येन चारुत्वं न प्रकाशते नासौ ध्वनेर्मार्गः)

भाव एषः —

वाच्येन अलङ्कारेण अलङ्कारान्तरस्य प्रतीत्यां सत्यामपि यत्र वाच्योऽलङ्कारस्तत्परो न (प्रतीयमानमलङ्कारं न बोधयति) स ध्वनेर्विषयो न भवितुं शक्यः।

अत एव दीपकाद्यलङ्कारेषु उपमायां गम्यमानायां सत्यामपि तस्या उपमायाः प्राधान्याच्चारुत्वस्य व्यवस्थायाः असद्भावात् न तत्रोपमालङ्कारे ध्वनिव्यवहारो भवति। (स उपमालङ्कारो ध्वनित्वेन न व्यवह्रियते)

१. व्यञ्जकरूपेण व्यङ्ग्यरूपेण च अलङ्काराणां ध्वन्यङ्गत्वमवगन्तव्यम्। प्रकरणानुरोधादिह व्यङ्ग्यतयैव ध्वन्यङ्गता ज्ञेया। अलङ्कारेषु व्यङ्ग्येष्वपि व्यङ्ग्यस्य प्राधान्यविवक्षायामेव ध्वनावन्तर्गतता भवितुं शक्यास्ति; अप्रधानतायां तु गुणीभूतव्यङ्ग्यमेव मतं स्यात्।

२. एष वाच्यालङ्कारवर्गो व्यङ्ग्यांशस्य संस्पर्शेण काव्येषु अतितरां शोभां प्रपद्यते।

ध्वनिकारोऽग्रेऽलङ्कारध्वनिमार्गं व्युत्पाद्य तस्य प्रयोजनवत्तां स्थापयितुमाह—

(क) **शरीरकरणं येषां वाच्यत्वेन व्यवस्थितम् ।**
**तेऽलङ्काराः परां छायां यान्ति ध्वन्यङ्गतां गताः ॥**
(२/२८)

(ख) **वाच्यालङ्कारवर्गोऽयं व्यङ्ग्यांशानुगमे सति ।**
**प्रायेणैव परां छायां बिभ्रल्लक्ष्ये निरीक्ष्यते ॥**
(३/३६)

ध्वनिरस्त्यङ्गी; अलङ्कारगुणवृत्तयस्तस्याङ्गभूताः इत्यपि स निजगाद—

**काव्यविशेषोऽङ्गी ध्वनिरिति कथितः ।**
**तस्य पुनरङ्गान्यलङ्कारा गुणा वृत्तयश्च ॥**

आनन्दवर्धनस्यालङ्कारमधिकृत्य मन्तव्यमेतत्—

**"अङ्गाश्रितास्त्वलङ्कारा मन्तव्याः कटकादिवत् ॥"** (२/६)

तेषाम् (अलङ्काराणाम्) अवस्थितिः सा नाभ्यन्तरी, बाह्यैव। अत आभ्यन्तरतत्त्वभूतध्वनिर्न तेषु समाविष्टो भवितुमर्हति ।

आचार्य आनन्दवर्धनो रीतिमपि निरास्थत् । स रीतिः संघटनातः परस्तान्नान्यत् किमपीत्यचकथत् । सा गुणाश्रिता भवन्ती रसाभिव्यक्त्यां सहायिका भवतीति प्रकटीचकार—

**'गुणानाश्रित्य तिष्ठन्ती माधुर्यादीन् व्यनक्ति सा रसान् ।'**
(३/६)

आनन्दवर्धनः समासस्य सद्भावेऽसद्भावे च रीतेः स्वरूपं निर्दिशन् दृश्यते । वामनोऽपि तादृगेव संलक्ष्यते । एतेन समासप्रक्रियाया बाह्यतत्त्वत्वात्, सा समासप्रक्रियारीतेः स्वरूपत्वेनापि मता यदि, तदा कथं सा ध्वनेर्महत्त्वं लब्धुं शक्नुते । आनन्दवर्धनस्येमं विचारं परवर्तिन आचार्या अपि सदकार्षुः ।

ध्वनिं काव्यतत्त्वं व्याख्यातुं वस्तुत आचार्यं वामनो न जाने कस्मात् कारणात् स्वां रुचिं नादीदृशत् । अत्र ध्वनिकार आह—

**'अस्फुटस्फुरितं काव्यतत्त्वमेतद् यथोदितम् ।**
**अशक्नुवद्भिर्व्याकर्तुं रीतयः सम्प्रवर्तिताः ॥** (३/४७)

ध्वनिरस्ति नितान्ताभ्यन्तरकाव्यतत्त्वमित्येतद् बलीयसीभिरुक्तिभि: साधयन् स ध्वनिकार आचष्टे—

**(क) प्रतीयमानं पुनरन्यदेव, वस्त्वस्ति वाणीषु महाकवीनाम्।**
**यत् तत् प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु॥**
(१/४)

**(ख) मुख्या महाकविगिरामलङ्कृतिभृतामपि।**
**प्रतीयमानच्छायैषा भूषा लज्जेव योषिताम्॥** (३/३८)

वस्तुत: एष: प्रतीयमानोऽर्थ: (व्यङ्ग्यार्थ:=ध्वनि:) एवालङ्कारादीन् सर्वानतिशय्य संशोभते, अस्ति स तेभ्यो गरीयान्। स एव काव्यस्यात्मत्वेन भवितुमर्हति। न च बाह्योपादानभूतालङ्काररीतय:।

आचार्य आनन्दवर्धन: काव्यस्य विविधांश्चमत्कारान् ध्वन्याधृतान् विधाय स्वकीयां निर्दिष्टां मान्यतां पर्यपूपुषत्। ध्वनेस्तारतम्यानुरूपदृशा स: काव्यस्य त्रीणि रूपाणि स्वीचकार—

(१) ध्वनि:, (२) गुणीभूतव्यङ्ग्यम्, (३) चित्रम्।

ग्रन्थेऽस्मिन् अन्यत्र ध्वने: प्रमुखभेदा अष्टादश प्रदर्शिता:; इह गुणीभूतव्यङ्ग्यस्य भेदा: ये सन्त्यष्ट ते प्रदर्श्यन्ते—

**तत्र स्यादितराङ्गं काक्वाक्षिप्तं च वाच्यसिद्ध्यङ्गम्।**
**सन्दिग्धप्राधान्यं तुल्यप्राधान्यमस्फुटमगूढम्॥**
**व्यङ्ग्यमसुन्दरमेवं भेदास्तस्योदिता अष्टौ।**

ध्वनिगुणीभूतव्यङ्ग्ययो: सर्वविधकाव्यसौन्दर्यमन्तर्भूतं कर्तुं शक्यम्।

ध्वनेरन्यतमो हि भेदोऽसंलक्ष्यक्रमव्यङ्ग्यो रस-भाव-रसाभासादिकानां पर्याय:। गुणीभूतव्यङ्ग्यस्य भेदोऽपरस्याङ्गम्। तेन तात्पर्यमस्ति रसवदाद्यलङ्काराणां चमत्कार:। इतश्च चित्रकाव्ये माधुर्यादिगुणास्तत्सम्बद्धरीतय: सर्वेषामप्यलङ्काराणां चमत्काराश्च अन्तर्भूता भवन्ति। काव्यप्रकाशकार आह—

**'चित्रमिति गुणालङ्कारयुक्तम्'** (१/१५)

तात्पर्यमिदं यद् गुणालङ्कारा अपि आचार्यानन्दवर्धनानुसारेण व्यंग्यरहिता न भवन्ति। तत्रापि व्यङ्ग्यस्य सत्ता भवति। अत एव आचार्य मम्मट आह—

**'अव्यङ्ग्यमिति स्फुटप्रतीयमानार्थरहितम्।'**
**(काव्यप्रकाश:, १/४)**

आनन्दवर्धनानुसारेण सर्वविधेऽपि काव्यसौन्दर्ये ध्वनितत्त्वं प्रमुखगौण-

स्फुटरूपेषु कस्मिन्नपि न कस्मिन् रूपेऽनिवार्यतः स्थितं भवति, अतः काव्यस्यात्मा ध्वनिर्मतः ।

**वक्रोक्तिः**

काव्यात्मप्रसङ्गेऽतः परस्तादस्त्युल्लेखनीयं काव्यतत्त्वं—वक्रोक्तिः । इमाम् आचार्य कुन्तकः काव्यस्य जीवितत्वेन—आत्मत्वेन—स्वीकुरुते । सः स्वग्रन्थे वक्रोक्तिजीविते विचित्रमार्गप्रसङ्गे वक्रोक्तिवैचित्र्यं 'जीवितम्' इत्येतेन पदेन व्यवहरति—

**'विचित्रो यत्र वक्रोक्तिवैचित्र्यं जीवितायते ।**
**परिस्फुरन्ति यस्यान्तः सा काप्यतिशयाभिधा ।।** (१/८१)

वक्रोक्तिरस्ति—**'वैदग्ध्यभङ्गीभणितिः'** उक्तञ्च वक्रोक्तिजीविते—

**'वक्रोक्तिरेव वैदग्ध्यभङ्गीभणितिरुच्यते ।'** (११०)

कविकर्मकौशलजन्यं वैचित्र्यपूर्णकथनमेव वैदग्ध्यभङ्गीभणितिः । यत्काव्यतत्त्वं कस्मिंश्चित्कथने लोकोत्तरचमत्कारं सृजति तदेव वक्रोक्तिः । उक्तं च—

**'लोकोत्तरचमत्कारकारिवैचित्र्यसिद्धये'** (व०जी०, १/५)

आचार्यकुन्तकात् प्राक् 'अलङ्कारं काव्यस्य सर्वस्वत्वेन रीतिं ध्वनिं च काव्यस्यात्मत्वेन केचन अमन्यन्त । तत्र भामहोद्भटादिका अलङ्कारं, वामनो रीतिं ध्वन्यालोककारश्च ध्वनिं काव्यस्यात्मत्वेन अमंसत । रसस्य स्वरूपं भरत आनन्दवर्धनाचार्यश्च व्यवस्थापयामासतुः । आचार्यः कुन्तकः स्वयमप्येतेषु काव्यतत्त्वेषु पूर्णतया स्वां मतिं निबध्नातिस्म । परं स वामनाभिमतायां रीत्यां तु न प्रीयतेस्म । स लिखति—

**'तदलमनेन निस्सारवस्तुपरिमलव्यसनेन'** (व० जी०, )

अवशिष्टानि च त्रीणि तत्त्वानि स्वमान्यतानुसारेण स वक्रोक्त्या आबबन्ध तत्रैव वा समावीविशत् । परं न प्रत्याचख्यौ ।

अलङ्कारदिशायां तस्य विचारा भामहदण्डयुद्भटानामलङ्कारवादिनां विचारेषु न संवदन्ति । आनन्दवर्धनस्य विचारेष्वेव स भृशं परितुष्यँल्लक्ष्यते अत्र तदीये द्वे कारिके विचित्राख्यकाव्यमार्गस्य स्वरूपनिर्देशसन्दर्भे निधीयेते—

**'रत्नरश्मिच्छटोत्सेकभासुरैर्भूषणैर्यथा ।**
**कान्ताशरीरमाच्छाद्य भूषायै परिकल्प्यते ।।'**
**'यत्र तद्वदलङ्कारैर्भ्राजमानैर्निजात्मना ।**
**स्वशोभातिशयान्तःस्थमलङ्कार्यं प्रकाश्यते ।।**

(व० जी०, १/३६-३७)

इदन्त्ववश्यमिहोल्लेखनीयमस्ति यद् आचार्यः कुन्तकोऽलङ्कारवादिप्रतिपादितालङ्कारस्य व्यापकमर्थं न विस्मर्तुमशकत् । स ऊचिवान्—

**तत्त्वं सालङ्कारस्य काव्यता** (व० जी० १/६)

एतस्या एव धारणायाः, वशंगततया स वक्रोक्तिं नूनमपूर्वमलङ्कारमिवामंस्त वा ताम् 'अलङ्कार' इत्येतया संज्ञयाऽऽजुहाव । स जगाद—

**'काव्यस्यायमलङ्कारः कोऽप्यपूर्वो निधीयते ।'** (१/२)

वैदग्ध्यभङ्गीभणितिरित्यभिधाय स ध्वनिमेवाभिव्यानञ्ज । अत्र इमाः पङ्क्तयः सन्ति विचारार्हाः—'**ननु च द्योतकव्यञ्जकावपि शब्दौ सम्भवतः, तदसंग्रहान्नाव्याप्तिः, यस्मादर्थप्रतीतिकारित्वसामान्यादुपचारात्तावपि वाचकावेव । एवं द्योत्यव्यङ्ग्ययोरर्थयोः प्रत्येयत्वसामान्यादुपचाराद् वाच्यत्वमेव ।**'

(व० जी० १/पृ० १५)

इत्थमेकतः कुन्तको वक्रोक्तिमलङ्काराद् बहिर्न कुरुते, एकतश्च स तां ध्वनेरपि न पृथक् करोति । तदीयाद् ग्रन्थात् स्पष्टतया तस्य ध्वनिसिद्धान्ते आदरधीः प्रेक्षिता भवति । स ध्वनिं स्पष्टतया असकृन्निर्दिशन् प्राप्यते—

**प्रतीयमानता यत्र वाक्यार्थस्य निबध्यते ।**
**वाच्यवाचकवृत्तिभ्यां व्यतिरिक्तस्य कस्यचित् ॥**

(व० जी०, १/४०)

स उत्प्रेक्षारूपकव्यतिरेकादिकानलङ्कारान् प्रतीयमानभेदविधतया स्वीकुरुते । पर्यायोक्तालङ्कारे च व्यङ्ग्यार्थस्य समावेशं प्रकारान्तरेण विदधद् ए दृश्यते । (व० जी० ३/२४)

**परिवृत्त्यलङ्कारं तु सोऽलङ्कार्यत्वेनैव मन्यते ।**

(व० जी० ३/३३)

चतुर्थं काव्यतत्त्वं रसं स मुक्तकण्ठतया स्वीकुर्वंस्तं स्वग्रन्थेऽनुसिनाति ।[१] रीतिं विहाय सर्वत्रोदारदृष्टिं निदधदपि स वक्रोक्तिवादी एव । लौकिकशास्त्रीयकथनेभ्य उच्चतरायां भावभूम्यामवस्थितां सर्वामप्युक्तिं वक्रोक्तिनाम्ना विभूषयतीत्येतदस्ति तदीयं वक्रोक्तिवादिस्वरूपम् । अत एव तु स तस्याः नानाभेदोपभेदान् प्रकारान्तरेणाकलयन् सर्वाण्यपि काव्यतत्त्वानि तत्रैव (वक्रोक्त्याम्) अन्तर्भावयति । तन्निदर्शनमिह प्रस्तूयते । प्रथमं स

१. व० जी० २/३३/३५, ३/८, ४६/४/८, १०, १६, १७, २०, २१

वक्रोक्तेः प्रमुखान् षड् भेदान् प्रदर्शयति—

(१) वर्णविन्यासवक्रता, (२) पदपूर्वार्द्धवक्रता (मूलशब्दस्य वक्रता), (३) पदपरार्धवक्रता (प्रत्ययादिवक्रता), (४) वाक्यवक्रता, (५) प्रकरण-वक्रता, (६) प्रबन्धवक्रता च। (वक्रोक्तिजीवितम्, १/१८-२१)

ततश्च सर्वभेदान् संकलय्य एकचत्वारिंशद् भेदा भवन्ति। एता एकैका वक्रोक्तयः काव्यचमत्कारं समुत्पादयन्ति। अपरस्थितिगतत्वात् काव्यशोभा भृशमेधते—

**'परस्परस्य शोभायै बहवः पतिताः क्वचित्।**
**प्रकारा जयन्त्येतां चित्रच्छायामनोहराम् ॥**

(व० जी० २/३४)

आचार्यकुन्तकस्य मते एतेषां भेदोपभेदानामन्तर्गततायां काव्यस्य सर्वविधमपि सौन्दर्यम्—कामं तद् बाह्यं भवेद् वा आभ्यन्तरं—समाविशति। कतिपयान्युदाहरणानि गृह्यन्ताम्—

(१) अनुप्रासयमकादिशब्दालङ्काराणां चमत्कारो वर्णविन्यासवक्रतास्ति।

(२) उपमारूपकाद्यर्थालङ्काराणां चमत्कारो वाक्यवक्रता भवति।

(३) परिकरपरिकरसदृशालङ्काराणां चमत्कारः पर्यायवक्रता (पदपूर्वार्द्ध-वक्रता) ज्ञेया।

(४) पदगतध्वनेः शब्दशक्तिमूलकानुकरणरूपव्यंग्यनामकभेदः पर्याय-वक्रतान्तर्गतो बोध्यः।

(५) लक्षणामूलकध्वनेर्द्वावपि भेदौ—अर्थान्तरसंक्रमितवाच्यध्वनिः, अत्यन्ततिरस्कृतवाच्यध्वनिश्च रूढिवैचित्र्यवक्राख्यपदपूर्वार्ध-वक्रतायामन्तर्गतौ भवितुं शक्येते।

(६) ध्वनेः प्रत्यय-काल-कारक-वचनोपसर्गनिपातगतोपभेदाः पदपरार्ध-गतायां पदगतवक्रतायाञ्चान्तर्भूता भवितुमर्हन्ति।

(७) वाक्यगतध्वनिर्वाक्यवक्रतायाः प्रत्यासन्नतायां वर्तते।

(८) प्रबन्धगतध्वनिः प्रबन्धवक्रताप्रत्यासन्नोऽस्ति।

रुय्यकमतेन ध्वनेर्भूयान् प्रपञ्च उपचारवक्रतायां (पदपूर्वार्द्धवक्रतायां) मिलति। अलङ्कारसर्वस्वे दशमे पृष्ठे वाक्यमिदं दृश्यते '**उपचारवक्रतादिभिः समस्तो ध्वनिप्रपञ्च उररीकृतः।**'

इत्थं कुन्तकस्य वक्रोक्तिर्भूयसां काव्याङ्गानां काव्यतत्त्वानाञ्च विशालेऽन्तराले समाविष्टा दृश्यते। तदाधारोऽस्ति उक्तिवक्रता किं वा विच्छित्तिः।

परमेतेन विवेचनेन वक्रोक्तेर्न बाह्यतत्त्वं न चाभ्यन्तरतत्त्वमेव सम्यक् स्फुटतां याति। क्वापि कुन्तको वामन इव तां हि बाह्यतत्त्वत्वेन स्वीकुर्वाणः प्रतिलक्ष्यते (न केवलं स्थूलप्रसङ्गेषु अपितु सूक्ष्मेष्वपि प्रसङ्गेषु)। अथ च क्वापि स आनन्दवर्धन इव आभ्यन्तरतत्त्वत्वेन तां स्वीकुर्वन् संलक्ष्यते। आनन्दवर्धनो यत् तत्त्वं ध्वनिरिति नाम्ना व्याहरति, तत् तत्त्वं वक्रोक्तिरित्येतेन नाम्नायमुदीरयति। तदेवं ध्वनिराभ्यन्तरं तत्त्वम्, अलङ्काररीत्या किमस्ति बाह्यं तत्त्वं, तद् (ध्वनितत्त्वम्) तस्य परिपोषकत्वेन स्वीकृतं भवितुं सुशकम्?

अस्तु, वक्रोक्तिकारो मन्ये ध्वनिं वक्रोक्तिरिति नाम्नाङ्गीकुरुते। ध्वनिकारश्च स्वाभिमते ध्वनौ रसध्वनिरित्येतन्नाम्ना सादरमाह्वयति। ततश्च रसिकजगद्विख्याता आचार्यमम्मटभट्ट-कविराजविश्वनाथ-पण्डितराजजगन्नाथ रसव्याख्यातारस्तन्मतमनुसरन्त इव रसं निरूपयाञ्चक्रुरन्ये च रुद्रटभट्ट-भोजराज-शारदातनय-शिङ्गभूपालादिकास्तत्रैतां मतिं निदधतोऽदृश्यन्त, परे रसस्य स्वरूपम् आचार्याभिनवगुप्तपादैर्यथालौकिकं प्रत्यपादि तथैव तस्य साम्प्रतमपि भारतेऽलौकिकतया व्याख्यानं विजृम्भते।

लोकोत्तरं हि ब्रह्मानन्दसदृशं रसतत्त्वं केचन धीरास्तथा व्याख्याञ्चक्रुर्यथा तद् बुद्धिगम्यं भवेदित्येतदुपरि यथास्थलं दर्शितं, परं भट्टप्रभाकरो रसप्रदीपं विरचय्य किमप्यपूर्वमेवात्र रसे प्रययास।

रसप्रदीपस्तु वस्तुतो रसस्वरूपमनुशीलयतां पुरः नवामेव कामपि सामग्रीं प्रस्तवीति। अत्र विद्वांल्लेखको भट्टप्रभाकरो रसं प्रतिपादयति, तदुपकारिणीं सकलां सामग्रीं सङ्कलयति, सुस्पष्टतया व्याख्याति, समालोचयति च।

प्राप्तेषु काव्यशास्त्रग्रन्थेषु रसस्य निरूपणं न तथा स्फुटं संलक्ष्यते यथास्मिन् ग्रन्थे। अत्रत्यं निरूपणं संक्षिप्तमपि विशदं, पुरातनैराचार्यैः कृतमपि नूतनमिव शोभते।

इदं हि विपश्चितां मतं यद् अभिनवगुप्तः अभिनवभारत्यां ध्वन्यालोकलोचने च रससिद्धान्तं यं स्थापयामास स नास्ति अवगन्तुं सुकरः। काव्यप्रकाशकारेण मम्मटेन च कियत्यां गम्भीरार्थवत्यां भाषायां रसादिका विषयाः प्रतिपादिताः इत्येतदपि विदुषां विदितमेव। आचार्येण विश्वनाथेन साहित्यदर्पणे रसस्य निरूपणं यद् विहितं तत्र नास्ति सर्वाङ्गीणं विशदं

विवेचनम्, पण्डितराजो जगन्नाथो यस्यां शैल्यां विषयं प्रतिपादयति सास्ति नव्यन्यायपदपंक्तिमती अतः परामेव दुर्बोध्यतां गतास्ति किञ्च तत्कृते रसगङ्गाधरे न रसस्य रहस्यं यथापेक्षमुद्घाटितमस्ति। अयं रसप्रदीपः काव्यप्रकाशादिकृतस्य रसनिरूपणस्य सम्यग् बोधाय ज्ञानदीप इवेत्यत्र न मनागपि सन्देहः। रसं निरूपयितुमुपक्रान्तः प्रधीः प्रथमं विभावस्यानुभावस्य सञ्चारिभावस्य च स्वरूपं निरूपयति ततश्चायं साहित्यशास्त्रकाननकेसरी अभिनवमेव रसस्य स्वरूपमुन्मीलयति—

**'वयं तु न कारणादीनाम् एव विभावादित्वं, नापि रत्यादीनामेव रसत्वम्, किन्तु काव्यनाट्योपनीतकारणादिपरामर्शवशात् तन्मयीभावेन सामाजिकहृदयदर्पणप्रतिबिम्बन्यायेन तदाकारसुन्दराश्चित्तवृत्तिविशेषा जायन्ते, अतएव विभावत्वादिकमलौकिकरूपं भजन्ते, तदनु च सकलाकारसुन्दरा काचिद् एका विलक्षणा चित्तवृत्तिर्जायते इति स्थायी रसतो न भिद्यते।'**

रसस्वरूपं ह्येतन्निरूप्य ब्रूते स—

**इति ब्रूमो वयं त्वत्र तदिदं मत्सरं विना।**
**विचारणीयं रसिकैरिति सर्वं समञ्जसम्॥**

रसस्वरूपस्य विस्तरेण विवेचनमेतद् भट्टप्रभाकरकृतालङ्काररहस्ये प्राप्यते परमस्ति ग्रन्थोऽयं दुर्लभः।

भट्टप्रभाकरो ब्रूते यद् रसाभिव्यक्तये व्यञ्जनावृत्तिरेव स्वीकार्या। अत एव सः कथयति—

**'अभिधालक्षणातात्पर्याख्याभिर्वृत्तिभिः स्मृत्या अनुमानेन चापि न रसाभिव्यक्तिर्भवितुं शक्यास्ति।'[1]**

अनेन विदुषानेकैः प्रमाणैर्युक्तिभिश्च व्यञ्जनायाः यत् प्रतिपादनं कृतं तद्व्यञ्जनावगमनायातीव हितकरम्।

रसोऽस्ति स यस्य सद्भावं विना किमपि काव्यं जीवनं नाप्नुते, रसेन काव्यं प्राणवद् भवति, रसेन काव्ये जीवनश्रीः समुल्लसति। रसः काव्यं सहृदयहृदयप्रियं विदधाति। रसः काव्ये तमानन्दं सञ्चारयति य आनन्दोऽन्यविधान् सर्वानप्यानन्दान् अधरीकरोति, तमानन्दमनुभूय निपीय वा मानवो मोक्षेऽपि नादरधियं निबध्नाति। वस्तुतो रस एव काव्यस्य सर्वस्वं वर्तते

---

१. रसप्रदीपः, पृ० ३८, पं० २४।

अत एव कविस्तत्काव्यं सरसं विधातुं यतेत इत्येतदर्थं साहित्यशास्त्रं तं भूयोभूयः प्रेरयति ।

रसस्तु वस्तुतः परमेश्वर एव, अतः काव्यमेव किं, किमपि न वस्तु तस्य परमेश्वरस्य सद्भावं विना कदापि कमपि न प्राणिनं प्रीणयितुं शक्नोति ।

भगवान् रस इति यच्छान्दोग्योपनिषदाह तदुपरि कथितमेव। श्रीमद्-भगवद्गीतायां 'रसोऽहमप्सु' (७/८) इत्युक्तम् ।

अपः प्राप्य सकलमपि चराचरजगज्जीवनं लभते । तत्र नवायाः शक्तेः सञ्चारो जायते । सर्वा अपि वनस्पतयः, सकला अपि कृषिः, किं बहुना सर्वेऽपि वृक्षाः, सर्वा अपि लतावल्लर्य्यो जीवनशक्तिमधिगम्य नन्दन्ति । न केवलं चेतनं जगदचेतनजगदपि निखिलं प्रमोदं याति, तस्य विषण्णता दूरीभवति, तस्य मलिनता पलायते, तस्य निराशा नश्यति च । तत् परामेव प्रीतिमवाप्य प्रसीदति । मयूरादिपक्षिणः सानन्दं शब्दं कर्तुमारभन्ते, मण्डूकादिकाश्च जीवाः सुखमधिगम्य स्वस्वविरावं विधातुमारभन्ते । जलमवाप्य वस्तुतः समग्रापि जगती कमप्यद्भुतमेव महान्तमानन्दं लब्ध्वा परां प्रसन्नतामधिगच्छति । अप्सु या एतद्विधा विशिष्टता दृष्टा भवति तस्याः कारणमस्त्यपां परमेश्वररूपस्यान्यतमता । इमा आपो यं महिमानमाप्नुवते, स महिमा न वर्णयितुं शक्योऽतएव आपो 'रस' इति नाम्ना सादरं संस्मर्यन्ते, कीर्त्यन्ते, च ।

योऽस्ति रसस्तं प्राप्य सकलमपि जगत् कथं न जीवनशक्तिमासादयेत्, अत एव तु रसेन काव्यमपि भवति सप्राणम् ।

रसस्तु स यत्र माधुर्यम् आनन्दश्चानुभूयेते; सर्वेभ्योऽपि विषयेभ्यो मनो निवर्तते । पाठकस्य (श्रोतुर्द्रष्टुर्वा) मनस्तेन वस्तुना सह (पठ्यमानेन दृश्यमाणेन च वस्तुना सह) एकीभूतं सत् सम्बध्यते ।

रसस्य नवविधत्वादिदानीमेकैकस्य रसस्यैकैकमुदाहरणमपि प्रस्तूयते—

**शृङ्गारे**

**ईषन्मीलितदृष्टिमुग्धहसितं सीत्कारधारावशाद्**
**अव्यक्ताकुलकेलिकाकुविकसद्दन्तांशुधौताधरम् ।**
**श्वासोत्कम्पिपयोधरोपरि परिष्वङ्गात्कुरङ्गीदृशो**
**हर्षोत्कर्षविमुक्तनिःसहतनोर्धन्यो धयत्याननम् ॥**

**वीरो निर्दिश्यते**

क्षुद्रा संत्रासमेते विजहितहरयो भिन्नमत्तेभकुम्भाः
युष्मद्देहेषु लज्जां दधति परममी सायका निष्पतन्तः ।
सौमित्रे तिष्ठ पात्रं त्वमसि न हि रुषां नन्वहं मेघनादः
किञ्चित्संरम्भलोलानियमितजलधिं राममन्वेषयामि ॥

करुण उदाह्रियते—

पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम् ।
आदौ वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् ॥

अद्भुतरसस्योदाहरणं प्रस्तूयते—

मूकारब्धं कमपि बधिराः श्लोकमाकर्णयन्ति
श्रद्धालुस्तं विलिखति कुणिः श्लाघया वीक्षतेऽन्धः ।
अभ्यारोहत्यहह सहसा पङ्गुरप्यद्रिशृङ्गं
सान्द्रालस्याः शिशुभरणतो मन्दमायान्ति वन्ध्याः ॥

हास्यरसे उदाहरणमालिख्यते—

आपाण्डुराः शिरसिजास्त्रिवली कपोले दन्तावली विगलिता न च मे विषादः ।
एणीदृशो युवतयः पथि मां विलोक्य तातेति भाषणपराः खलु वज्रपातः ॥

भयानकरसः प्रदर्श्यते—

माद्यन्मातङ्गकुम्भस्थलबहलवसावासनाविस्रगन्ध-
व्यासक्तव्यक्तमुक्ताफलशकललसत्केसरालीकरालः
एणीवैधव्यवेधाः स्वभुजबलमदग्रस्ततेजस्विधामा
गुञ्जन्कुञ्जे गिरीणां हरिरिह शबरीगर्भपातं विधत्ते ।

बीभत्से उदाहरणं निधीयते—

उत्कृत्य ज्वलितां शवात्कथमपि प्रेताशनः पैशितीं
पेशीमग्निमयीं निगीर्य सहसा दन्दह्यमानोदरः ।
धावत्युत्प्लवते मुहुर्निपतति प्रोत्तिष्ठति प्रेक्षते
विष्वक्क्रोशति संपिनष्टि जठरं मुष्ट्या चलन्मस्तकः ॥

रौद्रे दृश्यतामुदाहरणम्—

नाहं रक्षो न भूतो रिपुरुधिरजलाह्लादिताङ्गः प्रकाशं
विस्तीर्णोरूप्रतिज्ञाजलनिधिगहनः क्रोधनः क्षत्रियोऽस्मि।
भो भो राजन्यवीराः समरशिखिशिखामुक्ताशेषा कृतंव-
स्त्रासेनानेन लीनैर्हतकरितुरगान्तर्हितैरास्यते यत् ॥

शान्तरसोऽयमिह वाति—

हेयं हर्म्यमिदं निकुञ्जभवनं श्रेयः प्रदेयं धनं
पेयं तीर्थपयो हरेर्भगवतो गेयं पदाम्भोरुहम् ।
नेयं जन्म चिराय दर्भशयने धर्मे निधेयं मनः
स्थेयं तत्र सितासितस्य सविधे ध्येयं पुराणं महः ॥

नवानामपि रसानामुपर्युदाहरणानि यानि प्रस्तुतीकृतानि सन्ति, तेषूदाहरणेष्वेकमप्युदाहरणमीदृशं न यत्र कविस्तस्य तस्य रसस्य सन्निवेशने सक्तो न दृश्यते।

यस्मिन्नुदाहरणे यो हि विषय उपनिबद्धस्तस्मिन्नुद्ग्रथिते विषये सोऽभिमतो रस आत्मानमभिव्यक्तीकर्तुं सर्वथैव पूर्णं सदवसरमश्नुते ।

तद्विशिष्टतायास्तत्र तत्र यद्दर्शनं सञ्जायते तेन कवेः कवित्वक्षमतायाः सम्यगवबोधो भवति ।

एवंविधानि अलङ्कारालङ्कृतानि गुणवन्ति निर्दोषाणि रसश्रितानि काव्यानि ये कवयो विरचय्य जगतीजनतामनांसि प्रीणयन्ति ते धन्याः। अत एव अग्निपुराणकारस्तमेतैः शब्दैः प्रशंसति—

सालङ्कारा सगुणा सरसा वाचां परिस्पन्दैः।
आर्या सौभाग्यवती कविता यस्यास्त्यसौ धन्यः ॥

कश्चिदन्यः कविमित्थं स्तवीति—

माधुर्यमार्दवसवक्रिमसौष्ठवदोजो वैदग्ध्यचित्रपदताकृतचारिमा या ।
आपानकोचितरसाभिनयं दधाना वाणी मुखाद् गलति यस्य कविः स धन्यः ॥
नूनं कवेरस्ति गतिर्विलक्षणा भानोस्ततोऽयं द्युनिवासिनामपि ।
आविश्य हृत्सद्मनि गीर्विलासिनीमालिङ्गयन् नन्दति नन्दनोत्तरे ।

यत्र कवित्वं वर्तते स कविरिति गीयते। किं नाम कवित्वम् ? किं तत्कवित्वं यदविदितगुणापि भणितिः कर्णेषु वमति मधुधाराम् ? किं वा तत्क-

वित्वं यन्न मनीषिणामेव मुग्धतरात्मनामपि चेतांसि प्रविश्य मनसां प्रवृत्तीरन्यथैव कुर्वद् रससिद्धसूक्तिभिः किञ्चन लोकोत्तरं सर्वमोहनमानन्दं समर्पयत् सकलामपि जगतीं नूतनायामाभायां परिणमयति। किं नाम तत्कवित्वं यत् साहित्यसातार्थविवेचनसुधया मनीषिणां समग्रमपि मण्डलं रञ्जयद् विद्योतते।

न ज्ञायते किमस्ति कवित्वम्? अपि किम् अलङ्काराः, वा गुणाः, वा शब्दार्थौ, वा शब्द एव वा अर्थ एव किं वा रसो वा अन्यदेव किमपि यदासाद्य कश्चित् धन्यः कविरिति कीर्त्यते। यं हि कश्चिदित्थं स्तवीति—

**कविर्भोगी कविर्योगी वियोगी कान्तया कविः।**
**कविर्भक्तिरसोन्मत्तः कवेः सर्वं हि शोभते॥**

यत् काव्यमाकर्ण्य श्रोता आनन्दमनिर्वचनीयं निपीय स्वशिरो धूनयति तदेव वस्तुतः काव्यं काव्यम्; अत एव नलचम्पूकारः श्रीत्रिविक्रमभट्ट आह—

**किं कवेस्तेन काव्येन किं काण्डेन धनुष्मतः।**
**परस्य हृदये लग्नं न घूर्णयति यच्छिरः॥** (१/५)

ईदृशस्य काव्यस्योद्भवे भवति प्रमुखो हेतुः प्रतिभा।

**'शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्।**
**काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे॥**

इत्येतां कारिकां प्रस्तुतीकृत्य वाग्देवतावतार आचार्य्यमम्मटः 'शक्ति' रित्येतेन पदेन प्रतिभां निर्दिशति। न तां विना काव्ये काव्यत्वमुद्भवति, न तामन्तरेण काव्यं प्रसृतं भवति प्रसृतं सदप्युपहासास्पदं सञ्जायते। 'कवित्वबीजं प्रतिभानम्' इति सूत्रयन् प्राचीनो वामनो यदूचिवांस्तदेव, ज्ञायते, मम्मटाचार्यः परिपोषितवान्। कारिकागतेन 'हेतु' रित्येतेनैकवचनेनेदमवगम्यते यत् त्रयाणां समुदितानामेव हेतुत्वं, न तु प्रत्येकस्य। प्रतिभापरपर्याया कवित्वबीजरूपा 'शक्ति' रेवात्र त्रिषु प्रधानतां विन्दति, अत एव विवरणे 'यां विना काव्यं न प्रसरेत्' इत्येषोक्तिः संगच्छते।

काव्यस्य हेतुः प्रतिभेति निर्दिशति कविसमाजः। प्रत्युत्पन्नमतित्वं प्रतिभेति शंसन्ति सुधियः। काव्यनये सा विशेषार्थवती विलोक्यते। व्यापारवती सा रसान् रसयितुं प्रभवति।

**'या व्यापारवतीरसान् रसयितुं काचित् कवीनां नवा,**
**दृष्टिर्या परिनिष्ठितार्थविषयोन्मेषा च वैपश्चिती।'**

(ध्वन्यालोके, तृ उ०, पृ० ३२७)

इत्येतदभिधाय ध्वनिकारा आनन्दवर्धनाचार्याः प्रतिभायाः काव्यदृष्ट्या अर्थवैशिष्ट्यमुद्भावयन्ति।

श्रीमदाचार्याभिनवगुप्तपादानां प्रतिभामधिकृत्य '**क्षणे क्षणे नूतनैर्नूतनै वैचित्र्यैर्जगन्त्यासूत्रयन्ती प्रतिभारूपा**' इति यदुदीरणं तस्याभिप्रायोऽयम्— '**प्रतिभा अपूर्ववस्तुनिर्माणक्षमा प्रज्ञास्ति। तस्या विशेषः रसावेशवैशद्यसौन्दर्यं काव्यनिर्माणक्षमत्वम्**' इति। काव्यविषयिणी काचन विलक्षणा शक्तिरत्र प्रतिभाशब्दव्यवहार्या वर्तते।

'**प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता**' इत्येतत्पदवृन्दं काव्यकौतुककर्तुः आचार्यभट्टतौतस्येति काव्यप्रकाशसङ्केते माणिक्यचन्द्र आह—

**प्रसन्नपदनव्यार्थयुक्त्युद्बोधविधायिनी।**
**स्फुरन्ती सत्कवेर्बुद्धिः प्रतिभा सर्वतोमुखी॥**

इत्युद्घोषयन् वाग्भटः काव्यनये प्रतिभायाः सर्वतोमुखीं प्रसरणशीलतामामनति।

का प्रतिभा—इत्यत्र राजशेखरो ब्रूते—

'**या शब्दग्राममर्थसार्थमलंकारतन्त्रमुक्तिमार्गमन्यदपि तथाविधमधिहृदयं प्रतिभासयति सा प्रतिभा**'—इति।

'**कविस्वभावभेदनिबन्धनत्वेन काव्यप्रस्थानभेदः समञ्जसतां गाहते। सुकुमारस्य कवेस्तथाविधैव सहजा शक्तिः समुद्भवति। शक्तिशक्तिमतोरभेदात्**' इति आचार्य कुन्तको वक्रोक्तिजीविते 'शक्ति' पदमुल्लिख्य प्रतिभां विवक्षति।

'**असौ शक्तिर्यस्यामविक्षिप्ते चेतसि सदानेकप्रकारस्य वाक्यार्थस्य स्फुरणम्। यस्याञ्च अक्लिष्टानि झगित्येवार्थप्रतिपादनसमर्थानि पदानि प्रतिभान्ति। यद्वशात् हृदयङ्गमौ नानाविधौ शब्दार्थौ प्रतिभासेते सा शक्तिः**' इत्येतत् काव्यालङ्कारे रुद्रटः प्रतिभां शक्तिपदेन निर्दिशन्नुपरिस्थितविधिना व्याख्याति ताम्।

पण्डितराजो जगन्नाथः प्रतिभां स्वग्रन्थे रसगङ्गाधरे निर्दिशत्येवम्—

'**तस्य च कारणं कविगता केवला प्रतिभा**' इति।

प्रतिभामात्रस्य काव्यकारणतावादिषु अयमन्यतमः। प्रतिभाया द्वैविध्यं वदति राजशेखरः। सा कारयित्री, भावयित्री च। कारयित्री प्रतिभा कविमुपकरोति, भावयित्री भावुकम्।

इयं प्रतिभैव या काव्ये रसमवतारयितुं क्षमते। विष्णुधर्मोत्तरपुराणं नाट्यशास्त्रमिव रसं वर्णयद् दृश्यते। तत्र स्पष्टरूपेण प्रसिद्धैरष्टाभिरपि रसैः सह शान्तरसस्याप्युल्लेखो दृष्टिपथमायाति।[1] एतावदेव न, तस्याभिनेयत्वमपि विस्पष्टं प्रतिपादितं वर्तते।[2] एतेन 'अभिनवभारत्याम्' प्रतिपादितमाचार्याभिनवगुप्तमतं प्रमाणितं भवति यत् 'शान्तो नाम शमस्थायिभावात्मकः—' इत्येवं प्रकारेण नाट्यशास्त्रेऽपि शान्तरसस्य भरतेन विचारः कृतः। एतेनास्मिन् विषये उपरि यदुक्तं तस्य दाढ्यं स्पष्टतया सञ्जायते। भामहात् प्राचीने 'अनुयोगद्वारसूत्र'ग्रन्थेऽपि नवकाव्यरसानां प्रतिपादनमाप्यते[3]। भामहोऽपि रसवदूर्जस्विप्रेयोविवेचनप्रसङ्गे रसभावान् प्रतिपादयन् दृश्यते। महाकाव्यं लक्षयता भामहेन **'रसैश्च सकलैः पृथक्'** इत्यभिधाय[4] काव्ये रसस्योपादेयत्वं महत्त्वञ्च व्यक्तीकृतम्। **'सैषा सर्वत्र वक्रोक्तिरनयार्थो विभाव्यते'**[5] इत्यस्य विवरणं विदधता आचार्याभिनवगुप्तेन **'प्रमदोद्यानादिभिर्विभावतां नीयते विशेषेण च भाव्यते रसमयी च क्रियते''** इत्येवाभिहितम्। एतेन वक्रोक्त्यापि रसमयीकरणमेव प्रतिपादितं भवति।

दण्डिनोऽलङ्कारलक्षणं यद् व्याख्यातं भोजराजेन तत् काव्यशोभाकरान् इत्यनेन **श्लेषोपमादिवद् गुणरसभावतदाभासप्रशमादीनप्यनुगृह्णाति, मार्गविभागकृद्गुणानामलङ्क्रियात्वोपदेशेन श्लेषादीनां गुणत्वमिव अलङ्कारत्वपि ज्ञापयति।'** इत्येवं व्याचक्षाणोऽसावलङ्कारप्रकोष्ठ एव गुणरसभावादीनपि समावीविशत्। इत्थं दण्डिमतेऽलङ्कारस्याङ्गित्वे सिद्धेऽपि—

**प्रेयः प्रियतराख्यानं रसवद् रसपेशलम्।**[7]

---

१. विष्णुधर्मोत्तरे, ३/१५/१४
२. तत्रैव, ३/१०/६
३. अनुयोगद्वारसूत्रे गाथा ६३
४. काव्यप्रकाशे, ४/४ द्वाचतुर्विंशसूत्रवृत्तिः।
५. भामहालङ्कारे, २/८५
६. ध्वन्यालोकलोचने, पृ० २६०
७. काव्यादर्शे, २/२७५

इत्येतदादिवचनेन प्रेयोरसवदूर्जस्विनामलङ्काराणां युक्तोत्कर्षत्वप्रतिपादने रसभावादीनामेव महत्त्वं व्यक्तं भवति ।

**'कामं सर्वोऽप्यलङ्कारो रसमर्थं निषिञ्चति'**[1] इत्येतदादि च प्रतिपादयताचार्यदण्डिना रसस्यैव महत्त्वं प्रदर्शितम् इत्युक्तमेव प्रागपि ।

**प्राक् प्रीतिर्दर्शिता सैव रतिः शृङ्गारतां गता ।**
**रूपबाहुल्ययोगेन तदिदं रसवद् वचः ॥**[2]

इत्येतदादिवाक्येन भट्टलोल्लटस्य मतमिव दण्डिनोऽपि मते रसस्योत्पत्तिरेव प्रतीयते ।

भट्टोद्भटोऽलङ्कारस्य महत्त्वं मन्यमानोऽपि रसादेः सविस्तरं विचारं व्यदधात्—

**रत्यादिकानां भावानामनुभावादिसूचनैः ।**
**यत् काव्यं बध्यते सद्भिस्तत् प्रेयस्वदुदाहृतम् ॥**

**रसवद्दर्शितस्पष्टशृङ्गारादिरसोदयम् ।**
**स्वशब्दस्थायिसञ्चारिविभावाभिनयास्पदम् ॥**[3]

इत्येतदायुक्त्वा रसवदाद्यलङ्कारांश्चाभिदधौ सः । शान्तसहिताः शृङ्गारादयो नवरसा नाट्ये भवन्तीति च स उक्तवान् ।

उद्भटस्य रसस्वरूपप्रतिपादनविषयके विचारे, ध्वनिसम्प्रदायस्य रस विचारे इव स्पष्टे सत्यपि उभयत्रायमेव महान् भेदो यद् आनन्दवर्धनादिमते[4] यत्र रसादयो मुख्यास्तत्रोद्भटमते तेऽलङ्काराः । रसस्यैवालङ्कारत्वमङ्गीकृत्य अलङ्कार्यालङ्कारभेदं कर्तुं नाशक्नुवन् उद्भटादय इति यदुच्यते तत् सत्यमेव । भावशान्त्यादिस्थले समाहितालङ्कारस्योद्भटेनैव कृतं नवीनमुद्घाटनम् ।

आचार्यो रुद्रटः स्वकीये 'काव्यालङ्कारे' ग्रन्थे रसस्य यादृशं सविस्तरं विवेचनं कृतवान् तादृशं न हि अलङ्कारसम्प्रदायग्रन्थेषु प्राप्यते, एतावदेव न, परवर्तितत्सम्प्रदायग्रन्थेषु तद् दुर्लभमेव ।

---

१. तत्रैव, १/६२
२. तत्रैव, २/२८१
३. काव्यालङ्कारसंग्रहे ४/२-३
४. काव्यप्रकाशे ५ मे उ०, ४/४ कारिकायां लघुवृत्तौ

अनेनैवोद्भटेन प्रेयो नाम दशमो रसः प्रतिपादितः। तत्र रसो विभावानुभावव्यभिचारिस्थायिभावप्रदर्शनपूर्वकं सोदाहरणं प्रदर्शितः।

"ननु काव्येन क्रियते सरसानाम्......[१]"

इत्येतदादिप्रकारेण रुद्रटो रसस्य महत्त्वं मुक्तकण्ठं गायति। यद्यपि रुद्रट उदारतापूर्वकं रसमधिकृत्य विचचार परं सोऽलङ्कारसम्प्रदायस्यैव अनुयायी मतो भवति।

अनेनैवोद्भटेन प्रेयो नाम दशमो रसः प्रतिपादितः। तत्र रसो विभावानुभावव्यभिचारिस्थायिभावप्रदर्शनपूर्वकं सोदाहरणं प्रदर्शितः।

आचार्यरुद्रटस्य रसविषयकं सिद्धान्तं रुद्रटालङ्कारस्य विश्रुतष्टीकाकारो नमिसाधुः साधु प्रतिपादितवान्—अर्थालङ्कारमध्ये रसा अपि किन्नोक्ताः।[२] 'उच्यते, काव्यस्य हि शब्दार्थौ शरीरम्। तस्य च वक्रोक्तिप्रभृत्यलङ्काराः कटककुण्डलादयइव कृत्रिमा अलङ्काराः। रसास्तु सौन्दर्यादिय इव सहजा गुणा इति भिन्नास्तत्प्रकरणारम्भ इति।

तदेवं सर्वैरपि प्रत्यक्षतयाप्रत्यक्षतया वाङ्गीकृतोऽस्ति समादृतोऽस्ति च रसः सम्यक्।

अस्मिन् वर्तमानेऽनेहसि मराठीहिन्दीप्रभृतिभाषास्वपि बहुभिर्विद्वद्भिः साहित्यशास्त्रस्य रसरीतिगुणालङ्कारादि तत्त्वेषु परमगम्भीरतापूर्वकं विचारो विहितोऽस्ति नितरां समीचीनतया च तत्तत्तत्त्वानां तैर्विश्लेषणं विवेचनञ्च कृतमस्ति। अत एव नूतननूतनतरोद्भावनानां श्रियः साहित्यशास्त्रपरकान् ग्रन्थान् समुल्लासयन्त्यः सम्प्रेक्ष्यन्ते। एकतः प्रगतिवादिनामेकतश्च प्रयोगवादिनां विप्रतिपत्तयो विचारवतां विचारानुत्तरलयन्त्योऽवलोक्यन्ते।

योऽयं ग्रन्थो भवत्करकमलाधिष्ठितो वर्तते तत्र रसाख्यं तत्त्वमधिकृत्य विमर्शः समुपस्थापितोऽस्ति। अस्मदीयाः प्राञ्चोऽभिनवगुप्त मम्मटानन्दवर्धनप्रभृतय आचार्या रसमधिकृत्य यं विचारं व्याञ्जिषुस्तत्र ध्यानावस्थिता भवन्तो विचारवन्त आधुनिका विपश्चितो विचारं यं यं समुपस्थापयन्ति तं तञ्च सुदृढमानसा भवन्तोऽनुशीलयन्तु। इदन्तु प्रध्यो विदन्त्येव यद् आचार्याः प्राञ्चो रससिद्धान्तपरकान् विचारान् व्यापके धरातले प्रतिष्ठापयन्तश्चकासति।

---

१. काव्यालङ्कारसंग्रहे, ४/७

२. रुद्रटालङ्कारे, १२/२ कारिकायां नमिसाधोष्टीका।

यस्मिन् सत्यनुभूते मानवस्य मानसं सर्वेभ्योऽपि विषयेभ्यो दूरीभूय तत्रैव रमते यत्र कविस्तन्मानसं रमयितुमभिलषते तत् तत्त्वं साहित्यशास्त्रे 'रस' इत्येतेन नामधेयेन गतीमस्ति। आचार्यमम्मटेन "...सामाजिकानां वासनात्मतया स्थितः स्थायी रत्यादिकः......पुर इव परिस्फुरन् हृदयमिव प्रविशन् सर्वाङ्गीणमिवालिङ्गन् अन्यत् सर्वमिव तिरोदधत् ब्रह्मास्वादमिवानुभावयन् अलौकिकचमत्कारकारी शृङ्गारादिको रसः" इत्येतदादिशब्दैस्तस्य स्वरूपमुद्भावितम् अस्ति।

रसस्याद्भुत एव दिव्यप्रकर्षमयः प्रभावः। तदीय आलोके निपतिते सति एकान्ततया पूर्णतया च मानवः स्वकीय आत्मन्यवस्थितो जायते। आत्मन आनन्दमयत्वात् तत्र स्थितिर्मानवमानन्दमयमेवानुतिष्ठति। काव्यजनित एष आनन्दः (रसः) आत्मनिष्ठया बुद्ध्योपलभ्यते। सर्वथैवैष आनन्दो भवति सहजो निर्मलोऽतीन्द्रियश्च। तेन भवत्यात्मा प्रसादोपेतो बुद्धिर्वा प्रसन्ना। परिणामे स (आनन्दः) अमृतोपमः। एतादृगानन्दो न स्त्रीसान्निध्याल्लब्धो भवितुमर्हति न च सुरापानात् प्राप्तुं शक्यो न चान्येभ्यः साधनेभ्यः।

काव्यस्य लक्ष्यं मनःप्रसादनमात्रं न, तत् तु तदीयस्य (मानवस्य) धियं परिमार्ष्टि, आत्मानमुन्नमयति सर्वथैव तत्र सा शक्तिर्या मानवं देवत्वे परिणमयति किं वा परमात्मन्यन्तर्भावयति। एतद्विधवैशिष्ट्यविशिष्ट काव्यमेव काव्यम्। सामान्यस्य मानवस्य हितायैव कविः काव्यनावं सृजति। तया काव्यानावा सः सुखेन संसारसागरमुल्लङ्घयितुं क्षमते।

रस आनन्दमयो नेत्येतदभिधानं तु सूर्यस्तमोविनाशनक्षमतारहितः चन्द्रो नास्ति चन्द्रिकावर्षी इत्येतत् कथनमिव वर्तते। रसस्तु स एवोच्यते योऽस्त्यानन्दमयः। प्राचीनाचार्यैः रसस्य यल्लक्षणं कृतं तल्लक्षणवान् रसस्त्वानन्दमयस्तद्भिन्नः कश्चिद् रस इति प्रोच्यते स। स्यादानन्दरहितः।

लक्ष्मणे मूर्च्छां गते सति रामक्रियमाणं विलापमाकर्ण्य सामाजिकास्तेन विलापेन यदाऽऽवर्ज्यन्ते, यदा तेषां मनोवृत्तिः सर्वेभ्योऽप्यन्येभ्यो विषयेभ्योदूरीभूता जायते, यदा च ते शोकाकुला भवन्ति तदा तस्मिन् शोकाकुलत्वे यो हि रसः सामाजिकैरनुभूयते तस्यानुभूतिस्तैरेव विधीयते। तस्मिन् शोकेऽपि वर्तते प्रियत्वं, तस्मिन् शोकेऽपि विद्यते आकर्षणं, तस्मिन् शोकेऽपि विराजते आनन्दः, अत एव तु सन्नपि शोकविषयकः स प्रसङ्गो यदा यदा श्रुतो वा विलोकितो जायते मानवस्य हृदयं न तस्मात् कदापि उद्विजते यथान्येभ्यः

शोकेभ्य: । एतस्मादेव हेतो: करुणो रसत्वेन वीरो रसत्वेन अन्ये च रौद्रादिका रसत्वेन मता: ।

यस्मिन् काले स: स रसोऽनुभूयमानो जायते तदा सामाजिक एव जानाति इदं यत् स: कामनिर्वचनीयामवस्थां नीतोऽस्ति । तदानीं पठ्यमाने श्रूयमाणे विलोक्यमाने काव्ये यद् यद् वस्तु वर्तते तेन सह सामाजिकस्य सर्वथैव साधारण्यं (एकत्वं वा अभिन्नत्वं) समुत्पद्यते तस्मादेव कारणात् (साधारण्यात्) स: स रसस्तस्यानुभूतेर्विषयो भवति । आश्चर्यं महद् यद् वदन्ति केचन 'रसानुभूत्यर्थं साधारणीकरणं नापेक्ष्यते' इति ।

रस्यते आस्वाद्यते इति रस: । उक्तव्युत्पत्त्यनुसारेण रस:, भाव:, रसाभास:, भावाभास:, भावशान्ति:, भावोदय:, भावसन्धि:, भावशबलता इत्येतत्सर्वाण्यपि रसश्रेण्यां गण्यन्ते । रसादे: प्रतीत्यां क्रमस्त्ववश्यं भवति, लाघवान्न संलक्ष्यते । अत एव रसादिरसंलक्ष्यक्रमव्यङ्ग्य इति कथ्यते । इमे रसभावादिका: सन्ति आस्वादप्रधानध्वनयस्तस्मात् कारणाद् असंलक्ष्य-क्रमव्यङ्ग्या इति बोध्या: । एतस्य रसादेरसंलक्ष्यक्रमव्यङ्ग्यध्वनित्वेन यदभिधानं भवति तदुक्तहेतुवशादेव; परं तस्य तथाविधनाम्नोच्चारणं न केचन सहन्ते । अस्तु तावत् ।

अत्र ग्रन्थे सर्वेष्वपि साहित्यशास्त्रप्रतिपादितेषु तत्त्वेषु रसस्य किं नाम स्थानं, तस्य सर्वेषामपि तत्त्वानां मध्ये श्रेष्ठत्वस्य कारणं किञ्च तत्स्वरूप-मुद्दिश्य विवेचनं कृतं वर्तते । एष एव ग्रन्थस्यास्य प्रतिपाद्यो विषय: । नात्र तद्विचारवतां विप्रतिपत्तयो विचारणीयतां नीता: सन्तीति शम् ।

**अनादिनिधनं ब्रह्म रसनाम्ना सुविश्रुतम् ।**
**आराधित: कविश्रेष्ठै: सादरं नितरां मुदा ।।**

इति रायबरेली मण्डलान्तर्गत हरिदासपुरेत्येतदाख्यग्रामकृतवासानां पूर्वजानां कुले समुत्पन्नेन, श्रीपण्डितरघुनन्दनशरणशुक्लानां पौत्रेण, श्रीपण्डितगुरुदेव-शुक्लानां पुत्रेण, श्रीमातृगङ्गाप्रसूतेन, 'रामकली'-कलत्रेण भरद्वाजगोत्रभृता, प्रबन्धरत्नाकर-नाट्यसंस्कृतिसुधा - भारतस्वातन्त्र्यसंग्रामेतिहास-सुगम रामायण-भरतचरितामृत-श्रीकृष्णचरित-विभावन (ब्रह्मानन्दशुक्ल-शतक) गीतमहावीर - बंगलादेश-चारुचरितचर्चा-गान्धिगौरवाद्य नेकग्रन्थरचयित्रा, साहित्याचार्य-सांख्ययोगाचार्य-साहित्यरत्न-

व्याकरणरत्न-एम० ए० पीएच० डी०-विद्यावाचस्पति-प्रभृति
पदवीविभूषितेन प्राप्त 'धौलपुर' जननेन (अलीगढ़स्थ)
श्रीवार्ष्णेयकालेज - संस्कृत - विभाग - प्राक्तनाचार्येण,
दिल्लीस्थ मोतीनाथसंस्कृत-महा - विद्यालये शास्त्र-
चूडामणि पण्डितपद प्रतिष्ठितेन, दिल्ली-
देववाणी-परिषदध्यक्षेण (अलीगढ़स्थ) संस्कृत-
परिषदो भूतपूर्वमुख्यमन्त्रिणा, राज्य पुरस्कृता-
नेकग्रन्थेन शुक्लोपाह्वरमेशचन्द्रेण कृतो
'रसदर्शनम्' नाम ग्रन्थः सम्पूर्णतामगात् ।

शुभं भूयात्

४-६-१९८३

# देववाणी-परिषदा प्रकाशिताः ग्रन्थाः

| | | |
|---|---|---|
| १. | अर्वाचीनसंस्कृतमहाकाव्यविमर्शः (प्रथमखण्डः) (सं० : डा० रमाकान्तशुक्लः) | रु० १५.०० |
| २. | ,, ,, ,, (द्वितीयखण्डः) | रु० ३०.०० |
| ३. | ,, ,, ,, (तृतीयखण्डः) | रु० ३०.०० |
| ४. | कर्णभूषणम् (डा० सी० आर० स्वामिनाथन्) | रु० ५.०० |
| ५. | श्री बदरीशसुप्रभातम् ( ,, ) | रु० १०-०० |
| ६. | श्रीपादसप्ततिः (पादपरागव्याख्या) ( ,, ) | रु० ४०-०० |
| ७. | भाति मे भारतम् (काव्यम्) (डा० रमाकान्तशुक्लः) | रु० ४०.०० |
| ८. | श्रीकृष्णचरितम् (डा० रमेशचन्द्रशुक्लः) | रु० ३०.०० |
| ९. | सुगमरामायणम् ,, ,, | रु० ३५.०० |
| १०. | हरविजयस्य साहित्यिकमध्ययनम् (डा० कृष्णकान्तशुक्लः) | ९०-०० |
| ११. | श्रीमदप्पयदीक्षितचरितम् (डा० हरिनारायणदीक्षितः) | रु० २०.०० |
| १२. | संस्कृत साहित्य में राष्ट्रिय भावना (भाग १) ( ,, ) | रु० ४०-०० |
| १३. | भारतस्वातन्त्र्यसंग्रामेतिहासः (डा० रमेशचन्द्र शुक्लः) | रु० ३५.०० |
| १४. | सदाशयसमुच्चयः (पं०टी०वी० परमेश्वर अय्यरः) | रु० १५.०० |
| १५. | आभाणकमञ्जरी ( ,, ,, ) | रु० १५.०० |
| १६. | मेघदूत : एक विश्लेषण (डा० देवीदत्त शर्मा) | रु० २०.०० |
| १७. | रघुवंश : एक विश्लेषण ( ,, ,, ) | रु० २०.०० |
| १८. | अभिज्ञानशाकुन्तल : एक विश्लेषण ( ,, ) | रु० २०.०० |
| १९. | कालिदास की कला और संस्कृति (भाग २) (लेखक : डा० देवीदत्त शर्मा) | रु० ६०.०० |
| २०. | जय भारतभूमे ! (काव्यम्) (डा० रमाकान्तशुक्लः) | रु० ३०.०० |
| २१. | अर्वाचीनसंस्कृतसाहित्यपरिचयः (प्रथम खण्डः) ( ,, ) | रु० ३०.०० |

२२. राधाकृष्णरसायनम् (श्री ओट्टूर उण्णि नम्बूदिरीपादः) रु० ४०.०

२३. साधारणीकरण और समानान्तर चिन्तन की पूर्वपीठिका रु० ५०.००
(डा० सुलेखचन्द्र शर्मा)

२४. अभिनवहनुमन्नाटकम् (डा० रमेशचन्द्र शुक्लः) रु० २०.००

२५. भट्टनायक और अभिनवगुप्त की साधारणीकरण-
विषयक अवधारणा (डा० सुलेखचन्द्र शर्मा) रु० ५०.००

२६. अभिनवोत्तर संस्कृत काव्यशास्त्र में साधारणीकरण-
विमर्श (डा० सुलेखचन्द्रशर्मा) रु०. ५०-००

२७. साहित्यकौतुकम् (काव्यम्) (पं० टी० वी० परमेश्वर अय्यरः) रु० ४०-००

२८. पूर्णकुम्भः (ललितनिबन्धसंग्रह) (पं० विष्णुकान्त शुक्लः) रु० २०-००

२९. स्फूर्तिसप्तशती (डा० शिवदत्तशर्मा चतुर्वेदी) रु० ३०-००

३०. रसदर्शनम् (डा० रमेशचन्द्र शुक्लः)

प्राप्तिस्थानम् :

'देववाणी-परिषद्, दिल्ली', ६ वाणी-विहारः, नयी दिल्ली-११००५९

( दूरभाष : ५५३२०६ )